

SRI SANKARACHARYA.
VOLUME
10

TO

HIS HOLINESS SRI JAGADGURU

SRI SACHCHIDANANDA SIVABHINAVA

NRISIMHA BHARATI SWAMI

WHO ADORNS THE THRONE OF THE SRINGERI MUTT

AS THE WORTHY REPRESENTATIVE OF THE

GREAT SANKARACHARYA

AND

THAN WHOM IT IS IMPOSSIBLE

TO COME ACROSS A HOLIER PERSONAGE,

A TRUER MAHATMA, A NOBLER SAINT

AND A MORE RIGOROUS ASCETIC,

THIS EDITION IS MOST RESPECTFULLY INSCRIBED

AS A TOKEN OF UNBOUNDED ADMIRATION

BY THE HUMBLEST OF ALL HIS DISCIPLES

T K BALASUBRAHMANYAM

नानाजन्मसु सञ्चितेन तपसा पूतेन चित्तात्मना
मित्रेण प्रतिबोधितेन कुतुकात्सर्वा. कृती. शांकरीः ।
समुद्य प्रथम जगद्गुरुपदे भक्त्या मयाद्यार्पिताः
स्वीकृत्योपहृति करोतु गुरुराड् धन्यं तथेमं जनम् ॥

श्रीमच्छकरदेशिकेन्द्ररचितान्सर्वान्प्रबन्धान्मुदा
तत्प्रीत्यै परिशोध्य पुस्तकचयैः समुद्य साकं बुधैः ।
तच्छात्रप्रवरालिमध्यविलसच्छ्रीदेशिकेन्द्रेषु ता-
न्कृत्वाद्योपहृति सभक्तिविनयं नूनं कृतार्थोऽस्म्यहम् ॥

सौम्याब्दमाधार्जुनपक्षराजत्सूर्याङ्कतिथ्याश्रितसोमवारे ।
श्रीशंकरार्यप्रतिमाप्रतिष्ठाकाले मयैषोपहृतिर्व्यधायि ॥

श्रीशंकरकृतिमाला गुरुवरतुष्ट्यै समर्पिता मोदात् ।
बालादिमपदभाजा सुब्रह्मण्येन भक्तिनम्रेण ॥ ४ ॥



PAGE

BRIHADARANYAKOPANISHAD BHASHYA— 683-834

CHAPTER V 683

CHAPTER VI 739

NRISIMHAPURVATAPANI UPANISHAD BHASHYA— 1-158

UPANISHAD I. . 7

UPANISHAD II . 47

UPANISHAD III . 87

UPANISHAD IV 97

UPANISHAD V 127





पृष्ठम्

बृहदारण्यकोपनिषद्भाष्यम् ... ६८३—८३४

पञ्चमोऽध्यायः ६८३

षष्ठोऽध्यायः ७३९

नृसिंहपूर्वतापनीयोपनिषद्भाष्यम् ... १—१५८

प्रथमोपनिषत् ७

द्वितीयोपनिषत् ४७

तृतीयोपनिषत् ८७

चतुर्थोपनिषत् ९७

पञ्चमोपनिषत् १२७



THE

UPANISHAD-BHASHYA

VOL 7

Brihadaranyaka
Chapters V & VI.
& Nrisimhapurvatapani.


॥ श्रीः ॥

उपनिषद्भाष्यम्

श्रीमच्छंकरभगवत्पूज्यपादैः

विरचितम् ।

सप्तमो भागः



बृहदारण्यकाध्यायौ ५-६

नृसिंहपूर्वतापनी च ॥



॥ श्रीः ॥

॥ विषयानुक्रमणिका ॥

पृष्ठम्

पञ्चमोऽध्यायः .... ६८३—७३८

प्रथमं ब्राह्मणम् ... ६८५—६९५

पूर्वमध्यायचतुष्टयेन निर्धारितस्य निरुपाधिकब्रह्मण एव सोपाधिकस्य पुरस्तादनुक्तानि उपासनानि वक्तव्यानीति परः सदर्भः इति पूर्वोत्तरग्रन्थसबन्धकथनम् ... ६८५

ओकारादीना ब्रह्मविद्यासाधनत्वविधित्सया सर्वोपनिषदर्थस्य परिपूर्णस्य परब्रह्मणः 'पूर्णमदः' इत्यादिमन्त्रेणानुवाद इति कथनम् ... ६८६

द्वैताद्वैतात्मकमेक ब्रह्मैव परमार्थसत्यम् इत्येव उक्तमन्त्रार्थ इति मतान्तरोपन्यासः ... ६८७

अद्वितीये ब्रह्मणि उत्सर्गापवादयोः विकल्पसमुच्चययोर्वा असभवात् श्रुतिस्मृतिन्यायविरोधाच्च न ब्रह्मणः द्वैताद्वैतात्मकत्वमिति विस्तरेण परमतखण्डनम् .. ६८८

ओंकारस्य ब्रह्मोपासनसाधनत्वेन विधानम् .. ६९२

द्वितीयं ब्राह्मणम् .... ६९६—७००

दमदानदयाना सकलब्रह्मोपासनाङ्गत्वेन विधानम् ... ६९६

तृतीयं ब्राह्मणम् ... ७०१—७०२

हृदय ब्रह्मेति उपासनविधानम् .. ७०१

चतुर्थं ब्राह्मणम् ... ७०३—७०४

हृदयाख्यस्य ब्रह्मणः सत्यमित्युपासनविधानम् ७०३

पञ्चमं ब्राह्मणम् ... ७०५—७१०

सत्यस्य ब्रह्मणः स्तुत्यर्थं प्रथमजत्वाद्युपपादनम् ... ७०५

सत्यस्य ब्रह्मण आदित्यमण्डलाक्षिरूपस्थानविशेषे उपासनविधानम् ... ७०७

व्याहृतिषु स्थानद्वयसबन्धिनः सत्यस्य ब्रह्मणः शिर आद्यवयवदृष्टिविधानम् ... ७०९

षष्ठं ब्राह्मणम् ... ७११

मन उपाधिविशिष्टस्य ब्रह्मणः उपास्तिविधानम् .. ७११

सप्तमं ब्राह्मणम् ... ७१२

विद्युद्ब्रह्मेत्युपासनविधानम् ... ७१२

अष्टमं ब्राह्मणम् ... ७१३

वाग्धेनुः ब्रह्मेत्युपास्तिविधानम् ... ७१३

नवमं ब्राह्मणम् ... ७१४

वैश्वानराग्न्युपाधिकस्य ब्रह्मणः उपास्तिविधानम् .. ७१४

दशमं ब्राह्मणम् ... ७१५—७१६

एतत्प्रकरणस्थाना सर्वेषामुपासनानां गतिकथनम्, अश्रुत-फलोपासनाना ब्रह्मलोकफलकथन च ... ७१५

एकादशं ब्राह्मणम् ... ७१७

व्याधितस्तप्यमानस्य तापे तप इति दृष्टिविधानम् ... ७१७

द्वादशं ब्राह्मणम् ... ७१८—७२०

अन्नप्राणौ सहभूतौ ब्रह्म– इत्युपास्तिविधानम् ७१८

त्रयोदशं ब्राह्मणम् ७२१—७२३

उक्थादिदृष्ट्या प्राणोपासनविधानम् ... ७२१

चतुर्दशं ब्राह्मणम् ... ७२४—७३५

गायत्र्याः प्रथमे पादे त्रैलोक्यदृष्टिविधानम् ... ७२४

द्वितीये पादे त्रैविद्यदृष्टिविधानम् ... ७२५

तृतीये पादे प्राणदृष्टिविधान तुरीयपादाख्यगायत्र्यभि-धेयनिरूपणं च .. ७२६

अभिधानात्मकगायत्र्या अभिधेयतन्त्रत्वप्रतिपादनम् .. ७२७

गायत्रीविदः प्रतिग्रहदोषाभावाभिधानम् ... ७३१

गायत्र्युपस्थानमन्त्रार्थनिरूपणम् ७३३

सार्थवादेन वाक्येन गायत्र्या मुखाख्याङ्गविधानम् ७३४

पञ्चदशं ब्राह्मणम् ... ७३६—७३८

ज्ञानकर्मसमुच्चयकारिण अन्तकाले आदित्यप्रार्थनप्रतिपादनम् ... ७३६

षष्ठोऽध्यायः .... ७३९—८१७

प्रथमं ब्राह्मणम् ... ७४०—७५५

ज्येष्ठश्रेष्ठत्वगुणविशिष्टप्राणोपासनविधानम् .. ७४०

वसिष्ठत्वगुणकवागात्मकप्राणोपासन प्रतिष्ठात्वगुणकचक्षुरात्मकप्राणोपासनयोर्विधानम् ... ७४२

सपद्गुणकश्रोत्रप्राणोपासनविधानम् ... ७४४

प्रजापतिं गत्वा कोऽस्माक मध्ये वसिष्ठः इति वागादिप्राणैः कृतप्रश्नस्य यस्मिन्व उत्क्रान्ते शरीर पापीयो भवति स वो वसिष्ठः इति प्रजापत्युत्तरनिरूपणम् .. ७४५

वागादीनां प्रत्येक क्रमेण उत्क्रमणेऽपि शरीरस्य यथापूर्व प्राणनादिक दृष्ट्वा पुनः प्रवेशनिरूपणम् .. ७४७

प्राणे उत्क्रमण करिष्यति सति प्रचलितवागादिकृतप्राणप्रार्थनम्, प्राणस्य बलिदान च ... ७४९

प्राणिभिरद्यमान सर्वमप्यन्नं प्राणस्यान्नमिति दृष्टिविधानम् ... ७५२

भक्ष्यमाणा आपः प्राणस्य वास इति दृष्टिविधानम् ... ७५३

द्वितीयं ब्राह्मणम् ... ७५६—७८४

पूर्वोत्तरसदर्भसम्बन्धकथनपूर्वकं श्वेतकेतोः पाञ्चालराजप्र-

वाहणपरिषद्गमनवर्णनम् ... ७५६
वेत्थ यथेमाः प्रजा म्रियमाणा विप्रतिपद्यन्ते इत्यादिप्रवाहणकृतपञ्चप्रश्नाना श्वेतकेतोरुत्तरदानसामर्थ्याभावप्रतिपादनम् ... ७५९
उत्तरदानासामर्थ्याद्राजकृतसत्कारमप्यनादृत्य पितरमागत्य श्वेतकेतुना प्रवाहणकृतपञ्चप्रश्ननिवेदनम् .. ७६२
ततः पुत्र विना आगताय गौतमाय प्रवाहणेन आसनादिपूजापूर्वकं वरदानम् ... ७६३
वरदानप्रतिज्ञानन्तर पञ्चप्रश्नोत्तराणि ब्रूहि इति गौतमवचनम् ... ७६४
मानुषाणामन्यतम वर प्रार्थय— इति प्रवाहणवचनम् ७६४
मानुषवरा ममापि सन्ति, दैववरप्रदानेन स्वप्रतिज्ञा रक्षणीया इति गौतमवचनानन्तर मत्तः शिष्यत्वेन विद्यामाप्तुमिच्छ— इति प्रवाहणेनोक्तः गौतमः उपैमि शिष्यत्वेन—इति उपगमनकीर्तनमात्रेणैव उवास— इति कथनम् ... ७६५
पीडितगौतमक्षमापनपुरःसर वक्ष्यामीति प्रवाहणवचनम् ७६६
पञ्चाग्निविद्योपदेशः ... ७६७
मृतस्य अग्नये हरणादेः कथनम् ७७५
पञ्चाग्निविदामुत्तरमार्गेण गतेः प्रतिपादनम् .. ७७६
पञ्चाग्निविद्यारहितानां केवलकर्मिणां दक्षिणमार्गकथनम् ७८०
विद्याकर्मरहिताना तृतीयस्थानवर्णनम् ... ७८३

तृतीयं ब्राह्मणम् ... ७८५—७९५

प्राणोपासकस्य महत्त्वप्राप्तये मन्थाख्यकर्मविधानम् ... ७८५

चतुर्थं ब्राह्मणम् ... ७९६—८१३

प्राणदर्शिनः श्रीमन्थ कृतवतः पुत्रमन्थविधानम् ... ७९६

मैथुनकर्मणि वाजपेयत्वसपादनकथनम् .. ७९७

वाजपेयत्वसपादनेन पशुकर्म कुर्वतः फलकथनपूर्वकम-
विदुषः प्रत्यवायप्रदर्शनम् ... ७९७

अविदुषामतिगर्हितमिद कर्म— इत्यत्राचार्यपरम्परासम-
तिकथनम् ... ७९८

सुप्तस्य जाग्रतो वा रेतःस्खलने प्रायश्चित्तविधानम् .. ७९९

उदके छायादर्शने प्रायश्चित्तविधानम् ... ८००

भार्यावशीकरणोपायकथनम् ... ८०१

पुरुषद्वेषिण्या. प्रीतिसपादनप्रक्रिया, गर्भिणी मा भूदिती-
च्छायां कर्तव्यप्रतिपादन च ८०२

गर्भिणी भवत्विति इच्छाया कर्तव्यकथनम्, जायाजारा-
भिचारकर्मकथन च ... ८०३

रजस्वलानियमकथनम् ८०४

शुक्लत्वादिविशिष्टपुत्रेच्छायां कर्तव्यकथनम् . ८०५


पण्डितत्वादिविशिष्टदुहित्रिच्छाया कर्तव्यकथनम् .. ८०६

उक्तपुत्राद्यर्थक्रियासाधनीभूतौदनपाकादीना कालादिनि-
यमकथनम् ... ८०७

प्रसवकाले सुखप्रसवार्थोपायकथन जातकथन च .. ८१०
दधिमध्वादिप्राशन नामकरण च .. ८११
पुत्रस्य मात्रे प्रदानपूर्वक स्तनप्रयच्छनमन्त्रोपपादनं मात्र-
भिमन्त्रणमन्त्रोपपादन यथोक्तपुत्रसपन्नपितुः पुत्रस्य च
स्तुतिः .. ८१२

पञ्चमं ब्राह्मणम् ... ८१४--८१७

प्रतिपादितानामर्थाना स्तुत्यर्थ सर्वेषामपि काण्डानामाचा-
र्यपरम्परोपदेशः .. ८१४


श्रीमच्छंकरभगवत्पादविरचितम्
बृहदारण्यकोपनिषद्भाष्यम्
पञ्चमोऽध्यायः

पञ्चमोऽध्यायः ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते । ॐ खं ब्रह्म । खं पुराणं वायुरं खमिति ह स्माह कौरव्यायणीपुत्रो वेदोऽयं ब्राह्मणा विदुर्वेदैनेन यद्वेदितव्यम् ॥

इति प्रथमं ब्राह्मणम् ॥

पूर्णमद इत्यादि खिलकाण्डमारभ्यते । अध्यायचतुष्टयेन यदेव साक्षादपरोक्षाद्ब्रह्म, य आत्मा सर्वान्तरः निरुपाधिकः अशनायाद्यतीतः नेति नेतीति व्यपदेश्यः निर्धारितः, यद्विज्ञानं केवलममृतत्वसाधनम्—अधुना तस्यैव आत्मनः सोपाधिकस्य शब्दार्थादिव्यवहारविषयापन्नस्य पुरस्तादनुक्तानि उपासनानि कर्मभिरविरुद्धानि प्रकृष्टाभ्युदयसाधनानि क्रममुक्तिभाञ्जि च; तानि वक्तव्यानीति परः संदर्भः; सर्वोपासनशेषत्वेन ओंकारो दमं दानं दयाम् इत्येतानि च विधित्सितानि । पूर्णमदः— पूर्णम् न कुतश्चित् व्यावृत्तं व्यापीत्येतत्;

निष्ठा च कर्तरि द्रष्टव्या; अद इति परोक्षाभिधायि सर्वनाम, तत् परं ब्रह्मेत्यर्थः; तत् संपूर्णम् आकाशवद्व्यापि निरन्तरं निरुपाधिकं च; तदेव इदं सोपाधिकं नामरूपस्थं व्यवहारापन्नं पूर्णं स्वेन रूपेण परमात्मना व्याप्येव, न उपाधिपरिच्छिन्नेन विशेषात्मना; तदिदं विशेषापन्नं कार्यात्मकं ब्रह्म पूर्णात्कारणात्मनः उदच्यते उद्रिच्यते, उद्गच्छतीत्येतत्। यद्यपि कार्यात्मना उद्रिच्यते तथापि यत्स्वरूपं पूर्णत्वम् परमात्मभावं तन्न जहाति, पूर्णमेव उद्रिच्यते। पूर्णस्य कार्यात्मनो ब्रह्मणः, पूर्णं पूर्णत्वम्, आदाय गृहीत्वा आत्मस्वरूपैकरसत्वमापद्य विद्यया, अविद्याकृतं भूतमात्रोपाधिसंसर्गजम् अन्यत्वावभासं तिरस्कृत्य, पूर्णमेव अनन्तरमबाह्यं प्रज्ञानघनैकरसस्वभावं केवलं ब्रह्म अवशिष्यते। यदुक्तम्—'ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेत् तस्मात्तत्सर्वमभवत्' इति— एष अस्य मन्त्रस्यार्थः; तत्र 'ब्रह्म' इत्यस्यार्थः 'पूर्णमदः' इति, इदं पूर्णम् इति 'ब्रह्म वा इदमग्र आसीत्' इत्यस्यार्थः; तथा च श्रुत्यन्तरम्—'यदेवेह तदमुत्र यदमुत्र तदन्विह' इति; अतः अदःशब्दवाच्यं पूर्णं ब्रह्म, तदेव इदं पूर्णं कार्यस्थं नामरूपोपाधिसंयुक्तम् अविद्यया उद्रिक्तम् तस्मादेव परमार्थस्वरूपात् अन्य-

दिव प्रत्यवभासमानम्—तत्, यत् आत्मानमेव परं पूर्णं ब्रह्म विदित्वा— अहम् अदः पूर्णं ब्रह्मास्मि इत्येवम्, पूर्णमादाय, तिरस्कृत्य अपूर्णस्वरूपताम् अविद्याकृतां नामरूपोपाधिसंपर्कजाम् एतया ब्रह्मविद्यया पूर्णमेव केवलम् अवशिष्यते; तथा चोक्तम् 'तस्मात्तत्सर्वमभवत्' इति। यः सर्वोपनिषदर्थो ब्रह्म, स एषः अनेन मन्त्रेण अनूद्यते, उत्तरसंबन्धार्थम्। ब्रह्मविद्यासाधनत्वेन हि वक्ष्यमाणानि साधनानि ओंकारदमदानदयाख्यानि विधितिसतानि, खिलप्रकरणसंबन्धात् सर्वोपासनाङ्गभूतानि च ॥

अत्रैके वर्णयन्ति—पूर्णात् कारणात् पूर्णं कार्यम् उद्रिच्यते; उद्रिक्तं कार्यं वर्तमानकालेऽपि पूर्णमेव परमार्थवस्तुभूतं द्वैतरूपेण; पुनः प्रलयकाले पूर्णस्य कार्यस्य पूर्णताम् आदाय आत्मनि धित्वा पूर्णमेव अवशिष्यते कारणरूपम्; एवम् उत्पत्तिस्थितिप्रलयेषु त्रिष्वपि कालेषु कार्यकारणयोः पूर्णतैव; सा च एकैव पूर्णता कार्यकारणयोर्भेदेन व्यपदिश्यते; एवं च द्वैताद्वैतात्मकमेकं ब्रह्म। यथा किल समुद्रो जलतरङ्गफेनबुद्बुदाद्यात्मक एव, यथा च जलं सत्यं तदुद्भवाश्च तरङ्गफेनबुद्बुदादयः समुद्रात्मभूता एव आविर्भावतिरोभावधर्माणः परमार्थसत्या एव— एवं सर्वमिदं द्वैतं परमार्थसत्य-

मेव जलतरङ्गादिस्थानीयम्, समुद्रजलस्थानीयं तु परं ब्रह्म। एवं च किल द्वैतस्य सत्यत्वे कर्मकाण्डस्य प्रामाण्यम्, यदा पुनर्द्वैतं द्वैतमिवाविद्याकृतं मृगतृष्णिकावदनृतम्, अद्वैतमेव परमार्थतः, तदा किल कर्मकाण्डं विषयाभावात् अप्रमाणं भवति; तथा च विरोध एव स्यात्। वेदैकदेशभूता उपनिषत् प्रमाणम्, परमार्थाद्वैतवस्तुप्रतिपादकत्वात्; अप्रमाणं कर्मकाण्डम्, असद्वैतविषयत्वात्। तद्विरोधपरिजिहीर्षया श्रुत्या एतदुक्तं कार्यकारणयोः सत्यत्वं समुद्रवत् 'पूर्णमदः' इत्यादिना इति। तदसत्, विशिष्टविषयापवादविकल्पयोरसंभवात्। न हि इयं सुविवक्षिता कल्पना। कस्मात्? यथा क्रियाविषये उत्सर्गप्राप्तस्य एकदेशे अपवादः क्रियते, यथा 'अहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्यः' इति हिंसा सर्वभूतविषया उत्सर्गेण निवारिता तीर्थे विशिष्टविषये ज्योतिष्टोमादावनुज्ञायते, न च तथा वस्तुविषये इह अद्वैतं ब्रह्म उत्सर्गेण प्रतिपाद्य पुनः तदेकदेशे अपवदितुं शक्यते, ब्रह्मणः अद्वैतत्वादेव एकदेशानुपपत्तेः। तथा विकल्पानुपपत्तेश्च; यथा 'अतिरात्रे षोडशिनं गृह्णाति' 'नातिरात्रे षोडशिनं गृह्णाति' इति ग्रहणाग्रहणयो. पुरुषाधीनत्वात् विकल्पो भवति; न त्विह तथा वस्तुविषये द्वैतं वा स्यात् अद्वैतं वेति विक-

ल्पः संभवति, अपुरुषतन्त्रत्वादात्मवस्तुनः, विरोधाच्च द्वैताद्वैतत्वयोरेकस्य। तस्मात् न सुविवक्षिता इयं कल्पना। श्रुतिन्यायविरोधाच्च। सैन्धवघनवत् प्रज्ञानैकरसघनं निरन्तरं पूर्वापरबाह्याभ्यन्तरभेदविवर्जितं सबाह्याभ्यन्तरम् अजं नेति नेति अस्थूलमनण्वह्रस्वमजरमभयममृतम्— इत्येवमाद्याः श्रुतयः निश्चितार्थाः संशयविपर्यासाशङ्कारहिताः सर्वाः समुद्रे प्रक्षिप्ताः स्युः, अकिंचित्करत्वात्। तथा न्यायविरोधोऽपि, सावयवस्यानेकात्मकस्य क्रियावतो नित्यत्वानुपपत्तेः; नित्यत्वं च आत्मनः स्मृत्यादिदर्शनात् अनुमीयते; तद्विरोधश्च प्राप्नोति अनित्यत्वे; भवत्कल्पनानर्थक्यं च; स्फुटमेव च अस्मिन्पक्षे कर्मकाण्डानर्थक्यम्, अकृताभ्यागमकृतविप्रणाशप्रसङ्गात्। ननु ब्रह्मणो द्वैताद्वैतात्मकत्वे समुद्रादिदृष्टान्ता विद्यन्ते; कथमुच्यते भवता एकस्य द्वैताद्वैतत्वं विरुद्धमिति? न, अन्यविषयत्वात्; निरवयवववस्तुविषयं हि विरुद्धत्वम् अवोचाम द्वैताद्वैतत्वस्य, न कार्यविषये सावयवे। तस्मात् श्रुतिस्मृतिन्यायविरोधात् अनुपपन्नेयं कल्पना। अस्याः कल्पनायाः वरम् उपनिषत्परित्याग एव। अध्येयत्वाच्च न शास्त्रार्था इयं कल्पना; न हि जननमरणाद्यनर्थशतसहस्रभेदसमाकुलं समुद्रवनादि-

वत् सावयवम् अनेकरसं ब्रह्म ध्येयत्वेन विज्ञेयत्वेन वा श्रुत्या उपदिश्यते; प्रज्ञानघनतां च उपदिशति; 'एकधैवानुद्रष्टव्यम्' इति च; अनेकधादर्शनापवादाच्च 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति; यच्च श्रुत्या निन्दितम्, तन्न कर्तव्यम्; यच्च न क्रियते, न स शास्त्रार्थः; ब्रह्मणोऽनेकरसत्वम् अनेकधात्वं च द्वैतरूपं निन्दितत्वात् न द्रष्टव्यम्; अतो न शास्त्रार्थः; यत्तु एकरसत्वं ब्रह्मणः तत् द्रष्टव्यत्वात् प्रशस्तम्, प्रशस्तत्वाच्च शास्त्रार्थो भवितुमर्हति। यत्तूक्तं वेदैकदेशस्य अप्रामाण्यं कर्मविषये द्वैताभावात्, अद्वैते च प्रामाण्यमिति– तन्न, यथाप्राप्तोपदेशार्थत्वात्; न हि द्वैतम् अद्वैतं वा वस्तु जातमात्रमेव पुरुषं ज्ञापयित्वा पश्चात्कर्म वा ब्रह्मविद्यां वा उपदिशति शास्त्रम्; न च उपदेशार्हं द्वैतम्, जातमात्रप्राणिबुद्धिगम्यत्वात्; न च द्वैतस्य अनृतत्वबुद्धिः प्रथममेव कस्यचित् स्यात्, येन द्वैतस्य सत्यत्वमुपदिश्य पश्चात् आत्मनः प्रामाण्यं प्रतिपादयेत् शास्त्रम्। नापि पाषण्डिभिरपि प्रस्थापिताः शास्त्रस्य प्रामाण्यं न गृह्णीयुः। तस्मात् यथाप्राप्तमेव द्वैतम् अविद्याकृतं स्वाभाविकम् उपादाय स्वाभाविक्यैव अविद्यया युक्ताय रागद्वेषादिदोषवते यथाभिमतपुरुषार्थसाधनं कर्म उपदिश-

त्यग्रे, पश्चात् प्रसिद्धक्रियाकारकफलस्वरूपदोषदर्शनवते तद्विपरीतौदासीन्यस्वरूपावस्थानफलार्थिने तदुपायभूताम् आत्मैकत्वदर्शनात्मिकां ब्रह्मविद्याम् उपदिशति । अथैवं सति तदौदासीन्यस्वरूपावस्थाने फले प्राप्ते शास्त्रस्य प्रामाण्यं प्रति अर्थित्वं निवर्तते; तदभावात् शास्त्रस्यापि शास्त्रत्वं तं प्रति निवर्तत एव । तथा प्रतिपुरुषं परिसमाप्तं शास्त्रम् इति न शास्त्रविरोधगन्धोऽपि अस्ति, अद्वैतज्ञानावसानत्वात् शास्त्रशिष्यशासनादिद्वैतभेदस्य; अन्यतमावस्थाने हि विरोधः स्यात् अवस्थितस्य, इतरेतरापेक्षत्वात्तु शास्त्रशिष्यशासनानां नान्यतमोऽपि अवतिष्ठते; सर्वसमाप्तौ तु कस्य विरोध आशङ्क्येत अद्वैते केवले शिवे सिद्धे; नाप्यविरोधता, अत एव । अथापि अभ्युपगम्य ब्रूमः— द्वैताद्वैतात्मकत्वेऽपि शास्त्रविरोधस्य तुल्यत्वात्; यद्यपि समुद्रादिवत् द्वैताद्वैतात्मकमेकं ब्रह्म अभ्युपगच्छामः नान्यद्वस्त्वन्तरम्, तदापि भवदुक्तात् शास्त्रविरोधात् न मुच्यामहे; कथम्? एकं हि परं ब्रह्म द्वैताद्वैतात्मकम्; तत् शोकमोहाद्यतीतत्वात् उपदेशं न काङ्क्षति; न च उपदेष्टा अन्यः ब्रह्मणः; द्वैताद्वैतरूपस्य ब्रह्मणः एकस्यैव अभ्युपगमात् । अथ द्वैतविषयस्य अनेकत्वात् अन्योन्योपदेशः, न ब्रह्मविषय उपदेश इति चेत्— तदा द्वैताद्वैतात्मकम् एकमेव

ब्रह्म, नान्यदस्ति इति विरुध्यते। यस्मिन्द्वैतविषये अन्योन्योपदेशः, सः अन्यः द्वैतं च अन्यदेव इति समुद्रदृष्टान्तो विरुद्धः। न च समुद्रोदकैकत्ववत् विज्ञानैकत्वे ब्रह्मणः अन्यत्र उपदेशग्रहणादिकल्पना संभवति; न हि हस्तादिद्वैताद्वैतात्मके देवदत्ते वाक्कर्णयोः देवदत्तैकदेशभूतयोः वाक् उपदेष्ट्री कर्णः केवल उपदेशस्य ग्रहीता, देवदत्तस्तु न उपदेष्टा नाप्युपदेशस्य ग्रहीता— इति कल्पयितुं शक्यते, समुद्रैकोदकात्मत्ववत् एकविज्ञानवत्त्वात् देवदत्तस्य। तस्मात् श्रुतिन्यायविरोधश्च अभिप्रेतार्थासिद्धिश्च एवंकल्पनायां स्यात्। तस्मात् यथाव्याख्यात एव अस्माभिः पूर्णमदः इत्यस्य मन्त्रस्य अर्थः॥

ॐ खं ब्रह्म इति मन्त्रः, अयं च अन्यत्र अविनियुक्तः इह ब्राह्मणेन ध्यानकर्मणि विनियुज्यते। अत्र च ब्रह्मेति विशेष्याभिधानम्, खमिति विशेषणम्। विशेषणविशेष्ययोश्च सामानाधिकरण्येन निर्देशः नीलोत्पलवत्— खं ब्रह्मेति ब्रह्मशब्दो बृहद्वस्तुमात्रास्पदः अविशेषितः, अतः विशेष्यते— खं ब्रह्मेति; यत्तत् खं ब्रह्म, तत् ओंशब्दवाच्यम्, ओंशब्दस्वरूपमेव वा; उभयथापि सामानाधिकरण्यम् अविरुद्धम्। इह च ब्रह्मोपासनसाधनत्वार्थम् ओंशब्दः प्रयुक्तः, तथा


च श्रुत्यन्तरात् 'एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्' 'ओमित्यात्मानं युञ्जीत' 'ओमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत' ओमित्येवं ध्यायथ आत्मानम्' इत्यादेः। अन्यार्थासंभवाच्च उपदेशस्य। यथा अन्यत्र 'ओमिति शंसति' 'ओमित्युद्गायति' इत्येवमादौ स्वाध्यायारम्भापवर्गयोश्च ओंकारप्रयोगः विनियोगादवगम्यते, न च तथा अर्थान्तरम् इह अवगम्यते। तस्मात् ध्यानसाधनत्वेनैव इह ओंकारशब्दस्य उपदेशः। यद्यपि ब्रह्मात्मादिशब्दा ब्रह्मणो वाचकाः, तथापि श्रुतिप्रामाण्यात् ब्रह्मणो नेदिष्ठमभिधानम् ओंकारः। अत एव ब्रह्मप्रतिपत्तौ इदं परं साधनम्। तच्च द्विप्रकारेण, प्रतीकत्वेन अभिधानत्वेन च। प्रतीकत्वेन— यथा विष्ण्वादिप्रतिमा अभेदेन, एवम् ओंकारः ब्रह्मेति प्रतिपत्तव्यः। तथा ह्योंकारालम्बनस्य ब्रह्म प्रसीदति, 'एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्। एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते' इति श्रुतेः॥

तत्र खमिति भौतिके खे प्रतीतिर्मा भूत् इत्याह— खं पुराणं चिरंतनं खं परमात्माकाशमित्यर्थः। यत्तत्परमात्माकाशं पुराणं खम्, तत् चक्षुराद्यविषयत्वात् निरालम्बनम् अशक्यं ग्रहीतुमिति श्रद्धाभक्तिभ्यां भावविशेषेण च ओंकारे

आवेशयति— यथा विष्णवङ्काङ्कितायां शिलादिप्रतिमायां विष्णुं लोकः, एवम् । वायुरं खम्, वायुः अस्मिन्विद्यत इति वायुरम्, खं खमात्रं खमित्युच्यते, न पुराणं खम्— इत्येवम् आह स्म । कोऽसौ ? कौरव्यायणीपुत्रः । वायुरे हि खे मुख्यः खशब्दव्यवहारः; तस्मान्मुख्ये संप्रत्ययो युक्त इति मन्यते । तत्र यदि पुराणं खं ब्रह्म निरुपाधिस्वरूपम्, यदि वा वायुरं खं सोपाधिकं ब्रह्म, सर्वथापि ओंकारः प्रतीकत्वेनैव प्रतिमावत् साधनत्वं प्रतिपद्यते, 'एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः' इति श्रुत्यन्तरात् । केवलं खशब्दार्थे विप्रतिपत्तिः । वेदोऽयम् ओंकारः, वेद विजानाति अनेन यद्वेदितव्यम् तस्माद्वेदः ॐकारः वाचकः अभिधानम्, तेनाभिधानेन यद्वेदितव्यं ब्रह्म प्रकाश्यमानम् अभिधीयमानं वेद साधको विजानाति उपलभते, तस्मात् वेदोऽयमिति ब्राह्मणा विदुः, तस्मात् ब्राह्मणानामभिधानत्वेन साधनत्वमभिप्रेतम् ओंकारस्य । अथवा वेदोऽयमित्यादि अर्थवादः; कथम् ओंकारः ब्रह्मणः प्रतीकत्वेन विहितः; ॐ खं ब्रह्म इति सामानाधिकरण्यात् तस्य स्तुतिः इदानीं वेदत्वेन; सर्वो हि अयं वेद ॐकार एव; एतत्प्रभवः एतदात्मकः सर्वः ऋग्यजुःसामादिभेदभिन्नः एष ओंकारः, 'तद्यथा शङ्कुना

सर्वाणि पर्णानि' इत्यादिश्रुत्यन्तरात्; इतश्चायं वेदः ओँकारः, यद्वेदितव्यम्, तत्सर्वं वेदितव्यम् ओंकारेणैव वेद एनेन; अतः अयमोंकारो वेदः; इतरस्यापि वेदस्य वेदत्वम् अत एव; तस्मात् विशिष्टोऽयमोंकारः साधनत्वेन प्रतिपत्तव्य इति। अथवा वेदः सः, कोऽसौ? यं ब्राह्मणा विदु. ओंकारम्; ब्राह्मणानां हि असौ प्रणवोद्गीथादिविकल्पैर्विज्ञेयः; तस्मिन्हि प्रयुज्यमाने साधनत्वेन सर्वो वेदः प्रयुक्तो भवतीति॥

इति पञ्चमाध्यायस्य प्रथमं ब्राह्मणम्॥



द्वितीयं ब्राह्मणम् ॥



त्रयाः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुर्देवा मनुष्या असुरा उषित्वा ब्रह्मचर्यं देवा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदक्षरमुवाच द इति व्यज्ञासिष्टाऽ इति व्यज्ञासिष्मेति होचुर्दाम्यतेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥

अधुना दमादिसाधनत्रयविधानार्थोऽयमारम्भः—त्रयाः, त्रिसंख्याकाः प्राजापत्याः प्रजापतेरपत्यानि प्राजापत्याः, ते किम्? प्रजापतौ पितरि ब्रह्मचर्यं शिष्यत्ववृत्तेर्ब्रह्मचर्यस्य प्राधान्यात् शिष्याः सन्तो ब्रह्मचर्यम् ऊषुः उषितवन्त इत्यर्थः। के ते? विशेषतः देवा मनुष्या असुराश्च। ते च उषित्वा ब्रह्मचर्यं किमकुर्वन्नित्युच्यते— तेषां देवा ऊचुः पितरं प्रजापतिम्। किमिति? ब्रवीतु कथयतु, नः अस्मभ्यम् यदनुशासनं भवानिति। तेभ्यः एवमर्थिभ्यः ह एत-

दक्षरं वर्णमात्रम् उवाच– द इति । उक्त्वा च तान् पप्रच्छ पिता– किं व्यज्ञासिष्टा३ इति, मया उपदेशार्थमभिहितस्याक्षरस्य अर्थं विज्ञातवन्तः आहोस्विन्नेति । देवा ऊचुः– व्यज्ञासिष्मेति, विज्ञातवन्तो वयम् । यद्येवम्, उच्यतां किं मयोक्तमिति । देवा ऊचुः– दाम्यत, अदान्ता यूयं स्वभावतः अतो दान्ता भवतेति नः अस्मान् आत्थ कथयसि । इतर आह– ओमिति सम्यग्व्यज्ञासिष्टेति ॥

अथ हैनं मनुष्या ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दत्तेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥ २ ॥

समानमन्यत् । स्वभावतो लुब्धा यूयम्, अतो यथाशक्ति संविभजत दत्तेति नः अस्मान् आत्थ, किमन्यद्ब्रूयात् नो हितमिति मनुष्याः ॥

अथ हैनमसुरा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति हो-

चुर्दयध्वमिति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्द द द इति दाम्यत दत्त दयध्वमिति तदेतत्त्रयꣳ शिक्षेद्दमं दानं दयामिति ॥ ३ ॥

इति द्वितीयं ब्राह्मणम् ॥

तथा असुराः दयध्वमिति; क्रूरा यूयं हिंसादिपराः, अतो दयध्वं प्राणिषु दयां कुरुतेति । तदेतत्प्रजापतेरनुशासनम् अद्याप्यनुवर्तत एव । यः पूर्वं प्रजापतिर्देवादीननुशशास सोऽद्यापि अनुशास्त्येव दैव्या स्तनयित्नुलक्षणया वाचा । कथमेषा श्रूयते दैवी वाक्? कासौ स्तनयित्नुः? द द द इति, दाम्यत दत्त दयध्वमिति— एषां वाक्यानामुपलक्षणाय त्रिर्दकार उच्चार्यते अनुकृतिः, न तु स्तनयित्नुशब्दः त्रिरेव, संख्यानियमस्य लोके अप्रसिद्धत्वात् । यस्मात् अद्यापि प्रजापतिः दाम्यत दत्त दयध्वमित्यनुशास्त्येव, तस्मात्कारणात् एतत्त्रयम्; किं तत् त्रयमित्युच्यते— दमं दानं दयामिति शिक्षेत् उपादद्यात् प्रजापतेरनुशासनमस्माभिः कर्तव्यमित्येवं मतिं कुर्यात् । तथा च स्मृतिः—'त्रिविधं नरकस्येदं

द्वारं नाशनमात्मनः। कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्' इति। अस्य हि विधेः शेषः पूर्वः। तथापि देवादीनुद्दिश्य किमर्थं दकारत्रयमुच्चारितवान् प्रजापतिः पृथगनुशासनार्थिभ्यः; ते वा कथं विवेकेन प्रतिपन्नाः प्रजापतेर्मनोगतं समानेनैव दकारवर्णमात्रेणेति पराभिप्रायज्ञा विकल्पयन्ति। अत्रैके आहुः— अदान्तत्वादातृत्वादयालुत्वैः अपराधित्वमात्मनो मन्यमानाः शङ्किता एव प्रजापतावूषुः, किं नो वक्ष्यतीति; तेषां च दकारश्रवणमात्रादेव आत्माशङ्कावशेन तदर्थप्रतिपत्तिरभूत्; लोकेऽपि हि प्रसिद्धम्—पुत्राः शिष्याश्चानुशास्याः सन्तो दोषान् निवर्तयितव्या इति; अतो युक्तं प्रजापतेर्दकारमात्रोच्चारणम्; दमादित्रये च दकारान्वयात् आत्मनो दोषानुरूप्येण देवादीनां विवेकेन प्रतिपत्तुं चेति; फलं तु एतत् आत्मदोषज्ञाने सति दोषात् निवर्तयितुं शक्यते अल्पेनाप्युपदेशेन, यथा देवादयो दकारमात्रेणेति। ननु एतत् त्रयाणां देवादीनामनुशासनं देवादिभिरपि एकैकमेव उपादेयम्, अद्यत्वेऽपि न तु त्रयं मनुष्यैः शिक्षितव्यमिति। अत्रोच्यते— पूर्वैर्देवादिभिर्विशिष्टैरनुष्ठितम् एतत्त्रयम्, तस्मात् मनुष्यैरेव शिक्षितव्यमिति। तत्र दयालुत्वस्यानानुष्ठेयत्वं स्यात्, कथम्? असुरैरप्रशस्तैरनुष्ठितत्वादिति

चेत्– न, तुल्यत्वात् त्रयाणाम्; अतः अन्योऽत्राभिप्रायः– प्रजापतेः पुत्रा देवादयस्त्रयः; पुत्रेभ्यश्च हितमेव पित्रा उपदेष्टव्यम्; प्रजापतिश्च हितज्ञः नान्यथा उपदिशति; तस्मात् पुत्रानुशासनं प्रजापतेः परमम् एतत् हितम्; अतो मनुष्यैरेव एतत् त्रयं शिक्षितव्यमिति। अथवा न देवाः असुरा वा अन्ये केचन विद्यन्ते मनुष्येभ्यः; मनुष्याणामेव अदान्ताः ये अन्यैरुत्तमैर्गुणैः संपन्नाः; ते देवाः; लोभप्रधाना मनुष्याः; तथा हिंसापराः क्रूरा असुराः; ते एव मनुष्याः अदान्तत्वादिदोषत्रयमपेक्ष्य देवादिशब्दभाजो भवन्ति, इतरांश्च गुणान् सत्त्वरजस्तमांसि अपेक्ष्य; अतः मनुष्यैरेव शिक्षितव्यम् एतत्त्रयमिति, तदपेक्षयैव प्रजापतिनोपदिष्टत्वात्; तथा हि मनुष्या अदान्ता लुब्धाः क्रूराश्च दृश्यन्ते; तथा च स्मृतिः–'कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्' इति॥

इति पञ्चमाध्यायस्य द्वितीयं ब्राह्मणम्॥



तृतीयं ब्राह्मणम् ॥

दमादिसाधनत्रयं सर्वोपासनशेषं विहितम्; दान्तः अलुब्धः दयालुः सन् सर्वोपासनेष्वधिक्रियते। तत्र निरुपाधिकस्य ब्रह्मणो दर्शनम् अतिक्रान्तम्, अथ अधुना सोपाधिकस्य तस्यैव अभ्युदयफलानि वक्तव्यानीत्येवमर्थोऽयमारम्भः—

एष प्रजापतिर्यद्धृदयमेतद्ब्रह्मैतत्सर्वं तदेतत्त्र्यक्षरꣳ हृदयमिति हृ इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद द इत्येकमक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेद यमित्येकमक्षरमेति स्वर्गं लोकं य एवं वेद ॥ १ ॥

एष प्रजापतिः यद्धृदयं प्रजापतिः अनुशास्तीत्यनन्तरमेवाभिहितम्। कः पुनरसौ अनुशास्ता प्रजापतिरित्युच्यते—एष प्रजापतिः; कोऽसौ? यद्धृदयम्, हृदयमिति हृदयस्था बुद्धिरुच्यते; यस्मिन् शाकल्यब्राह्मणान्ते नामरूपकर्मणामुपसंहार उक्तो दिग्विभागद्वारेण, तदेतत् सर्वभूतप्रतिष्ठं सर्वभूतात्मभूतं हृदयं प्रजापतिः प्रजानां स्रष्टा; एतत् ब्रह्म, बृहत्त्वात् सर्वात्मत्वाच्च ब्रह्म; एतत्सर्वम्; उक्तं पञ्चमाध्याये हृदयस्य सर्वत्वम्; तत्सर्वं यस्मात् तस्मादुपास्यं हृदयं ब्रह्म।

तत्र हृदयनाम्नाक्षरविषयमेव तावत् उपासनमुच्यते ; तदेतत् हृदयमिति नाम त्र्यक्षरम् , त्रीणि अक्षराणि अस्येति त्र्यक्षरम् ; कानि पुनस्तानि त्रीण्यक्षराण्युच्यन्ते ; हृ इत्येकमक्षरम् ; अभिहरन्ति, हृतेराहृतिकर्मणः हृ इत्येतद्रूपमिति यो वेद, यस्मात् हृदयाय ब्रह्मणे स्वाश्च इन्द्रियाणि अन्ये च विषयाः शब्दादयः स्वं स्वं कार्यमभिहरन्ति, हृदयं च भोक्त्रर्थमभिहरति— अतः हृदयनाम्नः हृ इत्येतदक्षरमिति यो वेद— अस्मै विदुषे अभिहरन्ति स्वाश्च ज्ञातयः अन्ये चासंबद्धाः, बलिमिति वाक्यशेषः । विज्ञानानुरूप्येण एतत्फलम् । तथा द इत्येतदप्येकमक्षरम् ; एतदपि दानार्थस्य ददातेः द इत्येतद्रूपं हृदयनामाक्षरत्वेन निबद्धम् । अत्रापि— हृदयाय ब्रह्मणे स्वाश्च करणानि अन्ये च विषयाः स्वं स्वं वीर्यं ददति, हृदयं भोक्त्रे ददाति स्वं वीर्यम् , अतो दकार इत्येवं यो वेद, अस्मै ददति स्वाश्च अन्ये च । तथा यमित्येतदप्येकमक्षरम् ; इणो गत्यर्थस्य यमित्येतद्रूपम् अस्मिन्नाम्नि निबद्धमिति यो वेद, स स्वर्गं लोकमेति । एवं नामाक्षरादपि ईदृशं विशिष्टं फलं प्राप्नोति, किमु वक्तव्यं हृदयस्वरूपोपासनात्—इति हृदयस्तुतये नामाक्षरोपन्यासः ॥

इति पञ्चमाध्यायस्य तृतीयं ब्राह्मणम्

चतुर्थं ब्राह्मणम् ॥



तद्वै तदेतदेव तदास सत्यमेव स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमाँल्लोकाञ्जित इन्नवसावसद्य एवमेतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति सत्यꣳ ह्येव ब्रह्म ॥ १ ॥

इति चतुर्थं ब्राह्मणम् ॥

तस्यैव हृदयाख्यस्य ब्रह्मणः सत्यमित्युपासनं विधित्सन्नाह— तत्, तदिति हृदयं ब्रह्म परामृष्टम्; वै इति स्मरणार्थम्; तत् यत् हृदयं ब्रह्म स्मर्यत इत्येकः तच्छब्दः; तदेतदुच्यते प्रकारान्तरेणेति द्वितीयः तच्छब्दः । किं पुनः तत्प्रकारान्तरम्? एतदेव तदिति एतच्छब्देन संबध्यते तृतीयस्तच्छब्दः; एतदिति वक्ष्यमाणं बुद्धौ संनिधीकृत्य आह; आस बभूव; किं पुनः एतदेव आस? यदुक्तं हृदयं ब्रह्मेति, तत् इति, तृतीयः तच्छब्दो विनियुक्तः । किं तदिति विशेषतो निर्दिशति; सत्यमेव, सच्च त्यच्च मूर्तं

चामूर्तं च सत्यं ब्रह्म, पञ्चभूतात्मकमित्येतत् । स यः कश्चित् सत्यात्मानम् एतम्, महत् महत्त्वात्, यक्षं पूज्यम्, प्रथमजं प्रथमजातम्, सर्वस्मात्संसारिण एतदेवाग्रे जातं ब्रह्म अतः प्रथमजम्, वेद विजानाति सत्यं ब्रह्मेति; तस्येदं फलमुच्यते— यथा सत्येन ब्रह्मणा इमे लोका आत्मसात्कृता जिताः, एवं सत्यात्मानं ब्रह्म महद्यक्षं प्रथमजं वेद, स जयति इमान् लोकान्; किं च जितो वशीकृतः, इन्नु इत्थम्, यथा ब्रह्मणा असौ शत्रुरिति वाक्यशेषः । असच्च असद्भवेत् असौ शत्रुः जितो भवेदित्यर्थः । कस्य एतत्फलमिति पुनर्निगमयति— य एवमेतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति । अतो विद्यानुरूपं फलं युक्तम्, सत्यं ह्येव यस्माद्ब्रह्म ॥

इति पञ्चमाध्यायस्य चतुर्थं ब्राह्मणम् ॥



पञ्चमं ब्राह्मणम् ॥

—*—

आप एवेदमग्र आसुस्ता आपः सत्य-
मसृजन्त सत्यं ब्रह्म ब्रह्म प्रजापतिं प्रजा-
पतिर्देवाꣳस्ते देवाः सत्यमेवोपासते तदे-
तत्त्र्यक्षरꣳ सत्यमिति स इत्येकमक्षरं
तीत्येकमक्षरं यमित्येकमक्षरं प्रथमोत्तमे
अक्षरे सत्यं मध्यतोऽनृतं तदेतदनृतमु-
भयतः सत्येन परिगृहीतꣳ सत्यभूयमेव
भवति नैवं विद्वाꣳसमनृतꣳ हिनस्ति ॥

सत्यस्य ब्रह्मणः स्तुत्यर्थमिदमाह । महद्यक्षं प्रथमजमित्युक्तम्, तत्कथं प्रथमजत्वमित्युच्यते— आप एवेदमग्र आसुः; आप इति कर्मसमवायिन्यः अग्निहोत्राद्याहुतयः; अग्निहोत्राद्याहुतेः द्रवात्मकत्वात् अप्त्वम्, ताश्च आपः अग्निहोत्रादिकर्मापवर्गोत्तरकालं केनचिददृष्टेन सूक्ष्मेण आत्मना कर्मसमवायित्वमपरित्यजन्त्यः इतरभूतसहिता एव न केवलाः, कर्मसमवायित्वात्तु प्राधान्यमपाम्— इति सर्वाण्येव

भूतानि प्रागुत्पत्तेः अव्याकृतावस्थानि कर्तृसहितानि निर्दिश्यन्ते 'आपः' इति; ता आपः बीजभूता जगतः अव्याकृतात्मना अवस्थिताः; ता एव इदं सर्वं नामरूपविकृतं जगत् अग्रे आसुः, नान्यत्किंचिद्विकारजातमासीत्; ताः पुनः आपः सत्यमसृजन्त; तस्मात्सत्यं ब्रह्म प्रथमजम्; तदेतत् हिरण्यगर्भस्य सूत्रात्मनो जन्म, यदव्याकृतस्य जगतो व्याकरणम्, तत् सत्यं ब्रह्म कुतः? महत्त्वात्; कथं महत्त्वमित्याह— यस्मात् सर्वस्य स्रष्टृ; कथम? यत्सत्यं ब्रह्म, तत् प्रजापतिं प्रजानां पतिं विराजं सूर्यादिकरणम् असृजतेत्यनुषङ्गः; प्रजापतिः देवान्, स विराट् प्रजापतिः देवानसृजत; यस्मात् सर्वमेवं क्रमेण सत्याद्ब्रह्मणो जातम्, तस्मान्महत्सत्यं ब्रह्म। कथं पुनर्यक्षमित्युच्यते—ते एवं सृष्टा देवाः पितरमपि विराजमतीत्य, तदेव सत्यं ब्रह्म उपासते; अत एतत् प्रथमजं महत् यक्षम्; तस्मात् सर्वात्मना उपास्यं तत्; तस्यापि सत्यस्य ब्रह्मणो नाम सत्यमिति; तदेतत् त्र्यक्षरम्; कानि तान्यक्षराणीत्याह— स इत्येकमक्षरम्; तीत्येकमक्षरम्, तीति ईकारानुबन्धो निर्देशार्थः; यमित्येकमक्षरम्; तत्र तेषां प्रथमोत्तमे अक्षरे सकारयकारौ सत्यम्, मृत्युरूपाभावात्; मध्यतः मध्ये अनृतम्; अनृतं हि मृत्युः, मृत्यवनृ-

तयोः तकारसामान्यात् । तदेतत् अनृतं तकाराक्षरं मृत्युरूपम् उभयतः सत्येन सकारयकारलक्षणेन परिगृहीतं व्याप्तम् अन्तर्भावितं सत्यरूपाभ्याम्, अतः अकिंचित्करं तत्, सत्यभूयमेव सत्यबाहुल्यमेव भवति; एवं सत्यबाहुल्यं सर्वस्य मृत्योरनृतस्य अकिंचित्करत्वं च यो विद्वान्, तमेवं विद्वांसम् अनृतं कदाचित् प्रमादोक्तं न हिनस्ति ॥

तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषस्तावेतावन्योन्यस्मिन्प्रतिष्ठितौ रश्मिभिरेषोऽस्मिन्प्रतिष्ठितः प्राणैरयमुष्मिन्स यदोत्क्रमिष्यन्भवति शुद्धमेवैतन्मण्डलं पश्यति नैनमेते रश्मयः प्रत्यायन्ति ॥ २ ॥

अस्याधुना सत्यस्य ब्रह्मणः संस्थानविशेषे उपासनमुच्यते— तद्यत्; किं तत्? सत्यं ब्रह्म प्रथमजम्; किम्? असौ सः; कोऽसौ? आदित्यः, कः पुनरसावादित्यः? य एषः; क एषः? यः एतस्मिन् आदित्यमण्डले पुरुषः अभिमानी, सोऽसौ सत्यं ब्रह्म । यश्चायम् अध्यात्मम् योऽयं दक्षिणे-

ऽक्षन् अक्षणि पुरुषः ; च-शब्दात् स च सत्यं ब्रह्मेति संबन्धः। तावेतौ आदित्याक्षिस्थौ पुरुषौ एकस्य सत्यस्य ब्रह्मणः संस्थानविशेषौ यस्मात्, तस्मात् अन्योन्यस्मिन् इतरेतरस्मिन् आदित्यश्चाक्षुषे चाक्षुषश्च आदित्ये प्रतिष्ठितौ, अध्यात्माधिदैवतयोः अन्योन्योपकार्योपकारकत्वात्; कथं प्रतिष्ठितावित्युच्यते— रश्मिभिः प्रकाशेन अनुग्रहं कुर्वन् एष आदित्यः अस्मिंश्चाक्षुषे अध्यात्मे प्रतिष्ठितः, अयं च चाक्षुषः प्राणैरादित्यमनुगृह्णन् अमुष्मिन् आदित्ये अधिदैवे प्रतिष्ठितः ; सः अस्मिन् शरीरे विज्ञानमयो भोक्ता यदा यस्मिन्काले उत्क्रमिष्यन्भवति, तदा असौ चाक्षुष आदित्यपुरुषः रश्मीनुपसंहृत्य केवलेन औदासीन्येन रूपेण व्यवतिष्ठते ; तदा अयं विज्ञानमयः पश्यति शुद्धमेव केवलं विरश्मि एतन्मण्डलं चन्द्रमण्डलमिव , तदेतत् अरिष्टदर्शनम् प्रासङ्गिकं प्रदर्श्यते, कथं नाम पुरुषः करणीये यत्नवान्स्यादिति ; न—एनं चाक्षुषं पुरुषमुररीकृत्य तं प्रत्यनुग्रहाय एते रश्मयः स्वाभिकर्तव्यवशात्पूर्वमागच्छन्तोऽपि, पुनः तत्कर्मक्षयमनुरुध्यमाना इव नोपयन्ति न प्रत्यागच्छन्ति एनम् । अतोऽवगम्यते परस्परोपकार्योपकारकभावात् सत्यस्यैव एकस्य आत्मनः अंशौ एताविति ॥

य एष एतस्मिन्मण्डले पुरुषस्तस्य भूरिति शिर एकꣳ शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहरिति हन्ति पाप्मानं जहाति च य एवं वेद ॥ ३ ॥

तत्र यः, असौ कः? यः एषः एतस्मिन्मण्डले पुरुषः सत्यनामा; तस्य व्याहृतयः अवयवाः; कथम्? भूरिति येयं व्याहृतिः, सा तस्य शिरः, प्राथम्यात्; तत्र सामान्यं स्वयमेवाह श्रुतिः— एकम् एकसंख्यायुक्तं शिरः, तथा एतत् अक्षरम् एकं भूरिति। भुव इति बाहू, द्वित्वसामान्यात्; द्वौ बाहू, द्वे एते अक्षरे। तथा स्वरिति प्रतिष्ठा; द्वे प्रतिष्ठे द्वे एते अक्षरे; प्रतिष्ठे पादौ प्रतितिष्ठत्याभ्यामिति। तस्यास्य व्याहृत्यवयवस्य सत्यस्य ब्रह्मण उपनिषत् रहस्यम् अभिधानम्, येनाभिधानेन अभिधीयमानं तद्ब्रह्म अभिमुखी भवति लोकवत्; कासावित्याह— अहरिति; अहरिति चैतत् रूपं हन्तेर्जहातेश्चेति यो वेद, स हन्ति जहाति च पाप्मानं य एवं वेद ॥

योऽयं दक्षिणेऽक्षन्पुरुषस्तस्य भूरिति शिर एकꣳ शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहमिति हन्ति पाप्मानं जहाति च य एवं वेद ॥ ४ ॥

इति पञ्चमं ब्राह्मणम् ॥

एवं योऽयं दक्षिणेऽक्षन्पुरुषः, तस्य भूरिति शिर इत्यादि सर्वं समानम् । तस्योपनिषत्– अहमिति, प्रत्यगात्मभूतत्वात् । पूर्ववत् हन्तेः जहातेश्चेति ॥

इति पञ्चमाध्यायस्य पञ्चमं ब्राह्मणम् ॥



षष्ठं ब्राह्मणम् ॥

उपाधीनामनेकत्वादनेकविशेषणत्वाच्च तस्यैव प्रकृतस्य ब्रह्मणो मनउपाधिविशिष्टस्योपासनं विधित्सन्नाह—

मनोमयोऽयं पुरुषो भाः सत्यस्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किं च ॥ १ ॥

मनोमयः मनःप्रायः, मनसि उपलभ्यमानत्वात्; मनसा चोपलभत इति मनोमयोऽयं पुरुषः; भाःसत्यः, भा एव सत्यं सद्भावः स्वरूपं यस्य सोऽयं भाःसत्यः, भास्वर इत्येतत्; मनसः सर्वार्थावभासकत्वात् मनोमयत्वाच्च अस्य भास्वरत्वम्; तस्मिन् अन्तर्हृदये हृदयस्यान्तः तस्मिन्नित्येतत्; यथा व्रीहिर्वा यवो वा परिमाणतः, एवंपरिमाणः तस्मिन्नन्तर्हृदये योगिभिर्दृश्यत इत्यर्थः। स एषः सर्वस्येशानः सर्वस्य स्वभेदजातस्य ईशानः स्वामी; स्वामित्वेऽपि सति कश्चिदमात्यादितन्त्रः, अयं तु न तथा; किं तर्हि अधिपतिः अधिष्ठाय पालयिता; सर्वमिदं प्रशास्ति, यदिदं किंच यत्किंचित्सर्वं जगत्, तत्सर्वं प्रशास्ति। एवं मनोमयस्योपासनात् तथारूपापत्तिरेव फलम्। 'तं यथा यथोपासते तदेव भवति' इति ब्राह्मणम् ॥

इति पञ्चमाध्यायस्य षष्ठं ब्राह्मणम् ॥

सप्तमं ब्राह्मणम् ॥

विद्युद्ब्रह्मेत्याहुर्विदानाद्विद्युद्विद्यत्येनं पाप्मनो य एवं वेद विद्युद्ब्रह्मेति विद्युद्ध्येव ब्रह्म ॥ १ ॥

इति सप्तमं ब्राह्मणम् ॥

तथैव उपासनान्तरं सत्यस्य ब्रह्मणो विशिष्टफलमारभ्यते— विद्युद्ब्रह्मेत्याहुः । विद्युतो ब्रह्मणो निर्वचनमुच्यते— विदानात् अवखण्डनात् तमसो मेघान्धकारं विदार्य हि अवभासते, अतो विद्युत्; एवंगुणं विद्युत् ब्रह्मेति यो वेद, असौ विद्यति अवखण्डयति विनाशयति पाप्मनः, एनमात्मानं प्रति प्रतिकूलभूताः पाप्मानो ये तान् सर्वान् पाप्मनः अवखण्डयतीत्यर्थः । य एवं वेद विद्युद्ब्रह्मेति तस्यानुरूपं फलम्, विद्युत् हि यस्मात् ब्रह्म ॥

इति पञ्चमाध्यायस्य सप्तमं ब्राह्मणम् ॥

अष्टमं ब्राह्मणम् ॥

वाचं धेनुमुपासीत तस्याश्चत्वारः स्तनाः स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारस्तस्यै द्वौ स्तनौ देवा उपजीवन्ति स्वाहाकारं च वषट्कारं च हन्तकारं मनुष्याः स्वधाकारं पितरस्तस्याः प्राण ऋषभो मनो वत्सः ॥ १ ॥

पुनः उपासनान्तरम् तस्यैव ब्रह्मणः वाग्वै ब्रह्मेति; वागिति शब्दः त्रयी; तां वाचं धेनुम्, धेनुरिव धेनुः, यथा धेनुः चतुर्भिः स्तनैः स्तन्यं पयः क्षरति वत्साय एवं वाग्धेनुः वक्ष्यमाणैः स्तनैः पय इव अन्नं क्षरति देवादिभ्यः। के पुनः ते स्तनाः? के वा ते, येभ्यः क्षरति? तस्याः एतस्या वाचो धेन्वाः, द्वौ स्तनौ देवा उपजीवन्ति वत्सस्थानीयाः; कौ तौ? स्वाहाकारं च वषट्कारं च; आभ्यां हि हविः दीयते देवेभ्यः। हन्तकारं मनुष्याः; हन्तेति मनुष्येभ्यः अन्नं प्रयच्छन्ति। स्वधाकारं पितरः; स्वधाकारेण हि पितृभ्यः स्वधां प्रयच्छन्ति। तस्या धेन्वा वाचः प्राणः ऋषभः; प्राणेन हि वाक्प्रसूयते; मनो वत्सः; मनसा हि प्रस्राव्यते; मनसा ह्यालोचिते विषये वाक् प्रवर्तते; तस्मात् मनः वत्सस्थानीयम्। एवं वाग्धेनूपासकः ताद्भाव्यमेव प्रतिपद्यते ॥

इति पञ्चमाध्यायस्य अष्टमं ब्राह्मणम् ॥

नवमं ब्राह्मणम् ॥

अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोति स यदोत्क्रमिष्यन्भवति नैनं घोषꣳ शृणोति ॥ १ ॥

इति नवमं ब्राह्मणम् ॥

अयमग्निर्वैश्वानरः, पूर्ववदुपासनान्तरम्; अयम् अग्निः वैश्वानरः; कोऽयमग्निरित्याह—योऽयमन्तः पुरुषे । किं शरीरारम्भकः? नेत्युच्यते—येन अग्निना वैश्वानराख्येन इदमन्नं पच्यते । किं तदन्नम्? यदिदम् अद्यते भुज्यते अन्नं प्रजाभिः, जाठरोऽग्निरित्यर्थः । तस्य साक्षादुपलक्षणार्थमिदमाह—तस्याग्नेः अन्नं पचतः जाठरस्य एष घोषो भवति; कोऽसौ? यं घोषम्, एतदिति क्रियाविशेषणम्, कर्णावपिधाय अङ्गुलीभ्यामपिधानं कृत्वा शृणोति । तं प्रजापतिमुपासीत वैश्वानरमग्निम् । अत्रापि ताद्भाव्यं फलम् । तत्र प्रासङ्गिकमिदमरिष्टलक्षणमुच्यते— सोऽत्र शरीरे भोक्ता यदा उत्क्रमिष्यन्भवति, नैनं घोषं शृणोति ॥

इति पञ्चमाध्यायस्य नवमं ब्राह्मणम् ॥

दशमं ब्राह्मणम् ॥

यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायु-
मागच्छति तस्मै स तत्र विजिहीते यथा
रथचक्रस्य खं तेन स ऊर्ध्व आक्रमते स
आदित्यमागच्छति तस्मै स तत्र विजि-
हीते यथा लम्बरस्य खं तेन स ऊर्ध्व आ-
क्रमते स चन्द्रमसमागच्छति तस्मै स
तत्र विजिहीते यथा दुन्दुभेः खं तेन स
ऊर्ध्व आक्रमते स लोकमागच्छत्यशोक-
महिमं तस्मिन्वसति शाश्वतीः समाः ॥

इति दशमं ब्राह्मणम् ॥

सर्वेषामस्मिन्प्रकरणे उपासनानां गतिरियं फलं चो-
च्यते— यदा वै पुरुषः विद्वान् अस्मात् लोकात् प्रैति श-
रीरं परित्यजति, सः तदा वायुम् आगच्छति, अन्तरिक्षे
तिर्यग्भूतो वायुः स्तिमितः अभेद्यस्तिष्ठति; स वायुः तत्र

स्वात्मनि तस्मै संप्राप्ताय विजिहीते स्वात्मावयवान् विगमयति छिद्रीकरोत्यात्मानमित्यर्थः। किंपरिमाणं छिद्रमित्युच्यते— यथा रथचक्रस्य खं छिद्रं प्रसिद्धपरिमाणम्; तेन छिद्रेण स विद्वान् ऊर्ध्वः आक्रमते ऊर्ध्वः सन् गच्छति। स आदित्यमागच्छति; आदित्यः ब्रह्मलोकं जिगमिषोर्मार्गनिरोधं कृत्वा स्थितः; सोऽपि एवंविदे उपासकाय द्वारं प्रयच्छति; तस्मै स तत्र विजिहीते; यथा लम्बरस्य खं वादित्रविशेषस्य छिद्रपरिमाणम्, तेन स ऊर्ध्वं आक्रमते। स चन्द्रमसम् आगच्छति; सोऽपि तस्मै तत्र विजिहीते; यथा दुन्दुभेः खं प्रसिद्धम्; तेन स ऊर्ध्वं आक्रमते। स लोकं प्रजापतिलोकम् आगच्छति; किंविशिष्टम्? अशोकं मानसेन दुःखेन विवर्जितमित्येतत्; अहिमं हिमवर्जितं शारीरदुःखवर्जितमित्यर्थः; तं प्राप्य तस्मिन् वसति शाश्वतीः नित्याः समाः संवत्सरानित्यर्थः; ब्रह्मणो बहून्कल्पान् वसतीत्येतत्॥

इति पञ्चमाध्यायस्य दशमं ब्राह्मणम्॥



एकादशं ब्राह्मणम् ॥

एतद्वै परमं तपो यद्व्याहितस्तप्यते परमꣳ हैव लोकं जयति य एवं वेदैतद्वै परमं तपो यं प्रेतमरण्यꣳ हरन्ति परमꣳ हैव लोकं जयति य एवं वेदैतद्वै परमं तपो यं प्रेतमग्नावभ्यादधति परमꣳ हैव लोकं जयति य एवं वेद ॥ ११ ॥

एतद्वै परमं तपः; किं तत्? यत् व्याहितः व्याधितः ज्वरादिपरिगृहीतः सन् यत् तप्यते तदेतत् परमं तप इत्येवं चिन्तयेत्, दुःखसामान्यात्। तस्य एवं चिन्तयतो विदुषः कर्मक्षयहेतुः तदेव तपो भवति अनिन्दत. अविषीदतः। स एव च तेन विज्ञानतपसा दग्धकिल्बिषः परमं हैव लोकं जयति, य एवं वेद। तथा मुमूर्षुः आदावेव कल्पयति; किम्? एतद्वै परमं तपः, यं प्रेतं मां ग्रामादरण्यं हरन्ति ऋत्विजः अन्त्यकर्मणे, तत् ग्रामादरण्यगमनसामान्यात् परमं मम तत् तपो भविष्यति; ग्रामादरण्यगमनं परमं तप इति हि प्रसिद्धम्। परमं हैव लोकं जयति, य एवं वेद। तथा एतद्वै परमं तपः यं प्रेतमग्नावभ्यादधति, अग्निप्रवेशसामान्यात्। परमं हैव लोकं जयति य एवं वेद॥

इति पञ्चमाध्यायस्य एकादशं ब्राह्मणम् ॥

द्वादशं ब्राह्मणम् ॥

अन्नं ब्रह्मेत्येक आहुस्तन्न तथा पूयति वा अन्नमृते प्राणात्प्राणो ब्रह्मेत्येक आहुस्तन्न तथा शुष्यति वै प्राण ऋतेऽन्नादेते ह त्वेव देवते एकधाभूयं भूत्वा परमतां गच्छतस्तद्ध स्माह प्रातृदः पितरं किꣳ स्विदेवैवं विदुषे साधु कुर्या किमेवास्मा असाधु कुर्यामिति स ह स्माह पाणिना मा प्रातृद कस्त्वेनयोरेकधाभूयं भूत्वा परमतां गच्छतीति तस्मा उ हैतदुवाच वीत्यन्नं वै व्यन्ने हीमानि सर्वाणि भूतानि विष्टानि रमिति प्राणो वै रं प्राणे हीमानि सर्वाणि भूतानि रमन्ते सर्वाणि ह वा अस्मिन्भूतानि विशन्ति सर्वाणि भूतानि रमन्ते य एवं वेद ॥ १ ॥

इति द्वादशं ब्राह्मणम् ॥

अन्नं ब्रह्मेति, तथा एतत् उपासनान्तरं विधित्सन्नाह— अन्नं ब्रह्म, अन्नम् अद्यते यत् तत् ब्रह्मेत्येक आचार्या आहुः; तत् न तथा ग्रहीतव्यम् अन्नं ब्रह्मेति। अन्ये चाहुः— प्राणो ब्रह्मेति; तच्च तथा न ग्रहीतव्यम्। किमर्थं पुनः अन्नं ब्रह्मेति न ग्राह्यम्? यस्मात् पूयति क्लिद्यते पूतिभावमापद्यते ऋते प्राणात्, तत्कथं ब्रह्म भवितुमर्हति; ब्रह्म हि नाम तत्, यदविनाशि। अस्तु तर्हि प्राणो ब्रह्म; नैवम्; यस्मात् शुष्यति वै प्राणः शोषमुपैति ऋते अन्नात्; अत्ता हि प्राणः; अतः अन्नेन आद्येन विना न शक्नोति आत्मानं धारयितुम्; तस्मात् शुष्यति वै प्राणः ऋतेऽन्नात्; अतः एकैकस्य ब्रह्मता नोपपद्यते यस्मात्, तस्मात् एते ह तु एव अन्नप्राणदेवते एकधाभूयम् एकधाभावं भूत्वा गत्वा परमतां परमत्वं गच्छतः ब्रह्मत्वं प्राप्नुतः। तदेतत् एवमध्यवस्य ह स्म आह— स्म प्रातृदो नाम पितरमात्मनः; किंस्वित् स्विदिति वितर्के; यथा मया ब्रह्म परिकल्पितम्, एवं विदुषे किंस्वित् साधु कुर्याम्, साधु शोभनं पूजाम्, कां तु अस्मै पूजां कुर्यामित्यभिप्रायः; किमेव अस्मै विदुषे असाधु कुर्याम्, कृतकृत्योऽसौ इत्यभिप्रायः। अन्नप्राणौ सहभूतौ ब्रह्मेति विद्वान् नासौ असाधुकरणेन खण्डितो भवति, नापि साधु-

करणेन महीकृतः। तम् एवंवादिनं स पिता ह स्म आह पाणिना हस्तेन निवारयन्, मा प्रातृद मैवं वोचः। कस्तु एनयोः अन्नप्राणयोः एकधाभूयं भूत्वा परमतां कस्तु गच्छति? न कश्चिदपि विद्वान् अनेन ब्रह्मदर्शनेन परमतां गच्छति; तस्मात् नैवं वक्तुमर्हसि कृतकृत्योऽसाविति; यद्येवम्, ब्रवीतु भवान् कथं परमतां गच्छतीति। तस्मै उ ह एतत् वक्ष्यमाणं वच उवाच। किं तत्? वीति; किं तत् वि इत्युच्यते—अन्नं वै वि; अन्ने हि यस्मात् इमानि सर्वाणि भूतानि विष्टानि आश्रितानि, अतः अन्नं वि इत्युच्यते। किच रम् इति; रमिति च उक्तवान्पिता; किं पुनस्तत् रम्? प्राणो वै रम्; कुत इत्याह; प्राणे हि यस्मात् बलाश्रये सति सर्वाणि भूतानि रमन्ते, अतो रं प्राणः। सर्वभूताश्रयगुणमन्नम्, सर्वभूतरतिगुणश्च प्राणः। न हि कश्चिदनायतनः निराश्रयः रमते; नापि सत्यप्यायतने अप्राणो दुर्बलो रमते; यदा तु आयतनवान्प्राणी बलवांश्च तदा कृतार्थमात्मानं मन्यमानो रमते लोकः; 'युवा स्यात्साधुयुवाध्यायकः' इत्यादिश्रुतेः। इदानीम् एवंविदः फलमाह—सर्वाणि ह वै अस्मिन् भूतानि विशन्ति अन्नगुणज्ञानात्, सर्वाणि भूतानि रमन्ते प्राणगुणज्ञानात्, य एवं वेद॥

इति पञ्चमाध्यायस्य द्वादशं ब्राह्मणम्॥

त्रयोदशं ब्राह्मणम् ॥

—❀—

उक्थं प्राणो वा उक्थं प्राणो हीदꣳ सर्वमुत्थापयत्युद्धास्मादुक्थविद्वीरस्तिष्ठत्युक्थस्य सायुज्यꣳ सलोकतां जयति य एवं वेद ॥ १ ॥

उक्थम्— तथा उपासनान्तरम्; उक्थं शस्त्रम्; तद्धि प्रधानं महाव्रते क्रतौ; किं पुनस्तदुक्थम्; प्राणो वै उक्थम्; प्राणश्च प्रधान इन्द्रियाणाम्, उक्थं च शस्त्राणाम्, अत उक्थमित्युपासीत। कथं प्राण उक्थमित्याह— प्राणः हि यस्मात् इदं सर्वम् उत्थापयति; उत्थापनात् उक्थं प्राणः; न हि अप्राणः कश्चिदुत्तिष्ठति; तदुपासनफलमाह— उत् ह अस्मात् एवंविदः उक्थवित् प्राणवित् वीरः पुत्रः उत्तिष्ठति ह— दृष्टम् एतत्फलम्; अदृष्टं तु उक्थस्य सायुज्यं सलोकतां जयति, य एवं वेद ॥

यजुः प्राणो वै यजुः प्राणे हीमानि सर्वाणि भूतानि युज्यन्ते युज्यन्ते हास्मै

सर्वाणि भूतानि श्रैष्ठ्याय यजुषः सायुज्यꣳ सलोकतां जयति य एवं वेद ॥ २ ॥

यजुरिति चोपासीत प्राणम्; प्राणो वै यजुः; कथं यजुः प्राणः? प्राणे हि यस्मात् सर्वाणि भूतानि युज्यन्ते; न हि असति प्राणे केनचित् कस्यचित् योगसामर्थ्यम्; अतो युनक्तीति प्राणो यजुः। एवंविदः फलमाह— युज्यन्ते उद्यच्छन्ते इत्यर्थः, ह अस्मै एवंविदे, सर्वाणि भूतानि, श्रैष्ठ्यं श्रेष्ठभावः तस्मै श्रैष्ठ्याय श्रेष्ठभावाय, अयं नः श्रेष्ठो भवेदिति; यजुषः प्राणस्य सायुज्यमित्यादि सर्वं समानम् ॥

साम प्राणो वै साम प्राणे हीमानि सर्वाणि भूतानि सम्यञ्चि सम्यञ्चि ह्यस्मै सर्वाणि भूतानि श्रैष्ठ्याय कल्पन्ते साम्नः सायुज्यꣳ सलोकतां जयति य एवं वेद ॥ ३ ॥

सामेति चोपासीत प्राणम्। प्राणो वै साम; कथं प्राणः साम? प्राणे हि यस्मात् सर्वाणि भूतानि सम्यञ्चि संगच्छन्ते, संगमनात् साम्यापत्तिहेतुत्वात् साम प्राणः, सम्यञ्चि संगच्छन्ते ह अस्मै सर्वाणि भूतानि; न केवलं

संगच्छन्त एव, श्रेष्ठभावाय च अस्मै कल्पन्ते समर्थ्यन्ते; सान्नः सायुज्यमित्यादि पूर्ववत् ॥

क्षत्रं प्राणो वै क्षत्रं प्राणो हि वै क्षत्रं त्रायते हैनं प्राणः क्षणितोः प्र क्षत्रमत्र-माप्नोति क्षत्रस्य सायुज्यꣳ सलोकतां जयति य एवं वेद ॥ ४ ॥

इति त्रयोदशं ब्राह्मणम् ॥

तं प्राणं क्षत्रमित्युपासीत । प्राणो वै क्षत्रम्, प्रसिद्धम् एतत्— प्राणो हि वै क्षत्रम् । कथं प्रसिद्धतेत्याह— त्रायते पालयति एनं पिण्डं देहं प्राणः, क्षणितोः शस्त्रादिहिंसितात् पुनः मांसेन आपूरयति यस्मात्, तस्मात् क्षतत्राणात् प्रसिद्धं क्षत्रत्वं प्राणस्य । विद्वत्फलमाह—प्र क्षत्रमत्रम्, न त्रायते अन्येन केनचिदित्यत्रम्, क्षत्रं प्राणः, तम् अत्रं क्षत्रं प्राणं प्राप्नोतीत्यर्थः । शाखान्तरे वा पाठात् क्षत्रमात्रं प्राप्नोति, प्राणो भवतीत्यर्थः । क्षत्रस्य सायुज्यं सलोकतां जयति, य एवं वेद ॥

इति पञ्चमाध्यायस्य त्रयोदशं ब्राह्मणम् ॥



चतुर्दशं ब्राह्मणम् ॥

भूमिरन्तरिक्षं द्यौरित्यष्टावक्षराण्यष्टाक्षरꣳ ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावदेषु त्रिषु लोकेषु तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥ १ ॥

ब्रह्मणो हृदयाद्यनेकोपाधिविशिष्टस्य उपासनमुक्तम्; अथ इदानीं गायत्र्युपाधिविशिष्टस्य उपासनं वक्तव्यमित्यारभ्यते। सर्वच्छन्दसां हि गायत्रीछन्दः प्रधानभूतम्; तत्प्रयोक्तृगयत्राणात् गायत्रीति वक्ष्यति; न च अन्येषां छन्दसां प्रयोक्तृप्राणत्राणसामर्थ्यम्; प्राणात्मभूता च सा; सर्वच्छन्दसां च आत्मा प्राणः; प्राणश्च क्षतत्राणात् क्षत्रमित्युक्तम्; प्राणश्च गायत्री; तस्मात् तदुपासनमेव विधित्स्यते; द्विजोत्तमजन्महेतुत्वाच्च— 'गायत्र्या ब्राह्मणमसृजत त्रिष्टुभा राजन्यं जगत्या वैश्यम्' इति द्विजोत्तमस्य द्वितीयं जन्म गायत्रीनिमित्तम्; तस्मात् प्रधाना गायत्री; 'ब्राह्मणा व्युत्थाय ब्राह्मणा अभिवदन्ति, स ब्राह्मणो विपापो विरजोऽविचिकित्सो ब्राह्मणो

भवति ' इत्युत्तमपुरुषार्थसंबन्धं ब्राह्मणस्य दर्शयति , तच्च ब्राह्मणत्वं गायत्रीजन्ममूलम् ; अतो वक्तव्यं गायत्र्याः सतत्त्वम् । गायत्र्या हि यः सृष्टो द्विजोत्तमः निरङ्कुश एव उत्तमपुरुषार्थसाधने अधिक्रियते ; अतः तन्मूलः परमपुरुषार्थसंबन्धे. । तस्मात् तदुपासनविधानाय आह— भूमिरन्तरिक्षं द्यौरित्येतानि अष्टावक्षराणि ; अष्टाक्षरम् अष्टावक्षराणि यस्य तत् इदमष्टाक्षरम् ; ह वै प्रसिद्धावद्योतकौ ; एकं प्रथमम् , गायत्र्यै गायत्र्याः, पदम् ; यकारेणैव अष्टत्वपूरणम् । एतत् उ ह एव एतदेव अस्या गायत्र्याः पदं पादः प्रथमः भूम्यादिलक्षणः त्रैलोक्यात्मा, अष्टाक्षरत्वसामान्यात् । एवम् एतत् त्रैलोक्यात्मकं गायत्र्याः प्रथमं पदं यो वेद, तस्यैतत्फलम्— स विद्वान् यावत्किंचित् एषु त्रिषु लोकेषु जेतव्यम् , तावत्सर्वं ह जयति, यः अस्यै एतदेवं पदं वेद ॥

ऋचो यजूंषि सामानीत्यष्टावक्षरा-
ण्यष्टाक्षरꣳ ह वा एकं गायत्र्यै पदमेतदु
हैवास्या एतत्स यावतीयं त्रयी विद्या
तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥

तथा ऋचः यजूंषि सामानीति त्रयीविद्यानामाक्षराणि

एतान्यपि अष्टावेव; तथैव अष्टाक्षरं ह वै एकं गायत्र्यै पदं द्वितीयम्, एतत् उ ह एव अस्या एतत् ऋग्यजुःसामलक्षणम् अष्टाक्षरत्वसामान्यादेव । सः यावती इयं त्रयी विद्या त्रय्या विद्यया यावत्फलजातम् आप्यते, तावत् ह जयति, योऽस्या एतत् गायत्र्याः त्रैविद्यलक्षणं पदं वेद ॥

प्राणोऽपानो व्यान इत्यष्टावक्षराण्यष्टाक्षरꣳ ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावदिदं प्राणि तावद्ध जयति योऽस्या एतदेवं पदं वेदाथास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति यद्वै चतुर्थं तत्तुरीयं दर्शतं पदमिति ददृश इव ह्येष परोरजा इति सर्वमु ह्येवैष रज उपर्युपरि तपत्येवꣳ हैव श्रिया यशसा तपति योऽस्या एतदेवं पदं वेद ॥ ३ ॥

तथा प्राणः अपानः व्यानः एतान्यपि प्राणाद्यभिधानाक्षराणि अष्टौ; तच्च गायत्र्यास्तृतीयं पदम्; यावदिदं प्राणिजातम्, तावत् ह जयति, योऽस्या एतदेवं गायत्र्यास्तृतीयं पदं

वेद। अथ अनन्तरं गायत्र्यास्त्रिपदायाः शब्दात्मिकायास्तुरीयं पदमुच्यते अभिधेयभूतम्, अस्याः प्रकृताया गायत्र्याः एतदेव वक्ष्यमाणं तुरीयं दर्शतं पदं परोरजा य एष तपति; तुरीयमित्यादिवाक्यपदार्थं स्वयमेव व्याचष्टे श्रुतिः— यद्वै चतुर्थं प्रसिद्धं लोके, तदिह तुरीयशब्देनाभिधीयते; दर्शतं पदमित्यस्य कोऽर्थ इत्युच्यते— ददृशे इव दृश्यते इव हि एषः मण्डलान्तर्गत पुरुष; अतो दर्शतं पदमुच्यते; परोरजा इत्यस्य पदस्य कोऽर्थ इत्युच्यते— सर्वं समस्तम् उ हि एव एषः मण्डलस्थ पुरुषः रजः रजोजातं समस्तं लोकमित्यर्थः, उपर्युपरि आधिपत्यभावेन सर्वं लोकं रजोजातं तपति; उपर्युपरीति वीप्सा सर्वलोकाधिपत्यख्यापनार्था, ननु सर्वशब्देनैव सिद्धत्वात् वीप्सा अनर्थिका— नैष दोषः; येषाम् उपरिष्टात् सविता दृश्यते तद्विषय एव सर्वशब्दः स्यादित्याशङ्कानिवृत्त्यर्था वीप्सा, 'ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां च' इति श्रुत्यन्तरात्; तस्मात् सर्वावरोधार्था वीप्सा; यथा असौ सविता सर्वाधिपत्यलक्षणया श्रिया यशसा च ख्यात्या तपति, एवं हैव श्रिया यशसा च तपति, योऽस्या एतदेवं तुरीयं दर्शतं पदं वेद॥

सैषा गायत्र्येतस्मिꣳस्तुरीये दर्शते पदे

परोरजसि प्रतिष्ठिता तद्वै तत्सत्ये प्रतिष्ठितं चक्षुर्वै सत्यं चक्षुर्हि वै सत्यं तस्माद्यदिदानीं द्वौ विवदमानावेयातामहमदर्शमहमश्रौषमिति य एवं ब्रूयादहमदर्शमिति तस्मा एव श्रद्दध्याम तद्वै तत्सत्यं बले प्रतिष्ठितं प्राणो वै बलं तत्प्राणे प्रतिष्ठितं तस्मादाहुर्बलꣳ सत्यादोगीय इत्येवम्वेषा गायत्र्यध्यात्मं प्रतिष्ठिता सा हैषा गयाꣳस्तत्रे प्राणा वै गयास्तत्प्राणाꣳस्तत्रे तद्यद्गयाꣳस्तत्रे तस्माद्गायत्री नाम स यामेवामूꣳ सावित्रीमन्वाहैषैव सा स यस्मा अन्वाह तस्य प्राणाꣳस्त्रायते ॥ ४ ॥

सैषा त्रिपदा उक्ता या त्रैलोक्यत्रैविद्यप्राणलक्षणा गायत्री एतस्मिन् चतुर्थे तुरीये दर्शते पदे परोरजसि प्रतिष्ठिता, मूर्तामूर्तरसत्वात् आदित्यस्य; रसापाये हि वस्तु नीरसम् अप्रतिष्ठितं भवति, यथा काष्ठादि दग्धसारम्, तद्वत्; तथा

मूर्तामूर्तात्मकं जगत् त्रिपदा गायत्री आदित्ये प्रतिष्ठिता तद्र-सत्वात् सह त्रिभिः पादैः, तद्वै तुरीयं पदं सत्ये प्रतिष्ठि-तम्; किं पुनः तत् सत्यमित्युच्यते— चक्षुर्वै सत्यम्। कथ चक्षुः सत्यमित्याह— प्रसिद्धमेतत्, चक्षुर्हि वै सत्यम्। कथं प्रसिद्धतेत्याह—तस्मात्—यत् यदि इदानीमेव द्वौ विवद-मानौ विरुद्धं वदमानौ एयाताम् आगच्छेयाताम्; अहम् अदर्शं दृष्टवानस्मीति अन्य आह; अहम् अश्रौषम्— त्वया दृष्टं न तथा तद्वस्त्विति; तयोः य एवं ब्रूयात्— अहमद्राक्षमिति, तस्मै एव श्रद्दध्याम; न पुनः यः ब्रूयात् अहमश्रौषमिति; श्रोतुः मृषा श्रवणमपि संभ-वति; न तु चक्षुषो मृषा दर्शनम्; तस्मात् न अ-श्रौषमित्युक्तवते श्रद्दध्याम; तस्मात् सत्यप्रतिपत्तिहेतु-त्वात् सत्यं चक्षुः; तस्मिन् सत्ये चक्षुषि सह त्रिभिः इतरैः पादैः तुरीयं पदं प्रतिष्ठितमित्यर्थः। उक्तं च 'स आदित्यः कस्मिन्प्रतिष्ठित इति चक्षुषीति'। तद्वै तुरीयपदाश्रयं सत्यं बले प्रतिष्ठितम्; किं पुनः तत् बलमित्याह— प्राणो वै बलम्; तस्मिन्प्राणे बले प्रतिष्ठितं सत्यम्। तथा चोक्तम्—'सूत्रे तदोतं च प्रोतं च' इति। यस्मात् बले सत्यं प्रतिष्ठितम्, तस्मादाहुः— बलं सत्यादोगीयः ओजीयः ओजस्तरमित्यर्थः;

लोकेऽपि यस्मिन्हि यदाश्रितं भवति, तस्मादाश्रितात् आश्रयस्य बलवत्तरत्वं प्रसिद्धम्; न हि दुर्बलं बलवतः क्वचित् आश्रयभूतं दृष्टम्; एवं उक्तन्यायेन उ एषा गायत्री अध्यात्मम् अध्यात्मे प्राणे प्रतिष्ठिता; सैषा गायत्री प्राणः; अतो गायत्र्यां जगत्प्रतिष्ठितम्; यस्मिन्प्राणे सर्वे देवा एकं भवन्ति, सर्वे वेदाः, कर्माणि फलं च; सैवं गायत्री प्राणरूपा सती जगत आत्मा। सा ह एषा गयान् तत्रे त्रातवती; के पुनर्गयाः? प्राणाः वागादयः वै गयाः, शब्दकरणात्; तान् तत्रे सैषा गायत्री। तत् तत्र यत् यस्मात् गयान् तत्रे, तस्मात् गायत्री नाम; गयत्राणात् गायत्रीति प्रथिता। स आचार्यः उपनीय माणवकमष्टवर्षं यामेव अमूं गायत्रीं सावित्रीं सवितृदेवताकाम् अन्वाह पच्छः अर्धर्चशः समस्तां च, एषैव स साक्षात् प्राणः जगत आत्मा माणवकाय समर्पिता इह इदानीं व्याख्याता, नान्या; स आचार्यः यस्मै माणवकाय अन्वाह अनुवक्ति, तस्य माणवकस्य गयान् प्राणान् त्रायते नरकादिपतनात्॥

ताꣳ हैतामेके सावित्रीमनुष्टुभमन्वाहुर्वागनुष्टुबेतद्वाचमनुब्रूम इति न तथा कुर्याद्गायत्रीमेव सावित्रीमनुब्रूयाद्यदि ह

वा अप्येवंविद्ब्रह्मैव प्रतिगृह्णाति न हैव तद्गायत्र्या एकंचन पदं प्रति ॥ ५ ॥

तामेतां सावित्रीं ह एके शाखिनः अनुष्टुभम् अनुष्टुप्प्रभवाम् अनुष्टुप्छन्दस्काम् अन्वाहुरुपनीताय। तदभिप्रायमाह— वाक् अनुष्टुप्, वाक्च शरीरे सरस्वती, तामेव हि वाचं सरस्वतीं माणवकायानुब्रूम इत्येतद्वदन्तः। न तथा कुर्यात् न तथा विद्यात्, यत् ते आहुः मृषैव तत्; किं तर्हि गायत्रीमेव सावित्रीमनुब्रूयात्; कस्मात्? यस्मात् प्राणो गायत्रीत्युक्तम्; प्राणे उक्ते, वाक्च सरस्वती च अन्ये च प्राणाः सर्वे माणवकाय समर्पितं भवति। किंचेदं प्रासङ्गिकमुक्त्वा गायत्रीविदं स्तौति— यदि ह वै अपि एवंवित् ब्राह्मण— न हि तस्य सर्वात्मनो बहु नामास्ति किंचित्, सर्वात्मकत्वाद्विदुषः— प्रतिगृह्णाति, न हैव तत् प्रतिग्रहजातं गायत्र्या एकंचन एकमपि पदं प्रति पर्याप्तम् ॥

स य इमाꣳस्त्रीँल्लोकान्पूर्णान्प्रतिगृह्णीयात्सोऽस्या एतत्प्रथमं पदमाप्नुयादथ यावतीयं त्रयी विद्या यस्तावत्प्रतिगृह्णीयात्सोऽस्या एतद्द्वितीयं पदमाप्नुयादथ यावदिदं प्राणि यस्तावत्प्रतिगृह्णीयात्सो-

ऽस्या एतत्तृतीयं पदमाप्नुयादथास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति नैव केनचनाप्यं कुत उ एतावत्प्रतिगृह्णीयात् ॥ ६ ॥

स य इमांस्त्रीन्— स यः गायत्रीवित् इमान् भूरादीन् त्रीन् गोश्वादिधनपूर्णान् लोकान् प्रतिगृह्णीयात्, स प्रतिग्रहः, अस्या गायत्र्या एतत्प्रथमं पदं यद्याख्यातम् आप्नुयात् प्रथमपदविज्ञानफलम्, तेन भुक्तं स्यात्, न त्वधिकदोषोत्पादकः स प्रतिग्रहः । अथ पुनः यावती इयं त्रयी विद्या, यस्तावत् प्रतिगृह्णीयात्, सोऽस्या एतद्द्वितीयं पदमाप्नुयात्, द्वितीयपदविज्ञानफलं तेन भुक्तं स्यात् । तथा यावदिदं प्राणि, यस्तावत्प्रतिगृह्णीयात्, सोऽस्या एतत्तृतीयं पदमाप्नुयात्, तेन तृतीयपदविज्ञानफलं भुक्तं स्यात् । कल्पयित्वेदमुच्यते; पादत्रयसममपि यदि कश्चित्प्रतिगृह्णीयात्, तत्पादत्रयविज्ञानफलस्यैव क्षयकारणम्, न त्वन्यस्य दोषस्य कर्तृत्वे क्षमम्; न चैवं दाता प्रतिग्रहीता वा; गायत्रीविज्ञानस्तुतये कल्प्यते; दाता प्रतिग्रहीता च यद्यप्येवं संभाव्यते, नासौ प्रतिग्रहः अपराधक्षमः; कस्मात्? यतः अस्यधिकमपि पुरुषार्थविज्ञानम् अवशिष्टमेव चतुर्थपादविषयं गायत्र्याः; तद-

र्शयति— अथ अस्याः एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति, यद्यैतत् नैव केनचन केनचिदपि प्रतिग्रहेण आप्यं नैव प्राप्यमित्यर्थः, यथा पूर्वोक्तानि त्रीणि पदानि; एतान्यपि नैव आप्यानि केनचित्; कल्पयित्वा एवमुक्तम्; परमार्थतः कुत उ एतावत् प्रतिगृह्णीयात् त्रैलोक्यादिसमम्। तस्मात् गायत्री एवंप्रकारा उपास्येत्यर्थः ॥

तस्या उपस्थानं गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि न हि पद्यसे । नमस्ते तुरीयाय दर्शताय पदाय परोरजसेऽसावदो मा प्रापदिति यं द्विष्यादसावस्मै कामो मा समृद्धीति वा न हैवास्मै स कामः समृध्यते यस्मा एवमुपतिष्ठतेऽहमदः प्रापमिति वा ॥ ७ ॥

तस्या उपस्थानम्— तस्या गायत्र्याः उपस्थानम् उपेत्य स्थानं नमस्करणम् अनेन मन्त्रेण । कोऽसौ मन्त्र इत्याह— हे गायत्रि असि भवसि त्रैलोक्यपादेन एकपदी, त्रयीविद्यारूपेण द्वितीयेन द्विपदी, प्राणादिना तृतीयेन त्रिपद्यसि, चतुर्थेन तुरीयेण चतुष्पद्यसि; एवं चतुर्भिः पादैः उपासकैः पद्यसे ज्ञायसे; अतः परं परेण निरुपाधिकेन स्वेन आत्मना

अपदसि— अविद्यमानं पदं यस्यास्तव, येन पद्यसे— सा त्वम् अपत् असि, यस्मात् न हि पद्यसे, नेति नेत्यात्मत्वात्। अतो व्यवहारविषयाय नमस्ते तुरीयाय दर्शताय पदाय परोरजसे। असौ शत्रुः पाप्मा त्वत्प्राप्तिविघ्नकरः, अदः तत् आत्मनः कार्यं यत् त्वत्प्राप्तिविघ्नकर्तृत्वम्, मा प्रापत् मैव प्राप्नोतु; इति-शब्दो मन्त्रपरिसमाप्त्यर्थः; यं द्विष्यात् यं प्रति द्वेषं कुर्यात् स्वयं विद्वान्, तं प्रति अनेनोपस्थानम्; असौ शत्रुः अमुकनामेति नाम गृह्णीयात्; अस्मै यज्ञदत्ताय अभिप्रेतः कामः मा समृद्धि समृद्धिं मा प्राप्नोत्विति वा उपतिष्ठते; न हैवास्मै देवदत्ताय स कामः समृध्यते; कस्मै? यस्मै एवमुपतिष्ठते। अहं अदः देवदत्ताभिप्रेतं प्रापमिति वा उपतिष्ठते। असावदो मा प्रापदित्यादित्रयाणां मन्त्रपदानां यथाकामं विकल्पः॥

एतद्ध वै तज्जनको वैदेहो बुडिलमाश्वतराश्विमुवाच यन्नु हो तद्गायत्रीविदब्रूथा अथ कथꣳहस्तीभूतो वहसीति मुखꣳह्यस्याः सम्राण्न विदांचकारेति होवाच तस्या अग्निरेव मुखं यदि ह वा अपि बह्विवाग्नावभ्यादधति सर्वमेव तत्संदहत्येवꣳहैवैवंविद्यद्यपि बह्विव पापं कुरुते सर्व-

मेव तत्संप्साय शुद्धः पूतोऽजरोऽमृतः संभवति ॥ ८ ॥

गायत्र्या मुखविधानाय अर्थवाद उच्यते— एतत् ह किल वै स्मर्यते, तत् तत्र गायत्रीविज्ञानविषये; जनको वैदेहः, बुडिलो नामतः, अश्वतराश्वस्यापत्यम् आश्वतराश्विः, तं किल उक्तवान्; यत् नु इति वितर्के, हो अहो इत्येतत्, तत् यत् त्वं गायत्रीविदब्रूथाः, गायत्रीविदस्मीति यदब्रूथाः, किमिदं तस्य वचसोऽननुरूपम्; अथ कथम्, यदि गायत्रीवित्, प्रतिग्रहदोषेण हस्तीभूतो वहसीति । स प्रत्याह राज्ञा स्मारितः— मुखं गायत्र्याः हि यस्मात् अस्याः, हे सम्राट्, न विदांचकार न विज्ञातवानस्मि– इति होवाच; एकाङ्गविकलत्वात् गायत्रीविज्ञानं मम अफलं जातम् । शृणु तर्हि; तस्या गायत्र्या अग्निरेव मुखम्; यदि ह वै अपि बह्विवेन्धनम् अभ्रावभ्यादधति लौकिकाः, सर्वमेव तत्संदहत्येवेन्धनम् अग्निः—एवं हैव एवंवित् गायत्र्या अग्निर्मुखमित्येवं वेत्तीत्येवंवित् स्यात् स्वयं गायत्र्यात्मा अग्निमुखः सन् । यद्यपि बह्विव पापं कुरुते प्रतिग्रहादिदोषम्, तत्सर्वं पापजातं संप्साय भक्षयित्वा शुद्धः अग्निवत् पूतश्च तस्मात्प्रतिग्रहदोषात् गायत्र्यात्मा अजरोऽमृतश्च संभवति ॥

इति पञ्चमाध्यायस्य चतुर्दशं ब्राह्मणम् ॥

पञ्चदशं ब्राह्मणम् ॥

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये । पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् । समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि । योऽसावसौ पुरुषः सोऽहमस्मि । वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम् । ॐ क्रतो स्मर कृतꣳस्मर क्रतो स्मर कृतꣳस्मर । अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ १ ॥

यो ज्ञानकर्मसमुच्चयकारी सः अन्तकाले आदित्यं प्रार्थयति; अस्ति च प्रसङ्गः; गायत्र्यास्तुरीयः पादो हि सः; तदुपस्थानं प्रकृतम्; अतः स एव प्रार्थ्यते । हिरण्मयेन ज्योतिर्मयेन पात्रेण, यथा पात्रेण-इष्टं वस्तु अपिधीयते, एवमिदं सत्याख्यं ब्रह्म ज्योतिर्मयेन मण्डलेनापिहितमिव असमाहितचेतसामदृश्यत्वात्; तदुच्यते— सत्यस्यापिहितं मुखं मुख्यं स्वरूपम्; तत् अपिधानं पात्रमपिधानमिव दर्शनप्रतिबन्धकारणम्, तत् त्वम्, हे पूषन्, जगतः पोषणात्पूषा


सविता, अपावृणु अपावृतं कुरु दर्शनप्रतिबन्धकारणमपनयेत्यर्थः; सत्यधर्माय सत्यं धर्मोऽस्य मम सोऽहं सत्यधर्मा, तस्मै त्वदात्मभूतायेत्यर्थः; दृष्टये दर्शनाय; पूषन्नित्यादीनि नामानि आमन्त्रणार्थानि सवितुः, एकर्षे, एकश्चासावृषिश्च एकर्षिः, 'दर्शनाद्दृषिः; स हि सर्वस्य जगत आत्मा चक्षुश्च सन् सर्वं पश्यति; एको वा गच्छतीत्येकर्षिः, 'सूर्य एकाकी चरति' इति मन्त्रवर्णात्; यम, सर्वं हि जगतः संयमनं त्वत्कृतम्; सूर्य, सुष्ठु ईरयते रसान् रश्मीन् प्राणान् धियो वा जगत इति; प्राजापत्य, प्रजापतेरीश्वरस्यापत्यं हिरण्यगर्भस्य वा, हे प्राजापत्य; व्यूह विगमय रश्मीन्; समूह संक्षिप आत्मनस्तेजः, येनाहं शक्नुयां द्रष्टुम्; तेजसा ह्यपहृतदृष्टिः न शक्नुयां त्वत्स्वरूपमञ्जसा द्रष्टुम्, विद्योतन इव रूपाणाम्; अत उपसंहर तेजः; यत् ते तव रूपं सर्वकल्याणानामतिशयेन कल्याणं कल्याणतमम्, तत् ते तव पश्यामि पश्यामो वयम्, वचनव्यत्ययेन। योऽसौ भूर्भुवःस्वर्व्याहृत्यवयवः पुरुषः, पुरुषाकृतित्वात्पुरुषः, सोऽहमस्मि भवामि; 'अहरहम्' इति च उपनिषद उक्तत्वादादित्यचाक्षुषयोः तदेवेदं परामृश्यते; सोऽहमस्म्यमृतमिति संबन्धः; ममामृतस्य सत्यस्य शरीरपाते, शरीरस्थो यः प्राणो वायुः स अनिलं बाह्यं वायुमेव प्रतिगच्छतु; तथा अन्या देवताः स्वां स्वां प्र-

कृतिं गच्छन्तु; अथ इदमपि भस्मान्तं सत् पृथिवीं यातु शरीरम्। अथेदानीम् आत्मनः संकल्पभूतां मनसि व्यवस्थिताम् अग्निदेवतां प्रार्थयते— ॐ क्रतो; ओमिति क्रतो इति च संबोधनार्थावेव; ओंकारप्रतीकत्वात् ओम्; मनोमयत्वाच्च क्रतुः; हे ॐ, हे क्रतो, स्मर स्मर्तव्यम्; अन्तकाले हि त्वत्स्मरणवशात् इष्टा गतिः प्राप्यते; अतः प्रार्थ्यते—यत् मया कृतम्, तत् स्मर; पुनरुक्तिः आदरार्था। किंच हे अग्ने, नय प्रापय, सुपथा शोभनेन मार्गेण, राये धनाय कर्मफलप्राप्तये इत्यर्थः; न दक्षिणेन कृष्णेन पुनरावृत्तियुक्तेन, किं तर्हि शुक्लेनैव सुपथा; अस्मान् विश्वानि सर्वाणि, हे देव, वयुनानि प्रज्ञानानि सर्वप्राणिनां विद्वान्; किंच युयोधि अपनय वियोजय अस्मत् अस्मत्तः, जुहुराणं कुटिलम्, एनः पापं पापजातं सर्वम्; तेन पापेन वियुक्ता वयम् एष्याम उत्तरेण पथा त्वत्प्रसादात्; किं तु वयं तुभ्यम् परिचर्यां कर्तुं न शक्नुमः; भूयिष्ठां बहुतमां ते तुभ्यं नमउक्तिं नमस्कारवचनं विधेम नमस्कारोक्त्या परिचरेमेत्यर्थः, अन्यत्कर्तुमशक्ताः सन्त इति ॥

इति पञ्चमाध्यायस्य पञ्चदशं ब्राह्मणम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ

बृहदारण्यकोपनिषद्भाष्ये पञ्चमोऽध्यायः ॥


श्रीमच्छंकरभगवत्पादविरचितम्
बृहदारण्यकोपनिषद्भाष्यम्
षष्ठोऽध्यायः

षष्ठोऽध्यायः ॥

ॐ यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति प्राणो वै ज्येष्ठश्च श्रेष्ठश्च ज्येष्ठश्च श्रेष्ठश्च स्वानां भवत्यपि च येषां बुभूषति य एवं वेद ॥

ॐ प्राणो गायत्रीत्युक्तम् । कस्मात्पुनः कारणात् प्राणभावः गायत्र्याः, न पुनर्वागादिभाव इति, यस्मात् ज्येष्ठश्च श्रेष्ठश्च प्राणः, न वागादयो ज्यैष्ठ्यश्रैष्ठ्यभाजः; कथं ज्येष्ठत्वं श्रेष्ठत्वं च प्राणस्येति तन्निर्दिधारयिषया इदमारभ्यते । अथवा उक्थयजुःसामक्षत्रादिभावैः प्राणस्यैव उपासनमभिहितम्, सत्स्वपि अन्येषु चक्षुरादिषु; तत्र हेतुमात्रमिह आनन्तर्येण संबध्यते; न पुनः पूर्वशेषता । विवक्षितं तु खिलत्वादस्य काण्डस्य पूर्वत्र यदनुक्तं विशिष्टफलं प्राणविषयमुपासनं तदुक्तव्यमिति । यः कश्चित्, ह वै इत्यवधारणार्थौ; यो ज्येष्ठश्रेष्ठगुणं वक्ष्यमाणं यो वेद असौ भवत्येव ज्येष्ठश्च श्रेष्ठश्च; एवं फलेन प्रलोभितः सन् प्रश्नाय अभिमुखीभूतः; तस्मै चाह— प्राणो वै ज्येष्ठश्च

श्रेष्ठश्च । कथं पुनरवगम्यते प्राणो ज्येष्ठश्च श्रेष्ठश्चेति, यस्मात् निषेककाल एव शुक्रशोणितसंबन्धः प्राणादिकलापस्याविशिष्टः ? तथापि न अप्राणं शुक्रं विरोहतीति प्रथमो वृत्तिलाभः प्राणस्य चक्षुरादिभ्यः; अतो ज्येष्ठो वयसा प्राणः; निषेककालादारभ्य गर्भं पुष्यति प्राणः; प्राणे हि लब्धवृत्तौ पश्चाच्चक्षुरादीनां वृत्तिलाभः; अतो युक्तं प्राणस्य ज्येष्ठत्वं चक्षुरादिषु; भवति तु कश्चित्कुले ज्येष्ठः, गुणहीनत्वात्तु न श्रेष्ठः; मध्यमः कनिष्ठो वा गुणाढ्यत्वात् भवेत् श्रेष्ठः, न ज्येष्ठः, न तु तथा इहेत्याह—प्राण एव तु ज्येष्ठश्च श्रेष्ठश्च । कथं पुनः श्रैष्ठ्यमवगम्यते प्राणस्य ? तदिह संवादेन दर्शयिष्यामः । सर्वथापि तु प्राणं ज्येष्ठश्रेष्ठगुणं यो वेद उपास्ते, स स्वानां ज्ञातीनां ज्येष्ठश्च श्रेष्ठश्च भवति, ज्येष्ठश्रेष्ठगुणोपासनसामर्थ्यात्; स्वव्यतिरेकेणापि च येषां मध्ये ज्येष्ठश्च श्रेष्ठश्च भविष्यामीति बुभूषति भवितुमिच्छति, तेषामपि ज्येष्ठश्रेष्ठप्राणदर्शी ज्येष्ठश्च श्रेष्ठश्च भवति । ननु वयोनिमित्तं ज्येष्ठत्वम्, तत् इच्छातः कथं भवतीत्युच्यते—नैष दोषः, प्राणवत् वृत्तिलाभस्यैव ज्येष्ठत्वस्य विवक्षितत्वात् ॥

यो ह वै वसिष्ठां वेद वसिष्ठः स्वानां भवति वाग्वै वसिष्ठा वसिष्ठः स्वानां भ-

वत्यपि च येषां बुभूषति य एवं वेद ॥

यो ह वै वसिष्ठां वेद वसिष्ठः स्वाना भवति । तदर्शनानुरूप्येण फलम् । येषां च ज्ञातिव्यतिरेकेण वसिष्ठो भवितुमिच्छति, तेषां च वसिष्ठो भवति । उच्यतां तर्हि, कासौ वसिष्ठेति; वाग्वै वसिष्ठा; वासयत्यतिशयेन वस्ते वेति वसिष्ठा; वाग्मिनो हि धनवन्तो वसन्त्यतिशयेन; आच्छादनार्थस्य वा वसेर्वसिष्ठा, अभिभवन्ति हि वाचा वाग्मिनः अन्यान् । तेन वसिष्ठगुणवत्परिज्ञानात् वसिष्ठगुणो भवतीति दर्शनानुरूपं फलम् ॥

यो ह वै प्रतिष्ठां वेद प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे चक्षुर्वै प्रतिष्ठा चक्षुषा हि समे च दुर्गे च प्रतितिष्ठति प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे य एवं वेद ॥

यो ह वै प्रतिष्ठां वेद, प्रतितिष्ठत्यनयेति प्रतिष्ठा, तां प्रतिष्ठां प्रतिष्ठागुणवतीं यो वेद, तस्य एतत्फलम्; प्रतितिष्ठति समे देशे काले च; तथा दुर्गे विषमे च दुर्गमने च देशे दुर्भिक्षादौ वा काले विषमे । यद्येवमुच्यताम्, कासौ प्रतिष्ठा; चक्षुर्वै प्रतिष्ठा; कथं चक्षुषः प्रतिष्ठात्वमित्याह— चक्षुषा हि समे च दुर्गे च दृष्ट्वा प्रतितिष्ठति । अतोऽनुरूपं

फलम्, प्रतितिष्ठति समे, प्रतितिष्ठति दुर्गे, य एवं वेदेति ॥

यो ह वै संपदं वेद स॒ हास्मै पद्यते यं कामं कामयते श्रोत्रं वै संपच्छ्रोत्रे ही-मे सर्वे वेदा अभिसंपन्नाः स॒ हास्मै प-द्यते यं कामं कामयते य एवं वेद ॥ ४ ॥

यो ह वै संपदं वेद, संपद्गुणयुक्तं यो वेद, तस्य एतत्फ-लम्; अस्मै विदुषे संपद्यते ह; किम्? यं कामं कामयते, स कामः। किं पुनः संपद्गुणकम्? श्रोत्रं वै संपत्। कथं पुनः श्रोत्रस्य संपद्गुणत्वमित्युच्यते— श्रोत्रे सति हि यस्मात् सर्वे वेदा अभिसंपन्नाः, श्रोत्रेन्द्रियवतोऽध्येयत्वात्; वेद-विहितकर्मायत्ताश्च कामाः, तस्मात् श्रोत्रं संपत्। अतो वि-ज्ञानानुरूपं फलम्, सं हास्मै पद्यते, यं कामं कामयते, य एवं वेद ॥

यो ह वा आयतनं वेदायतन॒ स्वानां भवत्यायतनं जनानां मनो वा आयतन-मायतन॒ स्वानां भवत्यायतनं जनानां य एवं वेद ॥ ५ ॥

यो ह वा आयतनं वेद; आयतनम् आश्रयः, तत् यो

वेद, आयतनं स्वानां भवति, आयतनं जनानामन्येषामपि । किं पुनः तत् आयतनमित्युच्यते— मनो वै आयतनम् आश्रय. इन्द्रियाणां विषयाणां च ; मनआश्रिता हि विषया आत्मनो भोग्यत्वं प्रतिपद्यन्ते, मनःसंकल्पवशानि च इन्द्रियाणि प्रवर्तन्ते निवर्तन्ते च ; अतो मन आयतनम् इन्द्रियाणाम् । अतो दर्शनानुरूप्येण फलम्, आयतनं स्वानां भवति, आयतनं जनानाम्, य एवं वेद ॥

यो ह वै प्रजातिं वेद प्रजायते ह प्रजया पशुभी रेतो वै प्रजातिः प्रजायते ह प्रजया पशुभिर्य एवं वेद ॥ ६ ॥

यो ह वै प्रजातिं वेद, प्रजायते ह प्रजया पशुभिश्च संपन्नो भवति । रेतो वै प्रजातिः ; रेतसा प्रजननेन्द्रियमुपलक्ष्यते । तद्विज्ञानानुरूपं फलम्, प्रजायते ह प्रजया पशुभिः, य एवं वेद ॥

ते हेमे प्राणा अहꣳश्रेयसे विवदमाना ब्रह्म जग्मुस्तद्धोचुः को नो वसिष्ठ इति तद्धोवाच यस्मिन्व उत्क्रान्त इदꣳ शरीरं पापीयो मन्यते स वो वसिष्ठ इति ॥ ७ ॥

ते हेमे प्राणा वागादयः, अहंश्रेयसे अहं श्रेयानित्येतस्मै प्रयोजनाय, विवदमानाः विरुद्धं वदमानाः, ब्रह्म जग्मुः ब्रह्म गतवन्तः, ब्रह्मशब्दवाच्यं प्रजापतिम्; गत्वा च तद्ब्रह्म ह ऊचुः उक्तवन्तः— कः नः अस्माकं मध्ये, वसिष्ठः, कोऽस्माकं मध्ये वसति च वासयति च । तद्ब्रह्म तैः पृष्टं सत् ह उवाच उक्तवत्— यस्मिन् वः युष्माकं मध्ये उत्क्रान्ते निर्गते शरीरात्, इदं शरीरं पूर्वस्मादतिशयेन पापीयः पापतरं मन्यते लोकः; शरीरं हि नाम अनेकाशुचिसंघातत्वात् जीवतोऽपि पापमेव, ततोऽपि कष्टतरं यस्मिन् उत्क्रान्ते भवति; वैराग्यार्थमिदमुच्यते— पापीय इति; स वः युष्माकं मध्ये वसिष्ठो भविष्यति । जानन्नपि वसिष्ठं प्रजापतिः नोवाच अयं वसिष्ठ इति इतरेषाम् अप्रियपरिहाराय ॥

वाग्घोच्चक्राम सा संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथाकला अवदन्तो वाचा प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह वाक् ॥ ८ ॥

ते एवमुक्ता ब्रह्मणा प्राणाः आत्मनो वीर्यपरीक्षणाय क्रमेण उच्चक्रमु.। तत्र वागेव प्रथमं ह अस्मात् शरीरात् उच्चक्राम उत्क्रान्तवती, सा चोत्क्रम्य, संवत्सरं प्रोष्य प्रोषिता भूत्वा, पुनरागत्योवाच— कथम् अशकत शक्तवन्तः यूयम्, मदृते मां विना, जीवितुमिति। ते एवमुक्ताः ऊचुः— यथा लोके अकलाः मूकाः, अवदन्तः वाचा, प्राणन्तः प्राणनव्यापारं कुर्वन्तः प्राणेन, पश्यन्तः दर्शनव्यापारं चक्षुषा कुर्वन्तः, तथा शृण्वन्तः श्रोत्रेण, विद्वांसः मनसा कार्याकार्यादिविषयम्, प्रजायमानाः रेतसा पुत्रान् उत्पादयन्तः, एवमजीविष्म वयम्— इत्येवं प्राणैः दत्तोत्तरा वाक् आत्मनः अस्मिन् अवसिष्ठत्वं बुद्ध्वा, प्रविवेश ह वाक्॥

चक्षुर्होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथान्धा अपश्यन्तश्चक्षुषा प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह चक्षुः॥

श्रोत्रꣳ होचक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा बधिरा अशृण्वन्तः श्रोत्रेण प्राणान्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा विद्वाꣳसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह श्रोत्रम् ॥ १० ॥

मनो होचक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा मुग्धा अविद्वाꣳसो मनसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह मनः ॥ ११ ॥

रेतो होचक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा क्लीबा अप्रजायमाना

रेतसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसैवमजीविष्मेति प्रविवेश ह रेतः ॥ १२ ॥

तथा चक्षुर्होचक्रामेत्यादि पूर्ववत् । श्रोत्रं मनः प्रजातिरिति ॥

अथ ह प्राण उत्क्रमिष्यन्यथा महासुहयः सैन्धवः पड्वीशशङ्कून्संवृहेदेवꣳ हैवेमान्प्राणान्संववर्ह ते होचुर्मा भगव उत्क्रमीर्न वै शक्ष्यामस्त्वदृते जीवितुमिति तस्यो मे बलिं कुरुतेति तथेति ॥ १३ ॥

अथ ह प्राण उत्क्रमिष्यन् उत्क्रमणं करिष्यन् ; तदानीमेव स्वस्थानात्प्रचलिता वागादयः । किमिवेत्याह—यथा लोके, महांश्चासौ सुहयश्च महासुहयः, शोभनो हयः लक्षणोपेतः, महान् परिमाणतः, सिन्धुदेशे भवः सैन्धवः अभिजनतः, पड्वीशशङ्कून् पादबन्धनशङ्कून्, पड्वीशाश्च ते शङ्कवश्च तान्, संवृहेत् उद्यच्छेत् युगपदुत्खनेत् अश्वारोहे आरूढे परीक्षणाय ; एवं ह एव इमान् वागादीन् प्राणान् संववर्ह उद्यत-

वान् स्वस्थानात् भ्रंशितवान् । ते वागादयः ह ऊचुः— हे भगवः भगवन् मा उत्क्रमीः, यस्मात् न वै शक्ष्यामः त्वदृते त्वां विना जीवितुमिति । यद्येवं मम श्रेष्ठता विज्ञाता भवद्भिः, अहमत्र श्रेष्ठः, तस्य उ मे मम बलिं करं कुरुत करं प्रयच्छतेति । अयं च प्राणसंवादः कल्पितः विदुषः श्रेष्ठपरीक्षणप्रकारोपदेशः ; अनेन हि प्रकारेण विद्वान् को नु खलु अत्र श्रेष्ठ इति परीक्षणं करोति ; स एष परीक्षणप्रकारः संवादभूतः कथ्यते ; न हि अन्यथा संहत्यकारिणां सताम् एषाम् अञ्जसैव संवत्सरमात्रमेव एकैकस्य निर्गमनादि उपपद्यते ; तस्मात् विद्वानेव अनेन प्रकारेण विचारयति वागादीनां प्रधानबुभुत्सुः उपासनाय ; बलिं प्रार्थिताः सन्तः प्राणाः, तथेति प्रतिज्ञातवन्तः ॥

सा ह वागुवाच यद्वा अहं वसिष्ठास्मि त्वं तद्वसिष्ठोऽसीति यद्वा अहं प्रतिष्ठास्मि त्वं तत्प्रतिष्ठोऽसीति चक्षुर्यद्वा अहꣳ संपदस्मि त्वं तत्संपदसीति श्रोत्रं यद्वा अहमायतनमस्मि त्वं तदायतनमसीति मनो यद्वा अहं प्रजातिरस्मि त्वं तत्प्रजातिरसीति रेतस्तस्यो मे किमन्नं

किं वास इति यदिदं किंचाश्वभ्य आ कृमिभ्य आ कीटपतङ्गेभ्यस्तत्तेऽन्नमापो वास इति न ह वा अस्यानन्नं जग्धं भवति नानन्नं प्रतिगृहीतं य एवमेतदनस्यान्नं वेद तद्विद्वाꣳसः श्रोत्रिया अशिष्यन्त आचामन्त्यशित्वाचामन्त्येतमेव तदनमनन्नं कुर्वन्तो मन्यन्ते ॥ १४ ॥

इति प्रथमं ब्राह्मणम् ॥

सा ह वाक् प्रथमं बलिदानाय प्रवृत्ता ह किल उवाच उक्तवती— यत् वै अहं वसिष्ठास्मि, यत् मम वसिष्ठत्वम्, तत् तवैव; तेन वसिष्ठगुणेन त्वं तद्वसिष्ठोऽसीति । यत् वै अहं प्रतिष्ठास्मि, त्वं तत्प्रतिष्ठोऽसि, या मम प्रतिष्ठा सा त्वमसीति चक्षुः । समानम् अन्यत् । संपदायतनप्रजातित्वगुणान् क्रमेण समर्पितवन्तः । यद्येवम्, साधु बलिं दत्तवन्तो भवन्तः; ब्रूत— तस्य उ मे एवंगुणविशिष्टस्य किमन्नम्, किं वास इति; आहुरितरे— यदिदं लोके किंच किंचित् अन्नं नाम आ श्वभ्यः आ कृमिभ्यः आ कीटपतङ्गेभ्यः, यच्च श्वान्नं कृम्यन्नं कीटपतङ्गान्नं च, तेन सह सर्वमेव यत्किंचित्

प्राणिभिरद्यमानम् अन्नम्, तत्सर्वं तवान्नम् । सर्वं प्राणस्यान्नमिति दृष्टिः अत्र विधीयते ॥

केचित्तु सर्वभक्षणे दोषाभावं वदन्ति प्राणान्नविदः; तत् असत्, शास्त्रान्तरेण प्रतिषिद्धत्वात् । तेनास्य विकल्प इति चेत्, न, अविधायकत्वात् । न ह वा अस्यानन्नं जग्धं भवतीति— सर्वं प्राणस्यान्नमित्येतस्य विज्ञानस्य विहितस्य स्तुत्यर्थमेतत्; तेनैकवाक्यतापत्तेः; न तु शास्त्रान्तरविहितस्य बाधने सामर्थ्यम्, अन्यपरत्वादस्य । प्राणमात्रस्य सर्वमन्नम् इत्येतद्दर्शनम् इह विधित्सितम्, न तु सर्वं भक्षयेदिति । यत्तु सर्वभक्षणे दोषाभावज्ञानम्, तत् मिथ्यैव, प्रमाणाभावात् । विदुषः प्राणत्वात् सर्वान्नोपपत्तेः सामर्थ्यात् अदोष एवेति चेत्, न, अशेषान्नत्वानुपपत्तेः; सत्यं यद्यपि विद्वान् प्राणः, येन कार्यकरणसंघातेन विशिष्टस्य विद्वत्ता तेन कार्यकरणसंघातेन कृमिकीटदेवाद्यशेषान्नभक्षणं नोपपद्यते; तेन तत्र अशेषान्नभक्षणे दोषाभावज्ञापनमनर्थकम्, अप्राप्तत्वादशेषान्नभक्षणदोषस्य । ननु प्राणः सन् भक्षयत्येव कृमिकीटाद्यन्नमपि; बाढम्, किंतु न तद्विषयः प्रतिषेधोऽस्ति; तस्मात्— दैवरक्तं किंशुकम्— तत्र दोषाभावः; अतः तद्रूपेण दोषाभावज्ञापनमनर्थकम्, अप्राप्तत्वात् अशेषान्नभक्षणदोष-

स्य। येन तु कार्यकरणसंघातसंबन्धेन प्रतिषेधः क्रियते, तत्संबन्धेन तु इह नैव प्रतिप्रसवोऽस्ति। तस्मात् तत्प्रतिषेधातिक्रमे दोष एव स्यात्, अन्यविषयत्वात् 'न ह वै' इत्यादेः। न च ब्राह्मणादिशरीरस्य सर्वान्नत्वदर्शनमिह विधीयते, किंतु प्राणमात्रस्यैव। यथा च सामान्येन सर्वान्नस्य प्राणस्य किंचित् अन्नजातं कस्यचित् जीवनहेतुः, यथा विषं विषजस्य क्रिमेः, तदेव अन्यस्य प्राणान्नमपि सत् दृष्टमेव दोषमुत्पादयति मरणादिलक्षणम्— तथा सर्वान्नस्यापि प्राणस्य प्रतिषिद्धान्नभक्षणे ब्राह्मणत्वादिदेहसंबन्धात् दोष एव स्यात्। तस्मात् मिथ्याज्ञानमेव अभक्ष्यभक्षणे दोषाभावज्ञानम्॥

आपो वास इति; आपः भक्ष्यमाणाः वासःस्थानीयास्तव। अत्र च प्राणस्य आपो वास इत्येतद्दर्शनं विधीयते; न तु वासःकार्ये आपो विनियोक्तुं शक्याः; तस्मात् यथाप्राप्ते अब्भक्षणे दर्शनमात्रं कर्तव्यम्। न ह वै अस्य सर्वं प्राणस्यान्नमित्येवंविदः अनन्नम् अनदनीयं जग्धं भुक्तं न भवति ह; यद्यपि अनेन अनदनीयं भुक्तम्, अदनीयमेव भुक्तं स्यात्, न तु तत्कृतदोषेण लिप्यते— इत्येतत् विद्यास्तुतिरित्यवोचाम। तथा न अनन्नं प्रतिगृहीतम्; यद्यपि अप्रतिग्राह्यं

हस्त्यादि प्रतिगृहीतं स्यात् तदपि अन्नमेव प्रतिग्राह्यं प्रतिगृहीतं स्यात्, तत्रापि अप्रतिग्राह्यप्रतिग्रहदोषेण न लिप्यत इति स्तुत्यर्थमेव; य एवम् एतत् अनस्य प्राणस्य अन्नं वेद; फलं तु प्राणात्मभाव एव; न त्वेतत् फलाभिप्रायेण, किं तर्हि स्तुत्यभिप्रायेणेति। ननु एतदेव फलं कस्मान्न भवति? न, प्राणात्मदर्शिनः प्राणात्मभाव एव फलम्; तत्र च प्राणात्मभूतस्य सर्वात्मनः अनदनीयमपि आद्यमेव, तथा अप्रतिग्राह्यमपि प्रतिग्राह्यमेव— इति यथाप्राप्तमेव उपादाय विद्या स्तूयते; अतो नैव फलविधिसरूपता वाक्यस्य। 'यस्मात् आपो वासः प्राणस्य, तस्मात् विद्वांसः ब्राह्मणाः श्रोत्रिया अधीतवेदाः, अशिष्यन्तः भोक्ष्यमाणाः, आचामन्ति अपः; अशित्वा आचामन्ति भुक्त्वा च उत्तरकालम् अपः भक्षयन्ति; तत्र तेषामाचामतां कोऽभिप्राय इत्याह—एतमेवानं प्राणम् अनग्नं कुर्वन्तो मन्यन्ते; अस्ति चैतत्— यो यस्मै वासो ददाति, स तम् अनग्नं करोमीति हि मन्यते; प्राणस्य च आपो वास इति ह्युक्तम्। यदपः पिबामि तत्प्राणस्य वासो ददामि इति विज्ञानं कर्तव्यमित्येवमर्थमेतत्। ननु भोक्ष्यमाणः भुक्तवांश्च प्रयतो भविष्यामीत्याचामति, तत्र च प्राणस्यानग्नताकरणार्थत्वे च द्विकार्य-

ता आचमनस्य स्यात्; न च कार्यद्वयम् आचमनस्य एकस्य युक्तम्; यदि प्रायत्यार्थम्, न अनग्नतार्थम्; अथ अनग्नतार्थम्, न प्रायत्यार्थम्; यस्मादेवम्, तस्मात् द्वितीयम् आचमनान्तरं प्राणस्यानग्नताकरणाय भवतु— न, क्रियाद्वित्वोपपत्तेः; द्वे ह्येते क्रिये, भोक्ष्यमाणस्य भुक्तवतश्च यत् आचमनं स्मृतिविहितम्, तत् प्रायत्यार्थं भवति क्रियामात्रमेव; न तु तत्र प्रायत्यं दर्शनादि अपेक्षते, तत्र च आचमनाङ्गभूतास्वप्सु वासोविज्ञानं प्राणस्य इतिकर्तव्यतया चोद्यते, न तु तस्मिन्क्रियमाणे आचमनस्य प्रायत्यार्थता बाध्यते, क्रियान्तरत्वादाचमनस्य। तस्मात् भोक्ष्यमाणस्य भुक्तवतश्च यत् आचमनम्, तत्र आपो वासः प्राणस्येति दर्शनमात्रं विधीयते, अप्राप्तत्वादन्यतः॥

इति षष्ठाध्यायस्य प्रथमं ब्राह्मणम्॥



द्वितीयं ब्राह्मणम् ॥

श्वेतकेतुर्ह वा आरुणेय इत्यस्य संबन्धः । खिलाधिकारोऽयम्; तत्र यदनुक्तं तदुच्यते । सप्तमाध्यायान्ते ज्ञानकर्मसमुच्चयकारिणा अग्नेर्मार्गयाचनं कृतम्— अग्ने नय सुपथेति । तत्र अनेकेषां पथां सद्भावः मन्त्रेण सामर्थ्यात्प्रदर्शितः, सुपथेति विशेषणात् । पन्थानश्च कृतविपाकप्रतिपत्तिमार्गाः; वक्ष्यति च 'यत्कृत्वा' इत्यादि । तत्र च कति कर्मविपाकप्रतिपत्तिमार्गा इति सर्वसंसारगत्युपसंहारार्थोऽयमारम्भः— एतावती हि संसारगतिः, एतावान् कर्मणो विपाकः स्वाभाविकस्य शास्त्रीयस्य च सविज्ञानस्येति । यद्यपि 'द्वया ह प्राजापत्याः' इत्यत्र स्वाभाविकः पाप्मा सूचितः, न च तस्येदं कार्यमिति विपाकः प्रदर्शितः; शास्त्रीयस्यैव तु विपाकः प्रदर्शितः त्र्यन्नात्मप्रतिपत्त्यन्तेन, ब्रह्मविद्यारम्भे तद्वैराग्यस्य विवक्षितत्वात् । तत्रापि केवलेन कर्मणा पितृलोकः, विद्यया विद्यासंयुक्तेन च कर्मणा देवलोक इत्युक्तम् । तत्र केन मार्गेण पितृलोकं प्रतिपद्यते, केन वा देवलोकमिति नोक्तम् । तच्च इह खिलप्रकरणे अशेषतो वक्तव्यमित्यत आरभ्यते । अन्ते च सर्वोपसंहारः शास्त्र-

स्येष्टः। अपि च एतावदमृतत्वमित्युक्तम्, न कर्मणः अमृतत्वाशा अस्तीति च; तत्र हेतुः नोक्तः; तदर्थश्चायमारम्भः। यस्मात् इयं कर्मणो गतिः, न नित्येऽमृतत्वे व्यापारोऽस्ति, तस्मात् एतावदेवामृतत्वसाधनमिति सामर्थ्यात् हेतुत्वं संपद्यते। अपि च उक्तमग्निहोत्रे— न त्वेवैतयोस्त्वमुत्क्रान्तिं न गतिं न प्रतिष्ठां न तृप्तिं न पुनरावृत्तिं न लोकं प्रत्युत्थायिनं वेत्थेति; तत्र प्रतिवचने 'ते वा एते आहुती हुते उत्क्रामतः' इत्यादिना आहुतेः कार्यमुक्तम्; तच्चैतत् कर्तुः आहुतिलक्षणस्य कर्मणः फलम्; न हि कर्तारमनाश्रित्य आहुतिलक्षणस्य कर्मणः स्वातन्त्र्येण उत्क्रान्त्यादिकार्यारम्भ उपपद्यते, कर्त्रर्थत्वात्कर्मणः कार्यारम्भस्य, साधनाश्रयत्वाच्च कर्मणः; तत्र अग्निहोत्रस्तुत्यर्थत्वात् अग्निहोत्रस्यैव कार्यमित्युक्तं षट्प्रकारमपि; इह तु तदेव कर्तुः फलमित्युपदिश्यते षट्प्रकारमपि, कर्मफलविज्ञानस्य विवक्षितत्वात्। तद्द्वारेण च पञ्चाग्निदर्शनम् इह उत्तरमार्गप्रतिपत्तिसाधनं विधित्सितम्। एवम्, अशेषसंसारगत्युपसंहारः, कर्मकाण्डस्य एषा निष्ठा— इत्येतदयं दिदर्शयिषुः आख्यायिकां प्रणयति॥

श्वेतकेतुर्ह वा आरुणेयः पञ्चालानां

परिषदमाजगाम स आजगाम जैवलिं प्रवाहणं परिचारयमाणं तमुदीक्ष्याभ्युवाद कुमारा ३ इति स भो ३ इति प्रतिशुश्रावानुशिष्टोऽन्वसि पित्रेत्योमिति होवाच ॥ १ ॥

श्वेतकेतुः नामतः, अरुणस्यापत्यम् आरुणिः, तस्यापत्यम् आरुणेयः; ह-शब्दः ऐतिह्यार्थः; वै निश्चयार्थः; पित्रा अनुशिष्टः सन् आत्मनो यशःप्रथनाय पञ्चालानां परिषदमाजगाम, पञ्चालाः प्रसिद्धा, तेषां परिषदमागत्य, जित्वा, राज्ञोऽपि परिषदं जेष्यामीति गर्वेण स आजगाम; जीवलस्यापत्यं जैवलिं पञ्चालराजं प्रवाहणनामानं स्वभृत्यैः परिचारयमाणम् आत्मनः परिचरणं कारयन्तमित्येतत्, स राजा पूर्वमेव तस्य विद्याभिमानगर्वं श्रुत्वा, विनेतव्योऽयमिति मत्वा, तमुदीक्ष्य उत्प्रेक्ष्य आगतमात्रमेव अभ्युवाद अभ्युक्तवान्, कुमारा३ इति संबोध्य; भर्त्सनार्था प्लुतिः। एवमुक्त. सः प्रतिशुश्राव— भो३ इति। भो३ इति अप्रतिरूपमपि क्षत्रियं प्रति उक्तवान् क्रुद्धः सन्। अनुशिष्टः अनुशासितोऽसि भवसि किं पित्रा— इत्युवाच राजा। प्रत्याह इतरः—ओमिति, बाढमनुशिष्टोऽस्मि, पृच्छ यदि संशयस्ते ॥

वेत्थ यथेमाः प्रजाः प्रयत्यो विप्रतिपद्यन्ता ३ इति नेति होवाच वेत्थो यथेमं लोकं पुनरापद्यन्ता ३ इति नेति हैवोवाच वेत्थो यथासौ लोक एवं बहुभिः पुनः पुनः प्रयद्भिर्न संपूर्यता ३ इति नेति हैवोवाच वेत्थो यतिथ्यामाहुत्याꣳ हुतायामापः पुरुषवाचो भूत्वा समुत्थाय वदन्ती ३ इति नेति हैवोवाच वेत्थो देवयानस्य वा पथः प्रतिपदं पितृयाणस्य वा यत्कृत्वा देवयानं वा पन्थानं प्रतिपद्यन्ते पितृयाणं वापि हि न ऋषेर्वचः श्रुतं द्वे सृती अशृणवं पितृणामहं देवानामुत मर्त्यानां ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं चेति नाहमत एकंचन वेदेति होवाच ॥ २ ॥

यद्येवम्, वेत्थ विजानासि किम्, यथा येन प्रकारेण इमाः प्रजाः प्रसिद्धाः, प्रयत्यः म्रियमाणाः, विप्रतिपद्यन्ता ३ इति विप्रतिपद्यन्ते; विचारणार्था प्लुतिः; समानेन मार्गेण

गच्छन्तीनां मार्गद्वैविध्यं यत्र भवति, तत्र काश्चित्प्रजा अन्येन मार्गेण गच्छन्ति काश्चिदन्येनेति विप्रतिपत्तिः; यथा ताः प्रजा विप्रतिपद्यन्ते, तत् किं वेत्थेत्यर्थः। नेति होवाच इतरः। तर्हि वेत्थ उ यथा इमं लोकं पुनः आपद्यन्ता३ इति, पुनरापद्यन्ते, यथा पुनरागच्छन्ति इमं लोकम्। नेति हैवोवाच श्वेतकेतुः। वेत्थ उ यथा असौ लोक एवं प्रसिद्धेन न्यायेन पुनः पुनरसकृत् प्रयद्भिः म्रियमाणैः यथा येन प्रकारेण न संपूर्यता३ इति, न संपूर्यतेऽसौ लोकः, तत्किं वेत्थ। नेति हैवोवाच। वेत्थ उ यतिथ्यां यत्संख्याकायाम् आहुत्याम् आहुतौ हुतायम् आपः पुरुषवाचः, पुरुषस्य या वाक् सैव यासां वाक्, ताः पुरुषवाचो भूत्वा पुरुषशब्दवाच्या वा भूत्वा; यदा पुरुषाकारपरिणताः, तदा पुरुषवाचो भवन्ति; समुत्थाय सम्यगुत्थाय उद्भूताः सत्यः वदन्ती३ इति। नेति हैवोवाच। यद्येवं वेत्थ उ देवयानस्य पथो मार्गस्य प्रतिपदम्, प्रतिपद्यते येन सा प्रतिपत् तां प्रतिपदम्, पितृयाणस्य वा प्रतिपदम्; प्रतिपच्छब्दवाच्यमर्थमाह— यत्कर्म कृत्वा यथाविशिष्टं कर्म कृत्वेत्यर्थः, देवयानं वा पन्थानं मार्गं प्रतिपद्यन्ते, पितृयाणं वा यत्कर्म कृत्वा प्रतिपद्यन्ते, तत्कर्म प्रतिपदुच्यते; तां प्रतिपदं

किं वेत्थ, देवलोकपितृलोकप्रतिपत्तिसाधनं किं वेत्थेत्यर्थः । अप्यत्र अन्यार्थस्य प्रकाशकम् ऋषेः मन्त्रस्य वचः वाक्यम् नः श्रुतमस्ति, मन्त्रोऽपि अस्यार्थस्य प्रकाशको विद्यत इत्यर्थः । कोऽसौ मन्त्र इत्युच्यते— द्वे सृती द्वौ मार्गावशृणवं श्रुतवानस्मि ; तयोः एका पितृणां प्रापिका पितृलोकसंबद्धा , तया सृत्या पितृलोकं प्राप्नोतीत्यर्थः ; अहमशृणवमिति व्यवहितेन संबन्धः ; देवानाम् उत अपि देवानां संबन्धिनी अन्या, देवान्प्रापयति सा । के पुनः उभाभ्यां सृतिभ्यां पितॄन् देवांश्च गच्छन्तीत्युच्यते— उत अपि मर्त्यानां मनुष्याणां संबन्धिन्यौ ; मनुष्या एव हि सृतिभ्यां गच्छन्तीत्यर्थः । ताभ्यां सृतिभ्याम् इदं विश्वं समस्तम् एजत् गच्छत् समेति संगच्छते । ते च द्वे सृती यदन्तरा ययोरन्तरा यदन्तरा, पितरं मातरं च, मातापित्रोः अन्तरा मध्ये इत्यर्थः । कौ तौ मातापितरौ ? द्यावापृथिव्यौ अण्डकपाले ; 'इयं वै माता असौ पिता' इति हि व्याख्यातं ब्राह्मणेन । अण्डकपालयोर्मध्ये संसारविषये एव एते सृती, न आत्यन्तिकामृतत्वगमनाय । इतर आह— न अहम् अतः अस्मात् प्रश्नसमुदायात् एकंचन एकमपि प्रश्नम् , न वेद, नाहं वेदेति होवाच श्वेतकेतुः ॥

अथैनं वसत्योपमन्त्रयांचक्रेऽनादृत्य वसतिं कुमारः प्रदुद्राव स आजगाम पितरं तꣳ होवाचेति वाव किल नो भवान्पुरानुशिष्टानवोच इति कथꣳ सुमेध इति पञ्च मा प्रश्नान्राजन्यबन्धुरप्राक्षीत्ततो नैकंचन वेदेति कतमे त इतीम इति ह प्रतीकान्युदाजहार ॥ ३ ॥

अथ अनन्तरम् अपनीय विद्याभिमानगर्वम् एनं प्रकृतं श्वेतकेतुम्, वसत्या वसतिप्रयोजनेन उपमन्त्रयांचक्रे; इह वसन्तु भवन्तः, पाद्यमर्घ्यं च आनीयताम्— इत्युपमन्त्रणं कृतवान्राजा। अनादृत्य तां वसतिं कुमारः श्वेतकेतुः प्रदुद्राव प्रतिगतवान् पितरं प्रति। स च आजगाम पितरम्, आगत्य च उवाच तम्, कथमिति— वाव किल एवं किल, नः अस्मान् भवान् पुरा समावर्तनकाले अनुशिष्टान् सर्वाभिर्विद्याभिः अवोचः अवोचदिति। सोपालम्भं पुत्रस्य वचः श्रुत्वा आह पिता— कथं केन प्रकारेण तव दुःखमुपजातम्, हे सुमेधः, शोभना मेधा यस्येति सुमेधाः। शृणु, मम यथा वृत्तम्; पञ्च पञ्चसंख्याकान् प्रश्नान् मा मां राजन्यबन्धुः

राजन्या बन्धवो यस्येति; परिभववचनमेतत् राजन्यबन्धु-रिति; अप्राक्षीत् पृष्टवान्; ततः तस्मात् न एकंचन एकमपि न वेद न विज्ञातवानस्मि। कतमे ते राज्ञा पृष्टाः प्रश्ना इति पित्रा उक्तः पुत्रः 'इमे ते' इति ह प्रतीकानि मुखानि प्रश्नानाम् उदाजहार उदाहृतवान् ॥

स होवाच तथा नस्त्वं तात जानीथा यथा यदहं किंच वेद सर्वमहं तत्तुभ्य-मवोचं प्रेहि तु तत्र प्रतीत्य ब्रह्मचर्यं व-त्स्याव इति भवानेव गच्छत्विति स आ-जगाम गौतमो यत्र प्रवाहणस्य जैवले-रास तस्मा आसनमाहृत्योदकमाहार-यांचकाराथ हास्मा अर्घ्यं चकार तꣳ हो-वाच वरं भगवते गौतमाय दद्म इति ॥

स होवाच पिता पुत्रं क्रुद्धमुपशमयन्—तथा तेन प्रकारेण नः अस्मान् त्वम्, हे तात वत्स, जानीथा गृह्णीथाः, यथा यदहं किंच विज्ञानजातं वेद सर्वं तत् तुभ्यम् अवोचम् इत्येव जानीथाः; कोऽन्यो मम प्रियतरोऽस्ति त्वत्तः, यदहं रक्षिष्ये; अहमपि एतत् न जानामि, यत् राज्ञा पृष्टम्;

तस्मान् प्रेहि आगच्छ; तत्र प्रतीत्य गत्वा राज्ञि ब्रह्मचर्यं वत्स्यावो विद्यार्थमिति। स आह– भवानेव गच्छत्विति, नाहं तस्य मुखं निरीक्षितुमुत्सहे। स आजगाम, गौतमः गोत्रतो गौतमः, आरुणिः, यत्र प्रवाहणस्य जैवलेरास आसनम् आस्थायिका; षष्ठीद्वयं प्रथमास्थाने; तस्मै गौतमाय आगताय आसनम् अनुरूपम् आहृत्य उदकं भृत्यैराहारयांचकार; अथ ह अस्मै अर्घ्यं पुरोधसा कृतवान् मन्त्रवत्, मधुपर्कं च। कृत्वा चैवं पूजां तं होवाच– वरं भगवते गौतमाय तुभ्यं दद्म इति गोश्वादिलक्षणम्॥

स होवाच प्रतिज्ञातो म एष वरो यां तु कुमारस्यान्ते वाचमभाषथास्तां मे ब्रूहीति॥ ५॥

स होवाच गौतमः– प्रतिज्ञातः मे मम एष वरः त्वया; अस्यां प्रतिज्ञायां दृढीकुरु आत्मानम्; यां तु वाचं कुमारस्य मम पुत्रस्य अन्ते समीपे वाचमभाषथाः प्रश्नरूपाम्, तामेव मे ब्रूहि; स एव नो वर इति॥

स होवाच दैवेषु वै गौतम तद्वरेषु मानुषाणां ब्रूहीति॥ ६॥

स होवाच राजा— दैवेषु वरेषु तद्वै गौतम, यत् त्वं प्रार्थयसे; मानुषाणामन्यतमं प्रार्थय वरम् ॥

स होवाच विज्ञायते ह्यस्ति हिरण्यस्यापात्तं गोअश्वानां दासीनां प्रवाराणां परिदानस्य मा नो भवान्बहोरनन्तस्यापर्यन्तस्याभ्यवदान्यो भूदिति स वै गौतम तीर्थेनेच्छासा इत्युपैम्यहं भवन्तमिति वाचा ह स्मैव पूर्व उपयन्ति स होपायनकीर्त्योवास ॥ ७ ॥

स होवाच गौतमः— भवतापि विज्ञायते ह ममास्ति सः; न तेन प्रार्थितेन कृत्यं मम, यं त्वं दित्ससि मानुषं वरम्; यस्मात् ममाप्यस्ति हिरण्यस्य प्रभूतस्य अपात्तं प्राप्तम्; गोअश्वानाम् अपात्तमस्तीति सर्वत्रानुषङ्गः; दासीनाम्, प्रवाराणां परिवाराणाम्, परिधानस्य च; न च यत् मम विद्यमानम्, तत् त्वत्तः प्रार्थनीयम्, त्वया वा देयम्; प्रतिज्ञातश्च वरः त्वया; त्वमेव जानीषे, यदत्र युक्तम्, प्रतिज्ञा रक्षणीया तवेति; मम पुनः अयमभिप्रायः—मा भूत् नः अस्मान् अभि, अस्मानेव केवलान्प्रति, भवान् सर्वत्र वदान्यो

भूत्वा, अवदान्यो मा भून् कदर्यो मा भूदित्यर्थः; बहोः प्रभूतस्य, अनन्तस्य अनन्तफलस्येत्येतत्, अपर्यन्तस्य अपरिसमाप्तिकस्य पुत्रपौत्रादिगामिकस्येत्येतत्, ईदृशस्य वित्तस्य, मां प्रत्येव केवलम् अदाता मा भूद्भवान्; न च अन्यत्र अदेयमस्ति भवतः। एवमुक्त आह—स त्वं वै हे गौतम तीर्थेन न्यायेन शास्त्रविहितेन विद्यां मत्तः इच्छासै इच्छ अन्वागमुम्; इत्युक्तो गौतम आह— उपैमि उपगच्छामि शिष्यत्वेन अहं भवन्तमिति। वाचा ह स्मैव किल पूर्वे ब्राह्मणाः क्षत्रियान् विद्यार्थिनः सन्तः वैश्यान्वा, क्षत्रिया वा वैश्यान् आपदि उपयन्ति शिष्यवृत्त्या हि उपगच्छन्ति, न उपायनशुश्रूषादिभिः; अतः स गौतमः ह उपायनकीर्त्या उपगमनकीर्तनमात्रेणैव उवास उषितवान्, न उपायनं चकार ॥

स होवाच तथा नस्त्वं गौतम माप-
राधास्तव च पितामहा यथेयं विद्येतः
पूर्वं न कस्मिंश्चन ब्राह्मण उवास तां
त्वहं तुभ्यं वक्ष्यामि को हि त्वैवं ब्रुवन्त-
मर्हति प्रत्याख्यातुमिति ॥ ८ ॥

एवं गौतमेन आपदन्तरे उक्ते, स होवाच राजा पीडितं

मत्वा क्षामयन्— तथा नः अस्मान् प्रति, मा अपराधाः अपराधं मा कार्षीः, अस्मदीयोऽपराधः न ग्रहीतव्य इत्यर्थः; तव च पितामहाः अस्मत्पितामहेषु यथा अपराधं न जगृहुः, तथा पितामहानां वृत्तम् अस्मास्वपि भवता रक्षणीयमित्यर्थः। यथा इयं विद्या त्वया प्रार्थिता इतः त्वत्संप्रदानात्पूर्वम् प्राक् न कस्मिन्नपि ब्राह्मणे उवास उषितवती, तथा त्वमपि जानीषे; सर्वदा क्षत्रियपरम्परया इयं विद्या आगता; सा स्थितिः मयापि रक्षणीया, यदि शक्यते इति— उक्तम् 'दैवेषु गौतम तद्वरेषु मानुषाणां ब्रूहि' इति; न पुनः तव अदेयो वर इति; इतः परं न शक्यते रक्षितुम्; तामपि विद्याम् अहं तुभ्यं वक्ष्यामि। को हि अन्योऽपि हि यस्मात् एवं ब्रुवन्तं त्वाम् अर्हति प्रत्याख्यातुम्— न वक्ष्यामीति; अहं पुनः कथं न वक्ष्ये तुभ्यमिति ॥

असौ वै लोकोऽग्निर्गौतम तस्यादित्य एव समिद्रश्मयो धूमोऽहरर्चिर्दिशोऽङ्गारा अवान्तरदिशो विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुत्यै सोमो राजा संभवति ॥

असौ वै लोकोऽग्निर्गौतमेत्यादि– चतुर्थः प्रश्नः प्राथम्येन निर्णीयते; क्रमभङ्गस्तु एतन्निर्णयायत्तत्वादितरप्रश्ननिर्णयस्य। असौ द्यौर्लोकः अग्निः हे, गौतम; द्युलोके अग्निदृष्टिः अनग्नौ विधीयते, यथा योषित्पुरुषयोः; तस्य द्युलोकाग्नेः आदित्य एव समित्, समिन्धनात्; आदित्येन हि समिध्यते असौ लोकः; रश्मयो धूमः, समिध उत्थानसामान्यात्; आदित्याद्धि रश्मयो निर्गताः, समिधश्च धूमो लोके उत्तिष्ठति; अहः अर्चिः, प्रकाशसामान्यात्; दिशः अङ्गाराः, उपशमसामान्यात्; अवान्तरदिशो विस्फुलिङ्गाः, विस्फुलिङ्गवद्विक्षेपात्; तस्मिन् एतस्मिन् एवंगुणविशिष्टे द्युलोकाग्नौ, देवाः इन्द्रादयः, श्रद्धां जुह्वति आहुतिद्रव्यस्थानीयां प्रक्षिपन्ति; तस्या आहुत्याः आहुतेः सोमो राजा पितॄणां ब्राह्मणानां च संभवति। तत्र के देवाः कथं जुह्वति किं वा श्रद्धाख्यं हविरित्यतः उक्तमस्माभिः संबन्धे; 'नत्वेवैनयोस्त्वमुत्क्रान्तिम्' इत्यादिपदार्थषट्कनिर्णयार्थम् अग्निहोत्रे उक्तम्; 'ते वा एते अग्निहोत्राहुती हुते सत्यावुत्क्रामतः', 'ते अन्तरिक्षमाविशतः', 'ते अन्तरिक्षमाहवनीयं कुर्वाते वायुं समिधं मरीचीरेव शुक्रामाहुतिम्', 'ते अन्तरिक्षं तर्पयतः', 'ते तत उत्क्रामतः',

'ते दिवमाविशतः', 'ते दिवमाहवनीयं कुर्वाते आदित्यं समिधम्' इत्येवमादि उक्तम्। तत्र अग्निहोत्राहुती ससाधने एव उत्क्रामतः। यथा इह यैः साधनैर्विशिष्टे ये ज्ञायेते आहवनीयाग्निसमिद्धूमाङ्गारविस्फुलिङ्गाहुतिद्रव्यैः, ते तथैव उत्क्रामतः अस्माल्लोकात् अमुं लोकम्। तत्र अग्निः अग्नित्वेन, समित् समित्त्वेन, धूमो धूमत्वेन, अङ्गाराः अङ्गारत्वेन, विस्फुलिङ्गा विस्फुलिङ्गत्वेन, आहुतिद्रव्यमपि पयआद्याहुतिद्रव्यत्वेनैव सर्गादौ अव्याकृतावस्थायामपि परेण सूक्ष्मेण आत्मना व्यवतिष्ठते। तत् विद्यमानमेव ससाधनम् अग्निहोत्रलक्षणं कर्म अपूर्वेणात्मना व्यवस्थितं सत्, तत्पुनः व्याकरणकाले तथैव अन्तरिक्षादीनाम् आहवनीयाद्यग्न्यादिभावं कुर्वत् विपरिणमते। तथैव इदानीमपि अग्निहोत्राख्यं कर्म। एवम् अग्निहोत्राहुत्यपूर्वपरिणामात्मकं जगत् सर्वमिति आहुत्योरेव स्तुत्यर्थत्वेन उत्क्रान्त्याद्याः लोकं प्रत्युत्थायितान्ताः षट् पदार्थाः कर्मप्रकरणे अधस्तान्निर्णीताः। इह तु कर्तुः कर्मविपाकविवक्षायां द्युलोकाग्न्याद्यारभ्य पञ्चाग्निदर्शनम् उत्तरमार्गप्रतिपत्तिसाधनं विशिष्टकर्मफलोपभोगाय विधित्सितमिति द्युलोकाग्न्यादिदर्शनं प्रस्तूयते। तत्र ये आध्यात्मिकाः प्राणाः इह अग्निहोत्रस्य होतारः, ते एव आ-

धिदैविकत्वेन परिणताः सन्तः इन्द्रादयो भवन्ति; त एव तत्र होतारो द्युलोकाग्नौ; ते च इह अग्निहोत्रस्य फलभोगाय अग्निहोत्रं हुतवन्तः; ते एव फलपरिणामकालेऽपि तत्फलभोक्तृत्वात् तत्र तत्र होतृत्वं प्रतिपद्यन्ते, तथा तथा विपरिणममाना देवशब्दवाच्याः सन्तः। अत्र च यत् पयोद्रव्यम् अग्निहोत्रकर्माश्रयभूतम् इह आहवनीये प्रक्षिप्तम् अग्निना भक्षितम् अदृष्टेन सूक्ष्मेण रूपेण विपरिणतम् सह कर्त्रा यजमानेन असुं लोकम् धूमादिक्रमेण अन्तरिक्षम् अन्तरिक्षात् द्युलोकम् आविशति; ताः सूक्ष्मा आपः आहुतिकार्यभूता अग्निहोत्रसमवायिन्यः कर्तृसहिताः श्रद्धाशब्दवाच्याः सोमलोके कर्तुः शरीरान्तरारम्भाय द्युलोकं प्रविशन्त्यः हूयन्त इत्युच्यन्ते; ताः तत्र द्युलोकं प्रविश्य सोममण्डले कर्तुः शरीरमारभन्ते। तदेतदुच्यते— 'देवाः श्रद्धां जुह्वति, तस्या आहुत्यै सोमो राजा संभवति' इति, 'श्रद्धा वा आपः' इति श्रुतेः। 'वेत्थ यतिथ्यामाहुत्यां हुतायामापः पुरुषवाचो भूत्वा समुत्थाय वदन्ति' इति प्रश्नः; तस्य च निर्णयविषये 'असौ वै लोकोऽग्निः' इति प्रस्तुतम्; तस्मात् आपः कर्मसमवायिन्यः कर्तुः शरीरारम्भिकाः श्रद्धाशब्दवाच्या इति निश्चीयते। भूयस्त्वात् 'आपः पुरुषवाचः' इति व्यपदेशः, न तु

इतराणि भूतानि न सन्तीति; कर्मप्रयुक्तश्च शरीरारम्भः; कर्म च अप्समवायि; ततश्च अपां प्राधान्यं शरीरकर्तृत्वे; तेन च 'आपः पुरुषवाचः' इति व्यपदेशः; कर्मकृतो हि जन्मारम्भः सर्वत्र। तत्र यद्यपि अग्निहोत्राहुतिस्तुतिद्वारेण उत्क्रान्त्यादय. प्रस्तुताः षट्पदार्था अग्निहोत्रे, तथापि वैदिकानि सर्वाण्येव कर्माणि अग्निहोत्रप्रभृतीनि लक्ष्यन्ते; दाराग्निसंबद्धं हि पाङ्क्तं कर्म प्रस्तुत्योक्तम्— 'कर्मणा पितृलोकः' इति; वक्ष्यति च— 'अथ ये यज्ञेन दानेन तपसा लोकाञ्जयन्ति' इति ॥

पर्जन्यो वा अग्निर्गौतम तस्य संवत्सर एव समिदभ्राणि धूमो विद्युदर्चिरशनिरङ्गारा ह्रादुनयो विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः सोमꣳ राजानं जुह्वति तस्या आहुत्यै वृष्टिः संभवति ॥ १० ॥

पर्जन्यो वा अग्निर्गौतम, द्वितीय आहुत्याधारः आहुत्योरावृत्तिक्रमेण। पर्जन्यो नाम वृष्ट्युपकरणाभिमानी देवतात्मा। तस्य संवत्सर एव समित्; संवत्सरेण हि शरदादिभिर्ग्रीष्मान्तैः स्वावयवैर्विपरिवर्तमानेन पर्जन्योऽग्निर्दीप्यते।

अभ्राणि धूमः, धूमप्रभवत्वात् धूमवदुपलक्ष्यत्वाद्वा । विद्युत् अर्चिः, प्रकाशसामान्यात् । अशनिः अङ्गाराः, उपशान्तकाठिन्यसामान्याभ्याम् । ह्रादुनयः ह्रादुनयः स्तनयित्नुशब्दाः विस्फुलिङ्गाः, विक्षेपानेकत्वसामान्यात् । तस्मिन्नेतस्मिन्निति आहुत्यधिकरणनिर्देशः । देवा इति, ते एव होतारः सोमं राजानं जुह्वति; योऽसौ द्युलोकाग्नौ श्रद्धायां हुतायामभिनिर्वृत्तः सोमः, स द्वितीये पर्जन्याग्नौ हूयते; तस्याश्च सोमाहुतेर्वृष्टिः संभवति ॥

अयं वै लोकोऽग्निर्गौतम तस्य पृथिव्येव समिदग्निर्धूमो रात्रिरर्चिश्चन्द्रमा अङ्गारा नक्षत्राणि विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा वृष्टिं जुह्वति तस्या आहुत्या अन्नꣳ संभवति ॥ ११ ॥

अयं वै लोकोऽग्निर्गौतम । अयं लोक इति प्राणिजन्मोपभोगाश्रयः क्रियाकारकफलविशिष्टः, स तृतीयोऽग्निः । तस्याग्नेः पृथिव्येव समित्; पृथिव्या हि अयं लोकः अनेकप्राण्युपभोगसंपन्नया समिध्यते। अग्निः धूमः, पृथिव्याश्रयोत्थानसामान्यात्; पार्थिवं हि इन्धनद्रव्यम् आश्रित्य अग्निः

उत्तिष्ठति, यथा समिदाश्रयेण धूमः । रात्रिः अर्चिः, समित्संबन्धप्रभवसामान्यात्; अग्नेः समित्संबन्धेन हि अर्चिः संभवति, तथा पृथिवीसमित्संबन्धेन शर्वरी; पृथिवीछायां हि शार्वरं तम आचक्षते । चन्द्रमा अङ्गाराः, तत्प्रभवत्वसामान्यात्; अर्चिषो हि अङ्गाराः प्रभवन्ति, तथा रात्रौ चन्द्रमाः; उपशान्तत्वसामान्याद्वा । नक्षत्राणि विस्फुलिङ्गाः, विस्फुलिङ्गवद्विक्षेपसामान्यात् । तस्मिन्नेतस्मिन्नित्यादि पूर्ववत् । वृष्टिं जुह्वति, तस्या आहुतेः अन्नं संभवति, वृष्टिप्रभवत्वस्य प्रसिद्धत्वात् व्रीहियवादेरन्नस्य ॥

पुरुषो वा अग्निर्गौतम तस्य व्यात्तमेव समित्प्राणो धूमो वागर्चिश्चक्षुरङ्गाराः श्रोत्रं विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुत्यै रेतः संभवति ॥ १२ ॥

पुरुषो वा अग्निर्गौतम; प्रसिद्धः शिरःपाण्यादिमान् पुरुषः चतुर्थोऽग्निः तस्य व्यात्तं विवृतं मुखं समित्; विवृतेन हि मुखेन दीप्यते पुरुषः वचनस्वाध्यायादौ, यथा समिधा अग्निः । प्राणो धूमः तदुत्थानसामान्यात्; मुखाद्धि

प्राण उत्तिष्ठति। वाक् शब्दः अर्चिः व्यञ्जकत्वसामान्यात्; अर्चिश्च व्यञ्जकम्, तथा वाक् शब्दः अभिधेयव्यञ्जकः। चक्षुः अङ्गाराः, उपशमसामान्यात् प्रकाशाश्रयत्वाद्वा। श्रोत्रं विस्फुलिङ्गाः, विक्षेपसामान्यात्। तस्मिन् अन्नं जुह्वति। ननु नैव देवा अन्नमिह जुह्वतो दृश्यन्ते— नैष दोषः, प्राणानां देवत्वोपपत्तेः; अधिदैवम् इन्द्रादयो देवाः; ते एव अध्यात्मं प्राणाः; ते च अन्नस्य पुरुषे प्रक्षेप्तारः; तस्या आहुतेः रेतः संभवति; अन्नपरिणामो हि रेतः॥

योषा वा अग्निर्गौतम तस्या उपस्थ एव समिल्लोमानि धूमो योनिरार्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दा विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुत्यै पुरुषः संभवति स जीवति यावज्जीवत्यथ यदा म्रियते॥ १३॥

योषा वा अग्निर्गौतम। योषेति स्त्री पञ्चमो होमाधिकरणम् अग्निः तस्याः उपस्थ एव समित्; तेन हि सा समिध्यते। लोमानि धूमः, तदुत्थानसामान्यात्। योनिः अर्चिः, वर्णसामान्यात्। यदन्तः करोति, तेऽङ्गाराः; अन्तः-

करणं मैथुनव्यापारः, तेऽङ्गाराः, वीर्योपशमहेतुत्वसामान्यात्; वीर्याद्युपशमकारणं मैथुनम्, तथा अङ्गारभावः अग्नेरुपशमकारणम्। अभिनन्दाः सुखलवाः क्षुद्रत्वसामान्यात् विस्फुलिङ्गाः। तस्मिन् रेतो जुह्वति। तस्या आहुतेः पुरुषः संभवति। एवं द्युपर्जन्यायंलोकपुरुषयोषाग्निषु क्रमेण हूयमानाः श्रद्धासोमवृष्ट्यन्नरेतोभावेन स्थूलतारतम्यक्रममापद्यमानाः श्रद्धाशब्दवाच्या आपः पुरुषशब्दमारभन्ते। यः प्रश्नः चतुर्थः 'वेत्थ यतिष्यामाहुत्यां हुतायामापः पुरुषवाचो भूत्वा समुत्थाय वदन्ती३' इति, स एष निर्णीतः— पञ्चम्यामाहुतौ योषाग्नौ हुतायां रेतोभूता आपः पुरुषवाचो भवन्तीति। स पुरुषः एवं क्रमेण जातो जीवति; कियन्तं कालमित्युच्यते— यावज्जीवति यावदस्मिन् शरीरे स्थितिनिमित्तं कर्म विद्यते, तावदित्यर्थः। अथ तत्क्षये यदा यस्मिन्काले म्रियते॥

अथैनमग्नये हरन्ति तस्याग्निरेवाग्निर्भवति समित्समिद्धूमो धूमोऽर्चिरर्चिरङ्गारा विस्फुलिङ्गा विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः पुरुषं जुह्वति तस्या आहुत्यै पुरुषो भास्वरवर्णः संभवति ॥१४॥

अथ तदा एनं मृतम् अग्नये अग्न्यर्थमेव अन्त्याहुत्यै हरन्ति ऋत्विजः; तस्य आहुतिभूतस्य प्रसिद्धः अग्निरेव होमाधिकरणम्, न परिकल्प्योऽग्निः; प्रसिद्धैव समिन् समित्; धूमो धूमः; अर्चिः अर्चिः; अङ्गारा अङ्गाराः; विस्फुलिङ्गा विस्फुलिङ्गाः; यथाप्रसिद्धमेव सर्वमित्यर्थः। तस्मिन् पुरुषम् अन्त्याहुतिं जुह्वति; तस्यै आहुत्यै आहुतेः, पुरुषः भास्वरवर्णः अतिशयदीप्तिमान्, निषेकादिभिरन्त्याहुत्यन्तैः कर्मभिः संस्कृतत्वात्, संभवति निष्पद्यते ॥

ते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धाꣳ सत्यमुपासते तेऽर्चिरभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोकादादित्यमादित्याद्वैद्युतं तान्वैद्युतान्पुरुषो मानस एत्य ब्रह्मलोकान्गमयति ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति तेषां न पुनरावृत्तिः ॥ १५ ॥

इदानीं प्रथमप्रश्ननिराकरणार्थमाह— ते; के? ये एवं

यथोक्तं पञ्चाग्निदर्शनमेतत् विदुः; एवंशब्दात् अग्निसमिद्धूमार्चिरङ्गारविस्फुलिङ्गश्रद्धादिविशिष्टाः पञ्चाग्नयो निर्दिष्टाः; तान् एवम् एतान् पञ्चाग्नीन् विदुरित्यर्थः ॥

ननु अग्निहोत्राहुतिदर्शनाविषयमेव एतद्दर्शनम्; तत्र हि उक्तम् उत्क्रान्त्यादिपदार्थषट्कनिर्णये 'दिवमेवाहवनीयं कुर्वीते' इत्यादि; इहापि अमुष्य लोकस्याग्नित्वम्, आदित्यस्य च समित्त्वमित्यादि बहु साम्यम्; तस्मात् तच्छेषमेव एतद्दर्शनमिति—न, यतिथ्यामिति प्रश्नप्रतिवचनपरिग्रहात्; यतिथ्यामित्यस्य प्रश्नस्य प्रतिवचनस्य यावदेव परिग्रहः, तावदेव एवंशब्देन पराम्रष्टुं युक्तम्, अन्यथा प्रश्नानर्थक्यात्; निर्ज्ञातत्वाच्च संख्यायाः अग्रय एव वक्तव्याः; अथ निर्ज्ञातमप्यनूद्यते, यथाप्राप्तस्यैव अनुवदनं युक्तम्, न तु 'असौ लोकोऽग्निः' इति; अथ उपलक्षणार्थः, तथापि आद्येन अन्त्येन च उपलक्षणं युक्तम्। श्रुत्यन्तराच्च; समाने हि प्रकरणे छान्दोग्यश्रुतौ 'पञ्चाग्नीन्वेद' इति पञ्चसंख्याया एवोपादानात् अनग्निहोत्रशेषम् एतत् पञ्चाग्निदर्शनम्। यत्तु अग्निसमिदादिसामान्यम्, तत् अग्निहोत्रस्तुत्यर्थमित्यवोचाम; तस्मात् न उत्क्रान्त्यादिपदार्थषट्कपरिज्ञानात् अर्चिरादिप्रतिपत्तिः, एवमिति प्र-

कृतोपादानेन अर्चिरादिप्रतिपत्तिविधानात् ॥

के पुनस्ते, ये एवं विदुः? गृहस्था एव। ननु तेषां यज्ञादिसाधनेन धूमादिप्रतिपत्तिः विधित्सिता— न, अनेवंविदामपि गृहस्थानां यज्ञादिसाधनोपपत्तेः, भिक्षुवानप्रस्थयोश्च अरण्यसंबन्धेन ग्रहणात्, गृहस्थकर्मसंबद्धत्वाच्च पञ्चाग्निदर्शनस्य। अतः नापि ब्रह्मचारिणः 'एवं विदुः' इति गृह्यन्ते; तेषां तु उत्तरे पथि प्रवेशः स्मृतिप्रामाण्यात्— 'अष्टाशीतिसहस्राणामृषीणामूर्ध्वरेतसाम्। उत्तरेणार्यम्णः पन्थास्तेऽमृतत्वं हि भेजिरे' इति। तस्मात् ये गृहस्थाः एवम्—अग्निजोऽहम्, अग्न्यपत्यम्— इति, एवम् क्रमेण अग्निभ्यो जातः अग्निरूपः इत्येवम्, ये विदुः, ते च, ये च अमी अरण्ये वानप्रस्थाः परिव्राजकाश्चारण्यनित्याः, श्रद्धां श्रद्धायुक्ताः सन्तः, सत्यं ब्रह्म हिरण्यगर्भात्मानमुपासते, न पुनः श्रद्धां च उपासते, ते सर्वेऽर्चिरभिसंभवन्ति। यावत् गृहस्थाः पञ्चाग्निविद्यां सत्यं वा ब्रह्म न विदुः, तावत् श्रद्धाद्याहुतिक्रमेण पञ्चम्यामाहुतौ हुतायां ततो योषाग्नेर्जाताः, पुनर्लोकं प्रत्युत्थायिनः अग्निहोत्रादिकर्मानुष्ठातारो भवन्ति; तेन कर्मणा धूमादिक्रमेण पुनः पितृलोकम्, पुनः पर्जन्यादिक्रमेण इमम् आवर्तन्ते। ततः पुनर्योषाग्नेर्जाताः पुनः कर्म कृत्वा—इत्येवमेव

घटीयन्त्रवत् गत्यागतिभ्यां पुनः पुनः आवर्तन्ते। यदा तु एवं विदुः, ततो घटीयन्त्रभ्रमणाद्विनिर्मुक्ताः सन्तः अर्चिरभिसंभवन्ति; अर्चिरिति न अग्निज्वालामात्रम्, किं तर्हि अर्चिरभिमानिनी अर्चि.शब्दवाच्या देवता उत्तरमार्गलक्षणा व्यवस्थितैव; तामभिसंभवन्ति; न हि परिव्राजकानाम् अग्न्यर्चिषैव साक्षात्संबन्धोऽस्ति; तेन देवतैव परिगृह्यते अर्चिःशब्दवाच्या। अतः अहर्देवताम्; मरणकालनियमानुपपत्तेः अहःशब्दोऽपि देवतैव; आयुषः क्षये हि मरणम्; न हि एवंविदा अहन्येव मर्तव्यमिति अहः मरणकालो नियन्तुं शक्यते; न च रात्रौ प्रेताः सन्तः अहः प्रतीक्षन्ते, 'स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छति' इति श्रुत्यन्तरात्। अह्न आपूर्यमाणपक्षम्, अहर्देवतया अतिवाहिता आपूर्यमाणपक्षदेवतां प्रतिपद्यन्ते, शुक्लपक्षदेवतामित्येतत्। आपूर्यमाणपक्षात् यान् षण्मासान् उदङ् उत्तरां दिशम् आदित्यः सविता एति, तान्मासान्प्रतिपद्यन्ते शुक्लपक्षदेवतया अतिवाहिताः सन्तः; मासानिति बहुवचनात् संघचारिण्यः षट् उत्तरायणदेवताः; तेभ्यो मासेभ्यः षण्मासदेवताभिरतिवाहिताः देवलोकाभिमानिनीं देवतां प्रतिपद्यन्ते। देवलोकात् आदित्यम्; आदित्यात् वैद्युतं विद्युदभिमानिनीं देवतां

प्रतिपद्यन्ते । विद्युद्देवतां प्राप्तान् ब्रह्मलोकवासी पुरुषः ब्रह्मणा मनसा सृष्टो मानसः कश्चित् एत्य आगत्य ब्रह्मलोकान्नामयति; ब्रह्मलोकानिति अधरोत्तरभूमिभेदेन भिन्ना इति गम्यन्ते, बहुवचनप्रयोगात्, उपासनतारतम्योपपत्तेश्च । ते तेन पुरुषेण गमिताः सन्तः, तेषु ब्रह्मलोकेषु पराः प्रकृष्टाः सन्तः, स्वयं परावतः प्रकृष्टाः समाः संवत्सरानेकान् वसन्ति, ब्रह्मणोऽनेकान्कल्पान्वसन्तीत्यर्थः । तेषां ब्रह्मलोकं गतानां नास्ति पुनरावृत्तिः अस्मिन्संसारे न पुनरागमनम्, 'इह' इति शखान्तरपाठात्; इहेति आकृतिमात्रग्रहणमिति चेत्, 'श्वोभूते पौर्णमासीम्' इति यद्वत्—न, इहेतिविशेषणानर्थक्यात्, यदि हि नावर्तन्त एव इहग्रहणमनर्थकमेव स्यात्; 'श्वोभूते पौर्णमासीम्' इत्यत्र पौर्णमास्याः श्वोभूतत्वमनुक्तं न ज्ञायत इति युक्तं विशेषयितुम्; न हि तत्र श्वआकृतिः शब्दार्थो विद्यत इति श्वःशब्दो निरर्थक एव प्रयुज्यते; यत्र तु विशेषणशब्दे प्रयुक्ते अन्विष्यमाणे विशेषणफलं चेन्न गम्यते, तत्र युक्तो निरर्थकत्वेन उत्सृष्टुं विशेषणशब्दः; न तु सत्यां विशेषणफलावगतौ । तस्मात् अस्मात्कल्पादूर्ध्वम् आवृत्तिर्गम्यते ॥

अथ ये यज्ञेन दानेन तपसा लोकाञ्ज-

यन्ति ते धूममभिसंभवन्ति धूमाद्रात्रिꣳ रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षाद्यान्षण्मासान्दक्षिणादित्य एति मासेभ्यः पितृलोकं पितृलोकाच्चन्द्रं ते चन्द्रं प्राप्यान्नं भवन्ति ताꣳस्तत्र देवा यथा सोमꣳ राजानमाप्यायस्वापक्षीयस्वेत्येवमेनाꣳस्तत्र भक्षयन्ति तेषां यदा तत्पर्यवैत्यथेममेवाकाशमभिनिष्पद्यन्त आकाशाद्वायुं वायोर्वृष्टिं वृष्टेः पृथिवीं ते पृथिवीं प्राप्यान्नं भवन्ति ते पुनः पुरुषाग्नौ हूयन्ते ततो योषाग्नौ जायन्ते लोकान्प्रत्युत्थायिनस्त एवमेवानुपरिवर्तन्तेऽथ य एतौ पन्थानौ न विदुस्ते कीटाः पतङ्गा यदिदं दन्दशूकम् ॥

अथ पुनः ये नैवं विदुः, उत्क्रान्त्याद्यग्निहोत्रसंबद्धपदार्थषट्कस्यैव वेदितारः केवलकर्मिणः, यज्ञेनाग्निहोत्रादिना, दानेन बहिर्वेदि भिक्षमाणेषु द्रव्यसंविभागलक्षणेन, तपसा बहिर्वेद्येव दीक्षादिव्यतिरिक्तेन कृच्छ्रचान्द्रायणादिना, लोकान् जयन्ति; लोकानिति बहुवचनात् तत्रापि फलतारतम्यमभिप्रेतम् । ते धूममभिसंभवन्ति; उत्तरमार्ग इव इहा-

पि देवता एव धूमादिशब्दवाच्याः, धूमदेवतां प्रतिपद्यन्त इत्यर्थः; आतिवाहिकत्वं च देवतानां तद्वदेव। धूमान् रात्रिं रात्रिदेवताम्, ततः अपक्षीयमाणपक्षम् अपक्षीयमाणपक्षदेवताम्, ततो यान्षण्मासान् दक्षिणां दिशमादित्य एति तान् मासदेवताविशेषान प्रतिपद्यन्ते। मासेभ्यः पितृलोकम्, पितृलोकाच्चन्द्रम्। ते चन्द्रं प्राप्य अन्नं भवन्ति; तान् तत्रान्नभूतान्, यथा सोमं राजानमिह यज्ञे ऋत्विजः आप्यायस्व अपक्षीयस्वेति भक्षयन्ति, एवम् एनान् चन्द्रं प्राप्तान् कर्मिणः भृत्यानिव स्वामिनः भक्षयन्ति उपभुञ्जते देवाः; 'आप्यायस्वापक्षीयस्व' इति न मन्त्रः; किं तर्हि आप्याय्य आप्याय्य चमसस्थम्, भक्षणेन अपक्षयं च कृत्वा, पुनः पुनर्भक्षयन्तीत्यर्थः; एवं देवा अपि सोमलोके लब्धशरीरान् कर्मिणः उपकरणभूतान् पुनः पुनः विश्रामयन्तः कर्मानुरूपं फलं प्रयच्छन्तः—तद्धि तेषामाप्यायनं सोमस्य आप्यायनमिव उपभुञ्जते उपकरणभूतान् देवाः। तेषां कर्मिणाम् यदा यस्मिन्काले, तत् यज्ञदानादिलक्षणं सोमलोकप्रापकं कर्म, पर्यवैति परिगच्छति परिक्षीयत इत्यर्थः, अथ तदा इममेव प्रसिद्धमाकाशमभिनिष्पद्यन्ते; यास्ताः श्रद्धाशब्दवाच्या द्युलोकाग्नौ हुता आपः सोमाकारपरिणताः, याभिः सोमलोके कर्मिणामु-

पभोगाय शरीरमारब्धम् अन्मयम्, ताः कर्मक्षयात् हिमपिण्ड इवातपसंपर्कात् प्रविलीयन्ते; प्रविलीनाः सूक्ष्मा आकाशभूता इव भवन्ति; तदिदमुच्यते— 'इममेवाकाशमभिनिष्पद्यन्ते' इति। ते पुनरपि कर्मिणः तच्छरीराः सन्तः पुरोवातादिना इतश्च अमुतश्च नीयन्ते अन्तरिक्षगाः; तदाह— आकाशाद्वायुमिति। वायोर्वृष्टिं प्रतिपद्यन्ते; तदुक्तम्— पर्जन्याग्नौ सोमं राजानं जुह्वतीति। ततो वृष्टिभूता इमां पृथिवीं पतन्ति। ते पृथिवीं प्राप्य व्रीहियवादि अन्नं भवन्ति; तदुक्तम्— अस्मिँल्लोकेऽग्नौ वृष्टिं जुह्वति तस्या आहुत्या अन्नं संभवतीति। ते पुनः पुरुषाग्नौ हूयन्ते अन्नभूता रेतःसिचि; ततो रेतोभूता योषाग्नौ हूयन्ते; ततो जायन्ते; लोकं प्रत्युत्थायिनः ते लोकं प्रत्युत्तिष्ठन्तः अग्निहोत्रादिकर्म अनुतिष्ठन्ति। ततो धूमादिना पुनः पुनः सोमलोकम्, पुनरिमं लोकमिति— ते एवं कर्मिणः अनुपरिवर्तन्ते घटीयन्त्रवत् चक्रीभूता वंभ्रमतीत्यर्थः, उत्तरमार्गाय सद्योमुक्तये वा यावद्ब्रह्म न विदुः; 'इति नु कामयमानः संसरति' इत्युक्तम्। अथ पुनः ये उत्तरं दक्षिणं च एतौ पन्थानौ न विदुः, उत्तरस्य दक्षिणस्य वा पथः प्रतिपत्तये ज्ञानं कर्म वा नानुतिष्ठन्तीत्यर्थः;

ते किं भवन्तीत्युच्यते— ते कीटाः पतङ्गाः, यदिदं यच्चेदं दन्दशूकं दंशमशकमित्येतत्, भवन्ति । एवं हि इयं संसारगतिः कष्टा, अस्यां निमग्नस्य पुनरुद्धार एव दुर्लभः । तथा च श्रुत्यन्तरम्— 'तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्व' इति । तस्मात्सर्वोत्साहेन यथाशक्ति स्वाभाविककर्मज्ञानहानेन दक्षिणोत्तरमार्गप्रतिपत्तिसाधनं शास्त्रीयं कर्म ज्ञानं वा अनुतिष्ठेदिति वाक्यार्थः; तथा चोक्तम्— 'अतो वै खलु दुर्निष्प्रपतरं तस्माज्जुगुप्सेत' इति श्रुत्यन्तरात् मोक्षाय प्रयतेतेत्यर्थः । अत्रापि उत्तरमार्गप्रतिपत्तिसाधन एव महान् यत्नः कर्तव्य इति गम्यते, 'एवमेवानुपरिवर्तन्ते' इत्युक्तत्वात् । एवं प्रश्नाः सर्वे निर्णीताः; 'असौ वै लोकः' इत्यारभ्य 'पुरुषः संभवति' इति चतुर्थः प्रश्नः 'यतिष्यामाहुत्याम्' इत्यादिः प्राथम्येन; पञ्चमस्तु द्वितीयत्वेन देवयानस्य वा पथः प्रतिपदं पितृयाणस्य वेति दक्षिणोत्तरमार्गप्रतिपत्तिसाधनकथनेन; तेनैव च प्रथमोऽपि—अग्नेरारभ्य केचिदर्चिः प्रतिपद्यन्ते केचिद्धूममिति विप्रतिपत्तिः; पुनरावृत्तिश्च द्वितीय. प्रश्नः— आकाशादिक्रमेणेमं लोकमागच्छन्तीति; तेनैव— असौ लोको न संपूर्यते कीटपतङ्गादिप्रतिपत्तेश्च केषांचिदिति, तृतीयोऽपि प्रश्नो निर्णीतः ॥

इति षष्ठाध्यायस्य द्वितीयं ब्राह्मणम् ॥

तृतीयं ब्राह्मणम् ॥

स यः कामयेत महत्प्राप्नुयामित्युद-
गयन् आपूर्यमाणपक्षस्य पुण्याहे द्वाद-
शाहमुपसद्व्रती भूत्वौदुम्बरे कꣳसे चम-
से वा सर्वौषधं फलानीति संभृत्य प-
रिसमुह्य परिलिप्याग्निमुपसमाधाय प-
रिस्तीर्यावृताज्यꣳ सꣳस्कृत्य पुꣳसा नक्ष-
त्रेण मन्थꣳ संनीय जुहोति । यावन्तो
देवास्त्वयि जातवेदस्तिर्यञ्चो घ्नन्ति पुरु-
षस्य कामान् । तेभ्योऽहं भागधेयं जुहो-
मि ते मा तृप्ताः सर्वैः कामैस्तर्पयन्तु
स्वाहा । या तिरश्ची निपद्यतेऽहं विधर-
णी इति तां त्वा घृतस्य धारया यजे
सꣳराधनीमहꣳ स्वाहा ॥ १ ॥

स यः कामयेत । ज्ञानकर्मणोर्गतिरुक्ता; तत्र ज्ञानं स्व-
तन्त्रम्; कर्म तु दैवमानुषवित्तद्वयायत्तम्; तेन कर्मार्थं वित्त-
मुपार्जनीयम्; तच्च अप्रत्यवायकारिणोपायेनेति तदर्थं मन्था-

ख्यं कर्म आरभ्यते महत्त्वप्राप्तये; महत्त्वे च सति अर्थसिद्धं हि वित्तम्। तदुच्यते—स यः कामयेत, स यो वित्तार्थी कर्मण्यधिकृतः यः कामयेत; किम्? महन् महत्त्वम् प्राप्नुयाम्, महान्स्यामितीत्यर्थः। तत्र मन्थकर्मणो विधित्सितस्य कालोऽभिधीयते— उदगयने आदित्यस्य; तत्र सर्वत्र प्राप्तौ आपूर्यमाणपक्षस्य शुक्लपक्षस्य; तत्रापि सर्वत्र प्राप्तौ, पुण्याहे अनुकूले आत्मनः कर्मसिद्धिकर इत्यर्थः; द्वादशाहम्, यस्मिन्पुण्येऽनुकूले कर्म चिकीर्षति ततः प्राक् पुण्याहमेवारभ्य द्वादशाहम्, उपसद्व्रती, उपसत्सु व्रतम्, उपसदः प्रसिद्धा ज्योतिष्टोमे, तत्र च स्तनोपचयापचयद्वारेण पयोभक्षणं तद्व्रतम्; अत्र च तत्कर्मानुपसंहारात् केवलमितिकर्तव्यताशून्यं पयोभक्षणमात्रमुपादीयते; ननु उपसदो व्रतमिति यदा विग्रहः, तदा सर्वमितिकर्तव्यतारूपं ग्राह्यं भवति, तत् कस्मात् न परिगृह्यत इत्युच्यते— स्मार्तत्वात्कर्मणः; स्मार्तं हीदं मन्थकर्म। ननु श्रुतिविहितं सत् कथं स्मार्तं भवितुमर्हति— स्मृत्यनुवादिनी हि श्रुतिरियम्; श्रौतत्वे हि प्रकृतिविकारभावः; ततश्च प्राकृतधर्मग्राहित्वं विकारकर्मणः; न तु इह श्रौतत्वम्; अत एव च आवसथ्याग्नौ एतत्कर्म विधीयते, सर्वा च आवृत् स्मार्तैवेति।

उपसद्व्रती भूत्वा पयोव्रती सन्नित्यर्थः औदुम्बरे उदुम्बरवृक्षमये, कंसे चमसे वा, तस्यैव विशेषणम्– कंसाकारे चमसाकरे वा औदुम्बर एव ; आकारे तु विकल्पः, न औदुम्बरत्वे। अत्र सर्वौषधं सर्वासामोषधीनां समूहं यथासंभवं यथाशक्ति च सर्वा ओषधीः समाहृत्य ; तत्र ग्राम्याणां तु दश नियमेन ग्राह्या व्रीहियवाद्या वक्ष्यमाणाः ; अधिकग्रहणे तु न दोषः ; ग्राम्याणां फलानि च यथासंभवं यथाशक्ति च ; इतिशब्दः समस्तसंभारोपचयप्रदर्शनार्थः, अन्यदपि यत्संभरणीयं तत्सर्वं संभृत्येत्यर्थः ; क्रमस्तत्र गृह्योक्तो द्रष्टव्यः। परिसमूहनपरिलेपने भूमिसंस्कारः। अग्निमुपसमाधायेति वचनात् आवसथ्येऽग्नाविति गम्यते, एकवचनात् उपसमाधानश्रवणाच्च ; विद्यमानस्यैव उपसमाधानम् ; परिस्तीर्य दर्भान् ; आवृता– स्मार्तत्वात्कर्मणः स्थालीपाकावृत् परिगृह्यते– तया आज्यं संस्कृत्य ; पुंसा नक्षत्रेण पुंनाम्ना नक्षत्रेण पुण्याहसंयुक्तेन, मन्थं सर्वौषधफलपिष्टं तत्रौदुम्बरे चमसे दधनि मधुनि घृते च उपसिच्य एकया उपमन्थन्या उपसंमथ्य, संनीय मध्ये संस्थाप्य, औदुम्बरेण स्रुवेण आवापस्थाने आज्यस्य जुहोति एतैर्मन्त्रैः 'यावन्तो देवाः' इत्याद्यैः ॥

ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति प्राणाय स्वाहा वसिष्ठायै स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति वाचे स्वाहा प्रतिष्ठायै स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति चक्षुषे स्वाहा संपदे स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति श्रोत्राय स्वाहायतनाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति मनसे स्वाहा प्रजात्यै स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति रेतसे स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति ॥ २ ॥

अग्नये स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति सोमाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति भूः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति भुवः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति

स्वः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवम-
नयति भूर्भुवःस्वः स्वाहेत्यग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ब्रह्मणे स्वाहेत्य-
ग्नौ हुत्वा मन्थे सꣳस्रवमवनयति क्षत्रा-
य स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवन-
यति भूताय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳ-
स्रवमवनयति भविष्यते स्वाहेत्यग्नौ हु-
त्वा मन्थे सꣳस्रवमवनयति विश्वाय स्वा-
हेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति स-
र्वाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवम-
वनयति प्रजापतये स्वाहेत्यग्नौ हुत्वा
मन्थे सꣳस्रवमवनयति ॥ ३ ॥

ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेत्यारभ्य द्वे द्वे आहुती हुत्वा मन्थे संस्रवमवनयति, स्रुवावलेपनमाज्यं मन्थे संस्रावयति । एतस्मादेव ज्येष्ठाय श्रेष्ठायेत्यादिप्राणलिङ्गात् ज्येष्ठश्रेष्ठादिप्राणविद एव अस्मिन् कर्मण्यधिकारः । 'रेतसे' इत्यारभ्य एकैकामाहुतिं हुत्वा मन्थे संस्रवमवनयति, अपरया उपमन्थन्या पुनर्मथ्नाति ॥

अथैनमभिमृशति भ्रमदसि ज्वलदसि पूर्णमसि प्रस्तब्धमस्येकसभमसि हिंकृतमसि हिंक्रियमाणमस्युद्गीथमस्युद्गीयमानमसि श्रावितमसि प्रत्याश्रावितमस्यार्द्रे संदीप्तमसि विभूरसि प्रभूरस्यन्नमसि ज्योतिरसि निधनमसि संवर्गोऽसीति ॥ ४ ॥

अथैनमभिमृशति 'भ्रमदसि' इत्यनेन मन्त्रेण ॥

अथैनमुद्यच्छत्यामꣳस्यामꣳ हि ते महि स हि राजेशानोऽधिपतिः स मामꣳ राजेशानोऽधिपतिं करोत्विति ॥ ५ ॥

अथैनमुद्यच्छति सह पात्रेण हस्ते गृह्णाति 'आमंस्यामंहि ते महि' इत्यनेन ॥

अथैनमाचामति तत्सवितुर्वरेण्यम् । मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः । भूः स्वाहा । भर्गो देवस्य धीमहि । मधु नक्तमुतोषसो

मधुमत्पार्थिवꣳ रजः। मधु द्यौरस्तु नः पिता। भुवः स्वाहा। धियो यो नः प्रचोदयात्। मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः। स्वः स्वाहेति। सर्वां च सावित्रीमन्वाह सर्वाश्च मधुमतीरहमेवेदꣳ सर्वं भूयासं भूर्भुवः स्वः स्वाहेत्यन्तत आचम्य पाणी प्रक्षाल्य जघनेनाग्निं प्राक्शिराः संविशति प्रातरादित्यमुपतिष्ठते दिशामेकपुण्डरीकमस्यहं मनुष्याणामेकपुण्डरीकं भूयासमिति यथेतमेत्य जघनेनाग्निमासीनो वꣳशं जपति ॥ ६ ॥

अथैनम् आचामति भक्षयति, गायत्र्याः प्रथमपादेन मधुमत्या एकया व्याहृत्या च प्रथमया प्रथमग्रासमाचामति; तथा गायत्रीद्वितीयपादेन मधुमत्या द्वितीयया द्वितीयया च व्याहृत्या द्वितीयं ग्रासम्; तथा तृतीयेन गायत्रीपादेन तृतीयया मधुमत्या तृतीयया च व्याहृत्या तृतीयं

ग्रासम्। सर्वौ सावित्रीं सर्वाश्च मधुमतीरुक्त्वा 'अहमेवेदं सर्वं भूयासम्' इति च अन्ते 'भूर्भुवःस्वः स्वाहा' इति समस्तं भक्षयति। यथा चतुर्भिर्ग्रासैः तद्द्रव्यं सर्वं परिसमाप्यते, तथा पूर्वमेव निरूपयेत्। यत् पात्रावलिप्तम्, तत् पात्रं सर्वं निर्णिज्य तूष्णीं पिबेत्। पाणी प्रक्षाल्य आप आचम्य जघनेनाग्निं पश्चादग्नेः प्राक्शिराः संविशति। प्रातःसंध्यामुपास्य आदित्यमुपतिष्ठते 'दिशामेकपुण्डरीकम्' इत्यनेन मन्त्रेण। यथेतं यथागतम्, एत्य आगत्य जघनेनाग्निम् आसीनो वंशं जपति॥

तꣳ हैतमुद्दालक आरुणिर्वाजसनेयाय याज्ञवल्क्यायान्तेवासिन उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति॥ ७॥

एतमु हैव वाजसनेयो याज्ञवल्क्यो मधुकाय पैङ्ग्यायान्तेवासिन उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति॥ ८॥

एतमु हैव मधुकः पैङ्ग्यश्चूलाय भाग-

वित्तयेऽन्तेवासिन उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ९ ॥

एतमु हैव चूलो भागवित्तिर्जानकाय आयस्थूणायान्तेवासिन उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ १० ॥

एतमु हैव जानकिरायस्थूणः सत्यकामाय जाबालायान्तेवासिन उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ११ ॥

एतमु हैव सत्यकामो जाबालोऽन्तेवासिभ्य उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति तमेतं नापुत्राय वान्तेवासिने वा ब्रूयात् ॥ १२ ॥

'तं हैतमुद्दालकः' इत्यादि । सत्यकामो जाबालोऽन्तेवासिभ्य उक्त्वा उवाच— अपि यः एनं शुष्के स्थाणौ निषिञ्चेत्, जायेरन्नेव अस्मिन् शाखाः प्ररोहेयुः पलाशानि— इत्येवमन्तम् एनं मन्थम् उद्दालकात्प्रभृति एकैकाचार्यक्रमागतं सत्यकाम आचार्यो बहुभ्योऽन्तेवासिभ्य उक्त्वोवाच । किमन्यदुवाचेत्युच्यते— अपि यः एनं शुष्के स्थाणौ गतप्राणेऽपि एनं मन्थं भक्षणाय संस्कृतं निषिञ्चेत् प्रक्षिपेत्, जायेरन् उत्पद्येरन्नेव अस्मिन् स्थाणौ शाखा अवयवा वृक्षस्य, प्ररोहेयुश्च पलाशानि पर्णानि, यथा जीवतः स्थाणोः; किमुत अनेन कर्मणा कामः सिध्येदिति; ध्रुवफलमिदं कर्मेति कर्मस्तुत्यर्थमेतत् । विद्याधिगमे षट् तीर्थानि; तेषामिह सप्राणदर्शनस्य मन्थविज्ञानस्याधिगमे द्वे एव तीर्थे अनुज्ञायेते, पुत्रश्चान्तेवासी च ॥

चतुरौदुम्बरो भवत्यौदुम्बरः स्रुव औदुम्बरश्चमस औदुम्बर इध्म औदुम्बर्यौ उपमन्थन्यौ दश ग्राम्याणि धान्यानि भवन्तिं व्रीहियवास्तिलमाषा अणुप्रियंगवो गोधूमाश्च मसूराश्च खल्वाश्च खल-

कुलाश्च तान्पिष्टान्दधनि मधुनि घृत
उपसिञ्चत्याज्यस्य जुहोति ॥ १३ ॥

इति तृतीयं ब्राह्मणम् ॥

चतुरौदुम्बरो भवतीति व्याख्यातम् । दश ग्राम्याणि धान्यानि भवन्ति, ग्राम्याणां तु धान्यानां दश नियमेन ग्राह्या इत्यवोचाम । के त इति निर्दिश्यन्ते— व्रीहि-यवाः, तिलमाषाः, अणुप्रियंगवः अणवश्च अणुशब्दवाच्याः, कचिद्देशे प्रियंगव. प्रसिद्धाः कङ्गुशब्देन, खल्वा निष्पावाः वल्लशब्दवाच्या लोके, खलकुलाः कुलत्थाः । एतद्व्यतिरेकेण यथाशक्ति सर्वौषधयो ग्राह्याः फलानि च— इत्यवोचाम, अयाज्ञिकानि वर्जयित्वा ॥

इति षष्ठाध्यायस्य तृतीयं ब्राह्मणम् ॥



चतुर्थं ब्राह्मणम् ॥



एषां वै भूतानां पृथिवी रसः पृथिव्या आपोऽपामोषधय ओषधीनां पुष्पाणि पुष्पाणां फलानि फलानां पुरुषः पुरुषस्य रेतः ॥ १ ॥

यादृग्जन्मा यथोत्पादितः यैर्वा गुणैर्विशिष्टः पुत्र आत्मनः पितुश्च लोक्यो भवतीति, तत्संपादनाय ब्राह्मणमारभ्यते । प्राणदर्शिनः श्रीमन्थं कर्म कृतवतः पुत्रमन्थेऽधिकारः । यदा पुत्रमन्थं चिकीर्षति तदा श्रीमन्थं कृत्वा ऋतुकालं पत्न्याः प्रतीक्षत इत्येतत् रेतस ओषध्यादिरसतमत्वस्तुत्या अवगम्यते । एषां वै चराचराणां भूतानां पृथिवी रसः सारभूतः, सर्वभूतानां मध्विति ह्युक्तम् । पृथिव्या आपो रसः, अप्सु हि पृथिव्योता च प्रोता च । अपामोषधयो रसः, कार्यत्वात् रसत्वमोषध्यादीनाम् । ओषधीनां पुष्पाणि । पुष्पाणां फलानि । फलानां पुरुषः । पुरुषस्य रेतः, 'सर्वेभ्योऽङ्गेभ्यस्तेजः संभूतम्' इति श्रुत्यन्तरात् ॥

स ह प्रजापतिरीक्षांचक्रे हन्तास्मै प्रतिष्ठां कल्पयानीति स स्त्रियꣳ ससृजे ताꣳ सृष्ट्वाध उपास्त तस्मात्स्त्रियमध उपासीत स एतं प्राञ्चं ग्रावाणमात्मन एव समुदपारयत्तेनैनामभ्यसृजत् ॥ २ ॥

यत एवं सर्वभूतानां सारतमम् एतत् रेतः, अतः का नु खल्वस्य योग्या प्रतिष्ठेति स ह स्रष्टा प्रजापतिरीक्षांचक्रे। ईक्षां कृत्वा स स्त्रियं ससृजे। तां च सृष्ट्वा अध उपास्त मैथुनाख्यं कर्म अधउपासनं नाम कृतवान्। तस्मात्स्त्रियमध उपासीत; श्रेष्ठानुश्रयणा हि प्रजाः। अत्र वाजपेयसामान्यक्लृप्तिमाह— स एतं प्राञ्चं प्रकृष्टगतियुक्तम् आत्मनो ग्रावाणं सोमाभिषवोपलस्थानीयं काठिन्यसामान्यात् प्रजननेन्द्रियम्, उदपारयत् उत्पूरितवान् स्त्रीव्यञ्जनं प्रति; तेन एनां स्त्रियम् अभ्यसृजत् अभिसंसर्गं कृतवान्॥

तस्या वेदिरुपस्थो लोमानि बर्हिश्चर्माधिषवणे समिद्धो मध्यतस्तौ मुष्कौ स यावान्ह वै वाजपेयेन यजमानस्य लोको

भवति तावानस्य लोको भवति य एवं विद्वानधोपहासं चरत्यासाꣳ स्त्रीणाꣳ सुकृतं वृङ्क्तेऽथ य इदमविद्वानधोपहासं चरत्यास्य स्त्रियः सुकृतं वृञ्जते ॥ ३ ॥

तस्या वेदिरित्यादि सर्वं सामान्यं प्रसिद्धम् । समिद्धोऽग्निः मध्यतः स्त्रीव्यञ्जनस्य, तौ मुष्कौ अधिषवणफलके इति व्यवहितेन संबध्यते । वाजपेययाजिनो यावान् लोकः प्रसिद्धः, तावान् विदुषः मैथुनकर्मणो लोकः फलमिति स्तूयते । तस्मात् बीभत्सा नो कार्येति । य एवं विद्वानधोपहासं चरति आसां स्त्रीणां सुकृतं वृङ्क्ते आवर्जयति । अथ पुनः यः वाजपेयसंपत्तिं न जानाति अविद्वान् रेतसो रसतमत्वं च अधोपहासं चरति, आ अस्य स्त्रियः सुकृतम् आवृञ्जते अविदुषः ॥

एतद्ध स्म वै तद्विद्वानुद्दालक आरुणिराहैतद्ध स्म वै तद्विद्वान्नाको मौद्गल्य आहैतद्ध स्म वै तद्विद्वान्कुमारहारित आह बहवो मर्या ब्राह्मणायना निरिन्द्रि-

या विसुकृतोऽस्माल्लोकान्प्रयन्ति य इद-मविद्वाꣳसोऽधोपहासं चरन्तीति बहु वा इदꣳ सुप्तस्य वा जाग्रतो वा रेतः स्क-न्दति ॥ ४ ॥

एतद्ध स्म वै तत् विद्वान उद्दालक आरुणिः आह अधो-पहासाख्यं मैथुनकर्म वाजपेयसंपन्नं विद्वानित्यर्थः । तथा नाको मौद्गल्यः कुमारहारितश्च । किं त आहुरित्युच्यते— बहवो मर्या मरणधर्मिणो मनुष्याः, ब्राह्मणा अयनं येषां ते ब्राह्मणायनाः ब्रह्मबन्धवः जातिमात्रोपजीविन इत्येतत् , निरिन्द्रियाः विश्लिष्टेन्द्रियाः, विसुकृतः विगतसुकृतकर्माणः, अविद्वांसः मैथुनकर्मासक्ता इत्यर्थः ; ते किम् ? अस्मात् लोका-त् प्रयन्ति परलोकात् परिभ्रष्टा इति । मैथुनकर्मणोऽत्यन्तपा-पहेतुत्वं दर्शयति— य इदमविद्वांसोऽधोपहासं चरन्तीति ॥

श्रीमन्थं कृत्वा पत्न्या ऋतुकालं ब्रह्मचर्येण प्रतीक्षते ; यदि इदं रेतः स्कन्दति, बहु वा अल्पं वा, सुप्तस्य वा जाग्र-तो वा, रागप्राबल्यात्—

तदभिमृशेदनु वा मन्त्रयेत यन्मेऽद्य रेतः पृथिवीमस्कान्त्सीद्यदोषधीरप्यसर-

यदपः। इदमहं तद्रेत आददे पुनर्मामैत्विन्द्रियं पुनस्तेजः पुनर्भगः। पुनरग्निर्धिष्ण्या यथास्थानं कल्पन्तामित्यनामिकाङ्गुष्ठाभ्यामादायान्तरेण स्तनौ वा भ्रुवौ वा निमृज्यात् ॥ ५ ॥

तदभिमृशेत्, अनुमन्त्रयेत वा अनुजपेदित्यर्थः। यदा अभिमृशति, तदा अनामिकाङ्गुष्ठाभ्यां तद्रेत आदत्ते 'आददे' इत्येवमन्तेन मन्त्रेण; 'पुनर्माम्' इत्येतेन निमृज्यात् अन्तरेण मध्ये भ्रुवौ भ्रुवोर्वा, स्तनौ स्तनयोर्वा ॥

अथ यद्युदक आत्मानं पश्येत्तदभिमन्त्रयेत मयि तेज इन्द्रियं यशो द्रविणꣳ सुकृतमिति श्रीर्ह वा एषा स्त्रीणां यन्मलोद्रासास्तस्मान्मलोद्राससं यशस्विनीमभिक्रम्योपमन्त्रयेत ॥ ६ ॥

अथ यदि कदाचित् उदके आत्मानम् आत्मच्छायां पश्येत्, तत्रापि अभिमन्त्रयेत अनेन मन्त्रेण 'मयि तेजः' इति। श्रीर्ह वा एषा पत्नी स्त्रीणां मध्ये यत् यस्मात् मलो-

द्वासाः उद्गतमलवद्वासाः, तस्मात् तां मलोद्वाससं यशस्विनीं श्रीमतीमभिक्रम्य अभिगत्य उपमन्त्रयेत इदम्— अद्य आवाभ्यां कार्यं यत्पुत्रोत्पादनमिति, त्रिरात्रान्ते आप्लुताम् ॥

सा चेदस्मै न दद्यात्काममेनामवक्रीणीयात्सा चेदस्मै नैव दद्यात्काममेनां यष्ट्या वा पाणिना वोपहत्यातिक्रामेदिन्द्रियेण ते यशसा यश आदद इत्ययशा एव भवति ॥ ७ ॥

सा चेदस्मै न दद्यात् मैथुनं कर्तुम्, कामम् एनाम् अवक्रीणीयात् आभरणादिना ज्ञापयेत् । तथापि सा नैव दद्यात्, काममेनां यष्ट्या वा पाणिना वा उपहत्य अतिक्रामेत् मैथुनाय । शप्स्यामि त्वां दुर्भगां करिष्यामीति प्रख्याप्य, तामनेन मन्त्रेणोपगच्छेत्— 'इन्द्रियेण ते यशसा यश आददे' इति । सा तस्मात् तदभिशापात् वन्ध्या दुर्भगेति ख्याता अयशा एव भवति ॥

सा चेदस्मै दद्यादिन्द्रियेण ते यशसा यश आदधामीति यशस्विनावेव भवतः ॥

सा चेदस्मै दद्यात्, अनुगुणैव स्याद्भर्तुः, तदा अनेन मन्त्रेण उपगच्छेत् 'इन्द्रियेण ते यशसा यश आदधामि' इति; तदा यशस्विनावेव उभावपि भवतः ॥

स यामिच्छेत्कामयेत मेति तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधायोपस्थमस्या अभिमृश्य जपेदङ्गादङ्गात्संभवसि हृदयादधिजायसे। स त्वमङ्गकषायोऽसि दिग्धविद्धमिव मादयेमाममूं मयीति ॥ ९ ॥

स यां स्वभार्यामिच्छेत्– इयं मां कामयेतेति, तस्याम् अर्थं प्रजननेन्द्रियम् निष्ठाय निक्षिप्य, मुखेन मुखं संधाय, उपस्थमस्या अभिमृश्य, जपेदिमं मन्त्रम्— 'अङ्गादङ्गात्' इति ॥

अथ यामिच्छेन्न गर्भं दधीतेति तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधायाभिप्राण्यापान्यादिन्द्रियेण ते रेतसा रेत आदद इत्यरेता एव भवति ॥ १० ॥

अथ यामिच्छेत्– न गर्भं दधीत न धारयेत् गर्भिणी

मा भूदिति, तस्याम् अर्थमिति पूर्ववत्। अभिप्राण्य अभिप्राणनं प्रथमं कृत्वा, पश्चात् अपान्यात्—'इन्द्रियेण ते रेतसा रेत आददे' इत्यनेन मन्त्रेण; अरेता एव भवति, न गर्भिणी भवतीत्यर्थः॥

अथ यामिच्छेद्दधीतेति तस्यामर्थं निष्टाय मुखेन मुखꣳ संधायापान्याभिप्राण्यादिन्द्रियेण ते रेतसा रेत आदधामीति गर्भिण्येव भवति॥ ११॥

अथ यामिच्छेत्—दधीत गर्भमिति, तस्यामर्थमित्यादि पूर्ववत्। पूर्वविपर्ययेण अपान्य अभिप्राण्यात् 'इन्द्रियेण ते रेतसा रेत आदधामि' इति; गर्भिण्येव भवति॥

अथ यस्य जायायै जारः स्यात्तं चेद्विष्यादामपात्रेऽग्निमुपसमाधाय प्रतिलोमꣳ शरबर्हिस्तीर्त्वा तस्मिन्नेताः शरभृष्टीः प्रतिलोमाः सर्पिषाक्ता जुहुयान्मम समिद्धेऽहौषीः प्राणापानौ त आददेऽसाविति मम समिद्धेऽहौषीः पुत्रपशूꣳस्त

**आददेऽसाविति मम समिद्धेऽहौषीरिष्टा-
सुकृते त आददेऽसाविति मम समिद्धे-
ऽहौषीराशापराकाशौ त आददेऽसाविति
स वा एष निरिन्द्रियो विसुकृतोऽस्मा-
ल्लोकात्प्रैति यमेवंविद्ब्राह्मणः शपति त-
स्मादेवंविच्छ्रोत्रियस्य दारेण नोपहास-
मिच्छेदुत ह्येवंवित्परो भवति ॥ १२ ॥**

अथ पुनर्यस्य जायायै जारः उपपतिः स्यात्, तं चेत् द्विष्यान्, अभिचरिष्याम्येनमिति मन्येत, तस्येदं कर्म। आमपात्रे अग्निमुपसमाधाय सर्वं प्रतिलोमं कुर्यात्; तस्मिन् अग्नौ एताः शरभृष्टीः शरेषीकाः प्रतिलोमाः सर्पिषा अक्ताः घृताभ्यक्ताः जुहुयात् 'मम समिद्धेऽहौषीः' इत्याद्या आहुतीः; अन्ते सर्वासाम् असाविति नामग्रहणं प्रत्येकम्; स एषः एवंवित्, यं ब्राह्मणः शपति, सः विसुकृतः विगतपुण्यकर्मा प्रैति। तस्मात् एवंवित् श्रोत्रियस्य दारेण नोपहासमिच्छेत् नर्मापि न कुर्यात्, किमुत अधोपहासम्; हि यस्मात् एवंविदपि तावत् परो भवति शत्रुर्भवतीत्यर्थः ॥

अथ यस्य जायामार्तवं विन्देत्त्र्यहं

कꣳसेन पिबेदहतवासा नैनां वृषलो न वृषल्युपहन्यात्त्रिरात्रान्त आप्लुत्य व्रीहीनवघातयेत् ॥ १३ ॥

अथ यस्य जायाम् आर्तवं विन्देत् ऋतुभावं प्राप्नुयात्— इत्येवमादिग्रन्थः 'श्रीर्ह वा एषा स्त्रीणाम्' इत्यतः पूर्वं द्रष्टव्यः, सामर्थ्यात् । त्र्यहं कंसेन पिबेत्, अहतवासाश्च स्यात्; नैनां स्नाताम् अस्नातां च वृषलो वृषली वा नोपहन्यात् नोपस्पृशेत् । त्रिरात्रान्ते त्रिरात्रव्रतसमाप्तौ आप्लुत्य स्नात्वा अहतवासाः स्यादिति व्यवहितेन संबन्धः; ताम् आप्लुतां व्रीहीन् अवघातयेत् व्रीह्यवघाताय तामेव विनियुञ्ज्यात् ॥

स य इच्छेत्पुत्रो मे शुक्लो जायेत वेदमनुब्रुवीत सर्वमायुरियादिति क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १४ ॥

स य इच्छेत्— पुत्रो मे शुक्लो वर्णतो जायेत, वेदमेकमनुब्रुवीत, सर्वमायुरियात्— वर्षशतं क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयाताम् ईश्वरौ समर्थौ जनयितवै जनयितुम् ॥

अथ य इच्छेत्पुत्रो मे कपिलः पिङ्गलो जायेत द्वौ वेदावनुब्रुवीत सर्वमायुरियादिति दध्योदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥

दध्योदनं दध्ना चरुं पाचयित्वा; द्विवेदं चेदिच्छति पुत्रम्, तदा एवमशननियमः ॥

अथ य इच्छेत्पुत्रो मे श्यामो लोहिताक्षो जायेत त्रीन्वेदाननुब्रुवीत सर्वमायुरियादित्युदौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १६ ॥

केवलमेव स्वाभाविकमोदनम् । उदग्रहणम् अन्यप्रसङ्गनिवृत्त्यर्थम् ॥

अथ य इच्छेदुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १७ ॥

दुहितुः पाण्डित्यं गृहतन्त्रविषयमेव, वेदेऽनधिकारात् । तिलौदनं कृशरम् ॥

अथ य इच्छेत्पुत्रो मे पण्डितो विगीतः समितिंगमः शुश्रूषितां वाचं भाषिता जायेत सर्वान्वेदाननुब्रुवीत सर्वमायुरियादिति मांसौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवा औक्षेण वार्षभेण वा ॥ १८ ॥

विविधं गीतो विगीतः प्रख्यात इत्यर्थः; समितिंगमः सभां गच्छतीति प्रगल्भ इत्यर्थः, पाण्डित्यस्य पृथग्ग्रहणात्; शुश्रूषितां श्रोतुमिष्टां रमणीयां वाचं भाषिता संस्कृताया अर्थवत्या वाचो भाषितेत्यर्थः । मांसमिश्रमोदनं मांसौदनम् । तन्मांसनियमार्थमाह— औक्षेण वा मांसेन; उक्षा सेचनसमर्थः पुंगवः, तदीयं मांसम्, ऋषभः ततोऽप्यधिकवयाः, तदीयम् आर्षभं मांसम् ॥

अथाभिप्रातरेव स्थालीपाकावृताज्यं चेष्टित्वा स्थालीपाकस्योपघातं जुहोत्यग्नये स्वाहानुमतये स्वाहा देवाय सवित्रे सत्यप्रसवाय स्वाहेति हुत्वोद्धृत्य प्राश्ना-

ति प्राश्येतरस्याः प्रयच्छति प्रक्षाल्य पाणी उदपात्रं पूरयित्वा तेनैनां त्रिरभ्युक्षत्युत्तिष्ठातो विश्वावसोऽन्यामिच्छ प्रपूर्व्यां सं जायां पत्या सहेति ॥ १९ ॥

अथाभिप्रातरेव काले अवघातनिर्वृत्तान् तण्डुलानादाय स्थालीपाकावृता स्थालीपाकविधिना, आज्यं चेष्ट्वा, आज्यसंस्कारं कृत्वा, चरुं श्रपयित्वा, स्थालीपाकस्य आहुतीः जुहोति, उपघातम् उपहृत्योपहृत्य 'अग्नये स्वाहा' इत्याद्याः। गार्ह्यः सर्वो विधिः द्रष्टव्यः अत्र; हुत्वा उद्धृत्य चरुशेषं प्राश्नाति; स्वयं प्राश्य इतरस्याः पत्न्यै प्रयच्छति उच्छिष्टम्। प्रक्षाल्य पाणी आचम्य उदपात्रं पूरयित्वा तेनोदकेन एनां त्रिरभ्युक्षति अनेन मन्त्रेण 'उत्तिष्ठातः' इति, सकृन्मन्त्रोच्चारणम् ॥

अथैनामभिपद्यतेऽमोऽहमस्मि सा त्वꣳ सा त्वमस्यमोऽहं सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वं तावेहि सꣳरभावहै सह रेतो दधावहै पुꣳसे पुत्राय वित्तय इति ॥ २० ॥

अथैनामभिमन्त्र्य क्षीरौदनादि यथापत्यकामं भुक्त्वेति क्रमो द्रष्टव्यः । संवेशनकाले— 'अमोऽहमस्मि' इत्यादि-मन्त्रेणाभिपद्यते ॥

अथास्या ऊरू विहापयति विजिहीथां द्यावापृथिवी इति तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधाय त्रिरेनामनुलोमामनुमार्ष्टि विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिꣳशतु । आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते । गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके । गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ २१ ॥

अथास्या ऊरू विहापयति 'विजिहीथां द्यावापृथिवी' इत्यनेन । तस्यामर्थमित्यादि पूर्ववत् । त्रिः एनां शिरःप्रभृति अनुलोमामनुमार्ष्टि 'विष्णुर्योनिम्' इत्यादि प्रतिमन्त्रम् ॥

हिरण्मयी अरणी याभ्यां निर्मन्थतामश्विनौ । तं ते गर्भं हवामहे दशमे मासि सूतये । यथाग्निगर्भा पृथिवी यथा

द्यौरिन्द्रेण गर्भिणी । वायुर्दिशां यथा
गर्भ एवं गर्भं दधामि तेऽसाविति ॥ २२ ॥

अन्ते नाम गृह्णाति— असाविति तस्याः ॥

सोष्यन्तीमद्भिरभ्युक्षति । यथा वायुः
पुष्करिणीꣳ समिङ्गयति सर्वतः । एवा ते
गर्भ एजतु सहावैतु जरायुणा । इन्द्र-
स्यायं व्रजः कृतः सार्गलः सपरिश्रयः ।
तमिन्द्र निर्जहि गर्भेण सावराꣳ सहेति ॥

सोष्यन्तीम् अद्भिरभ्युक्षति प्रसवकाले सुखप्रसवनार्थम् अनेन मन्त्रेण— 'यथा वायुः पुष्करिणीं समिङ्गयति सर्वतः । एवा ते गर्भ एजतु' इति ॥

जातेऽग्निमुपसमाधायाङ्क आधाय क-
ꣳसे पृषदाज्यꣳ संनीय पृषदाज्यस्योप-
घातं जुहोत्यस्मिन्सहस्रं पुष्यासमेधमानः
स्वे गृहे । अस्योपसन्द्यां मा च्छैत्सीत्प्र-
जया च पशुभिश्च स्वाहा । मयि प्राणाꣳ-

**स्त्वयि मनसा जुहोमि स्वाहा । यत्क-
र्मणात्यरीरिचं यद्वा न्यूनमिहाकरम् । अ-
ग्निष्टत्स्विष्टकृद्विद्वान्त्स्विष्टꣳसुहुतं करोतु
नः स्वाहेति ॥ २४ ॥**

अथ जातकर्म । जातेऽग्निमुपसमाधाय अङ्के आधाय पुत्रम्, कंसे पृषदाज्यं संनीय संयोज्य दधिघृते, पृषदाज्यस्य उपघातं जुहोति 'अस्मिन्सहस्रम्' इत्याद्यावापस्थाने ॥

**अथास्य दक्षिणं कर्णमभिनिधाय वा-
ग्वागिति त्रिरथ दधि मधु घृतꣳ संनी-
यानन्तर्हितेन जातरूपेण प्राशयति । भू-
स्ते दधामि भुवस्ते दधामि स्वस्ते दधा-
मि भूर्भुवःस्वः सर्वं त्वयि दधामीति ॥२५॥**

अथास्य दक्षिणं कर्णमभिनिधाय स्वं मुखम् 'वाग्वाक्' इति त्रिर्जपेत् । अथ दधि मधु घृतं संनीय अनन्तर्हितेन अव्यवहितेन जातरूपेण हिरण्येन प्राशयति एतैर्मन्त्रैः प्रत्येकम् ॥

**अथास्य नाम करोति वेदोऽसीति त-
दस्य तद्गुह्यमेव नाम भवति ॥ २६ ॥**

अथास्य नामधेयं करोति 'वेदोऽसि' इति । तदस्य तद्गुह्यं नाम भवति– वेद इति ॥

अथैनं मात्रे प्रदाय स्तनं प्रयच्छति यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः । येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवे करिति ॥

अथैनं मात्रे प्रदाय स्वाङ्कस्थम्, स्तनं प्रयच्छति 'यस्ते स्तनः' इत्यादिमन्त्रेण ॥

अथास्य मातरमभिमन्त्रयते । इलासि मैत्रावरुणी वीरे वीरमजीजनत् । सा त्वं वीरवती भव यास्मान्वीरवतोऽकरदिति । तं वा एतमाहुरतिपिता बताभूरतिपितामहो बताभूः परमां बत काष्ठां प्रापच्छ्रया यशसा ब्रह्मवर्चसेन य एवंविदो ब्राह्मणस्य पुत्रो जायत इति ॥ २८ ॥

इति चतुर्थं ब्राह्मणम् ॥

अथास्य मातरमभिमन्त्रयते 'इलासि' इत्यनेन । तं वा एतमाहुरिति— अनेन विधिना जातः पुत्रः पितरं पितामहं च अतिशेते इति श्रिया यशसा ब्रह्मवर्चसेन परमां निष्ठां प्रापत्— इत्येवं स्तुत्यो भवतीत्यर्थः । यस्य च एवंविदो ब्राह्मणस्य पुत्रो जायते, स च एवं स्तुत्यो भवतीत्यध्याहार्यम् ॥

इति षष्ठाध्यायस्य चतुर्थं ब्राह्मणम् ॥



पञ्चमं ब्राह्मणम् ॥

अथ वꣳशः । पौतिमाषीपुत्रः कात्या-
यनीपुत्रात्कात्यायनीपुत्रो गौतमीपुत्राद्गौ-
तमीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः
पाराशरीपुत्रात्पाराशरीपुत्र औपस्वस्ती-
पुत्रादौपस्वस्तीपुत्रः पाराशरीपुत्रात्पारा-
शरीपुत्रः कात्यायनीपुत्रात्कात्यायनीपुत्रः
कौशिकीपुत्रात्कौशिकीपुत्र आलम्बीपु-
त्राच्च वैयाघ्रपदीपुत्राच्च वैयाघ्रपदीपुत्रः का-
ण्वीपुत्राच्च कापीपुत्राच्च कापीपुत्रः ॥ १ ॥

आत्रेयीपुत्रादात्रेयीपुत्रो गौतमीपुत्रा-
द्गौतमीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः
पाराशरीपुत्रात्पाराशरीपुत्रो वात्सीपुत्रा-
द्वात्सीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो
वार्कारुणीपुत्राद्वार्कारुणीपुत्रो वार्कारुणी-

पुत्राद्वार्कारुणीपुत्र आर्तभागीपुत्रादार्तभागीपुत्रः शौङ्गीपुत्राच्छौङ्गीपुत्रः सांकृतीपुत्रात्सांकृतीपुत्र आलम्बायनीपुत्रादालम्बायनीपुत्र आलम्बीपुत्रादालम्बीपुत्रो जायन्तीपुत्राज्जायन्तीपुत्रो माण्डूकायनीपुत्रान्माण्डूकायनीपुत्रो माण्डूकीपुत्रान्माण्डूकी पुत्रः शाण्डलीपुत्राच्छाण्डलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रो भालुकीपुत्राद्भालुकीपुत्रः क्रौञ्चिकीपुत्राभ्यां क्रौञ्चिकीपुत्रौ वैदभृतीपुत्राद्वैदभृतीपुत्रः कार्शकेयीपुत्रात्कार्शकेयीपुत्रः प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रः सांजीवीपुत्रात्सांजीवीपुत्रः प्राश्नीपुत्रादासुरिवासिनः प्राश्नीपुत्र आसुरायणादासुरायण आसुरेरासुरिः ॥ २ ॥

याज्ञवल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालकोऽरुणादरुण उपवेशेरुपवेशिः कु-

श्रेः कुश्रिर्वाजश्रवसो वाजश्रवा जिह्वावनो बाध्योगाज्जिह्वावान्बाध्योगोऽसितादार्षगणादसितो वार्षगणो हरितात्कश्यपाद्धरितः कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैध्रुवेः कश्यपो नैध्रुविर्वाचो वाग्म्भिण्या अम्भिण्यादित्यादादित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥ ३ ॥

समानमा सांजीवीपुत्रात्सांजीवीपुत्रो माण्डूकायनेर्माण्डूकायनिर्माण्डव्यान्माण्डव्यः कौत्सात्कौत्सो माहित्थेर्माहित्थिर्वामकक्षायणाद्वामकक्षायणः शाण्डिल्याच्छाण्डिल्यो वात्स्याद्वात्स्यः कुश्रेः कुश्रिर्याज्ञवचसो राजस्तम्बायनाद्याज्ञवचा राजस्तम्बायनस्तुरात्कावषेयात्तुरः

कावषेयः प्रजापतेः प्रजापतिर्ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥ ४ ॥

इति पञ्चमं ब्राह्मणम् ॥

अथेदानीं समस्तप्रवचनवंशः स्त्रीप्राधान्यात् । गुणवान्पुत्रो भवतीति प्रस्तुतम्; अतः स्त्रीविशेषणेनैव पुत्रविशेषणात् आचार्यपरम्परा कीर्त्यते । तानीमानि शुक्रानीति अव्यामिश्राणि ब्राह्मणेन । अथवा यानीमानि यजूंषि तानि शुक्रानि शुद्धानीत्येतत् । प्रजापतिमारभ्य यावत्पौतिमाषीपुत्रः, तावत् अधोमुखो नियताचार्यपूर्वक्रमो वंशः समानम् आ सांजीवीपुत्रात्; ब्रह्मणः प्रवचनाख्यस्य; तच्चैतत् ब्रह्म प्रजापतिप्रबन्धपरम्परया आगत्य अस्माखनेकधा विप्रसृतम् अनाद्यनन्तं स्वयंभु ब्रह्म नित्यम्; तस्मै ब्रह्मणे नमः । नमस्तदनुवर्तिभ्यो गुरुभ्यः ॥


इति षष्ठाध्यायस्य पञ्चमं ब्राह्मणम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य

श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य

श्रीमच्छंकरभगवतः कृतौ

बृहदारण्यकोपनिषद्भाष्यं संपूर्णम् ॥


ॐ
पूर्णमदः पूर्णमिदं
पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय
पूर्णमेवावशिष्यते ॥
ॐ शान्तिः शान्तिः शान्तिः ॥


उपनिषन्मन्त्राणां
वर्णानुक्रमणिका

॥ श्रीः ॥

उपनिषन्मन्त्राणां

॥ वर्णानुक्रमणिका ॥



	पृष्ठम्		पृष्ठम्
अ		अथ य इच्छेद्दुहिता मे पण्डिता	८०६
अग्नये स्वाहेत्यग्नौ हुत्वा	७८८	अथ यदा सुषुप्तो भवति	२४३
अत्र पितापिता भवति	५७१	अथ यद्युदक आत्मान	८००
अथ कर्मणामात्मेत्येतदेषा	२१०	अथ यस्य जायामार्तव	८०४
अथ चक्षुरत्यवहत्तद्यदा	५७	अथ यस्य जायायै	८०३
अथ त्रयो वाव लोका	१९०	अथ यामिच्छेद्दधीतेति	८०३
अथ प्राणमत्यवहत्स यदा	५७	अथ यामिच्छेन्न गर्भ दधीतेति	८०२
अथ मनोऽत्यवहत्तद्यदा	५८	अथ ये यज्ञेन दानेन	७८०
अथ य इच्छेत्पुत्रो मे कपिलः पिङ्गलो	८०६	अथ रूपाणा चक्षु०	२१०
अथ य इच्छेत्पुत्रो मे पण्डितो जायेत	८०७	अथ वꣳशः पौतिमाषी०	८१४
अथ य इच्छेत्पुत्रो मे श्यामो	८०६	अथ वꣳशः पौतिमाष्यो	३४७
		अथ वꣳशः पौतिमाष्यो	६७९

	पृष्ठम्		पृष्ठम्
अथ श्रोत्रमत्यवहत्तद्यदा	५८	अथातो व्रतमीमा८सा	२००
अथ ह चक्षुरूचुः	४६	अथात्मनेऽन्नाद्यमागा०	५८
अथ ह प्राण उत्क्रमि०	७४९	अथाधिदैवतं ज्वलिष्या०	२०४
अथ ह प्राणमूचुस्त्व न	४६	अथाध्यात्ममिदमेव मूर्त	२८५
अथ ह मन ऊचुः	४७	अथाभिप्रातरेव स्थाली०	८०७
अथ ह याज्ञवल्क्यस्य द्वे	६६०	अथामूर्त प्राणश्च यश्चा०	२८६
अथ ह वाचक्नव्युवाच	४३९	अथामूर्त वायुश्चान्तरिक्षं	२८३
अथ ह श्रोत्रमूचुः	४७	अथास्य दक्षिणं कर्णम०	८११
अथ हेममासन्यं प्राण०	४८	अथास्य नाम करोति	८११
अथ हैनमसुरा ऊचुः	६९७	अथास्य मातरमभिम०	८१२
अथ हैनमुद्दालक आ०	४२६	अथास्या ऊरू विहाप०	८०९
अथ हैनमुषस्तश्चाक्रा०	४००	अथेत्यभ्यमन्थत्स मुखाच्च	८९
अथ हैनं कहोलः कौ०	४०७	अथैतद्वामेऽक्षणि	५०७
अथ हैनं गार्गी वाच०	४२२	अथैतस्य प्राणस्यापः	१८४
अथ हैनं जारत्कारव	३७३	अथैतस्य मनसो द्यौः	१८३
अथ हैनं भुज्युर्लाह्या०	३९४	अथैनमग्नये	७७५
अथ हैनं मनुष्या ऊचुः	६९७	अथैनमभिस्पृशति	७९०
अथ हैनं विदग्धः शा०	४५५	अथैनमाचामति	७९०
अथ होवाच ब्राह्मणा०	४८१	अथैनमुद्यच्छत्याम८०	७९०
अथातः पवमानानामे०	७२	अथैन मात्रे प्रदाय	८१२
अथातः संप्रत्तिर्यदा	१९१	अथैनं वसत्योपमन्त्रयां०	७६२

	पृष्ठम्
अथैनामभिपद्यते	८०८
अथैष श्लोको भवति	२०५
अथो अयं वा आत्मा०	१५५
अद्भ्यश्चैन चन्द्रमसश्च	१९८
अनन्दा नाम ते लोका	६३१
अन्ध तमः प्रविशन्ति	६३१
अन्न ब्रह्मेत्येक आहुः	७१८
अयमग्निः सर्वेषा भूताना	३२६
अथमग्निर्वैश्वानरो	७१४
अयमाकाशः सर्वेषा	३२९
अयमात्मा सर्वेषा भूताना	३३३
अयमादित्यः सर्वेषां	३२७
अय चन्द्रः सर्वेषां	३२८
अय धर्मः सर्वेषां भूतानां	३३०
अयं वायुः सर्वेषा	३२७
अय वै लोकोऽग्निर्गौतम	७७२
अयꣳ स्तनयित्नुः सर्वेषा	३२९
असौ वै लोकोऽग्निर्गौतम	७६७
अस्तमित आदित्ये या- ज्ञवल्क्य किंज्योति०	५१६
अस्तमित आदित्ये याज्ञ- वल्क्य चन्द्रमस्यस्त- मिते किंज्योतिरेवा०	५१७
अस्तमित आदित्ये याज्ञ वल्क्य चन्द्रमस्यस्त- मिते शान्तेऽग्नौ	५१७
अस्तमित आदित्ये याज्ञ- वल्क्य चन्द्रमस्यस्त- मिते शान्तेऽग्नौ शा- न्ताया वाचि	५१८
अहर्वा अश्व पुरस्तात्	११
अहल्लिकेति होवाच	४७७

आ

आकाश एव यस्याय०	४६५
आग्निवेश्यादाग्निवेश्यः	३४७
आग्निवेश्यादाग्निवेश्यो	६७९
आत्मान चेद्विजानीयाद०	६३२
आत्मैवेदमग्र आसीत्पु०	७८
आत्मैवेदमग्र आसीदेक	१५८
आलेयीपुत्रादात्रेयीपुत्रो	८१४
आप एव यस्यायतनम्	४६७
आप एवेदमग्र आसुः	७०५

	पृष्ठम्		पृष्ठम्
आपो वा अर्कस्तद्यदपा	२२	उक्थं प्राणो वा उक्थ	७२०
आरामस्य पश्यन्ति	५५१	उषा वा अश्वस्य मेध्यस्य	८
इ		**ऋ**	
इदं मानुषꣳ सर्वेषा	३३२	ऋचो यजूꣳषि	७२५
इद वै तन्मधु ... पश्य-		**ए**	
न्नवोचत् । आथर्व०	३४१	एकधैवानुद्रष्टव्यमेतदप्र०	६३८
इद वै तन्मधु ... पश्य-		एका भवति न पश्यती०	६०३
न्नवोचत् । तद्वा	३३८	एतद्ध वै तज्जनको	७३४
इद वै तन्मधु .. पश्य-		एतद्ध स्म वै तद्विद्वानु०	७९८
न्नवोचत् । पुरश्चक्रे	३४२	एतद्वै परम	७१६
इद वै तन्मधु... पश्य-		एतमु हैव चूलो	७९३
न्नवोचत् । रूपꣳ	३४४	एतमु हैव जानकिराय०	७९३
इदꣳ सत्यꣳ सर्वेषा	३३१	एतमु हैव मधुकः	७९२
इन्धो ह वै नामैष	५०६	एतमु हैव वाजसनेयो	७९२
इमा आपः सर्वेषा	३२६	एतमु हैव सत्यकामो	७९३
इमा दिशः सर्वेषा	३२८	एतस्य वा अक्षरस्य	४४५
इमावेव गोतमभरद्वाजा-	२७८	एष उ एव बृहस्पति०	६४
इयं पृथिवी सर्वेषां	३२४	एष उ एव ब्रह्मणस्पतिः	६४
इयं विद्युत्सर्वेषां भूताना	३२९	एष उ एव साम वाग्वै	६५
इहैव सन्तोऽथ विद्मः	६३४	एष उ वा उद्गीथः	६७
उ		एष प्रजापतिः	७०१

	पृष्ठम्
एषा वै भूतानां पृथिवी	७९६
क	
कतम आत्मेति योऽयम्	५२४
कतम आदित्या इति	४५८
कतम इन्द्रः कतमः	४५९
कतमे ते त्रयो देवा	४६०
कतमे रुद्रा इति	४५८
कतमे वसव इत्यग्निश्च	४५७
कतमे षडित्यग्निश्च	४६०
कस्मिन्नु त्व चात्मा०	४७७
काम एव यस्यायतनम्	४६३
किंदेवतोऽस्यामुदीच्या	४७४
किंदेवतोऽस्यां दक्षिणाया	४७२
किंदेवतोऽस्या ध्रुवाया	४७५
किंदेवतोऽस्यां प्रतीच्यां	४७३
किंदेवतोऽस्यां प्राच्या	४७०
क्षत्रं प्राणो वै क्षत्र प्राणो	७२३
घ	
घृतकौशिकाद्धृतकौशिकः	६८०
घृतकौशिकाद्धृतकौशिकः	३४८
च	
चक्षुर्वै ग्रहः	३७६
चक्षुर्होच्चक्राम	७४७
चतुरौदुम्बरो भवत्यौदु०	७९४
ज	
जनको ह वैदेह आ०	४९३
जनको ह वैदेहः कूर्चा०	५०५
जनकश्च ह वैदेह याज्ञ०	५१३
जनको ह वैदेहो बहु०	३५४
जात एव न जायते	४८५
जातेऽग्निमुपसमाधायाङ्क	८१०
जिह्वा वै ग्रहः	३७६
ज्येष्ठाय स्वाहा श्रेष्ठाय	७८८
त	
तदभिमृशेदनु वा	७९९
तदाहुर्यदयमेक इवैव	४६१
तदाहुर्यद्ब्रह्मविद्यया	११९
तदेतत्प्रेयः पुत्रात्प्रेयो	११७
तदेतदृचाभ्युक्तम् । एष	६५३
तदेतद्ब्रह्म क्षत्र विट्	१४९
तदेतन्मूर्तं यदन्यत्	२८१
तदेते श्लोका भवन्ति ।	

	पृष्ठम्		पृष्ठम्
अणुः पन्था विततः	६२७	तद्वै तदेतदेव	७०३
तदेते श्लोका भवन्ति ।		तम एव यस्यायतन	४६६
स्वप्नेन	५४९	तमेताः सप्ताक्षितय	२७५
तदेष श्लोको भवति ।		तमेव धीरो विज्ञाय	६४०
अर्वाग्बिलश्चमस	२७६	तस्मिञ्छुक्लमुत नीलमाहुः	६२९
तदेष श्लोको भवति ।		तस्य प्राची दिक्प्राञ्चः	५१०
तदेव सक्तः सह	६१५	तस्य वा एतस्य पुरुषस्य	५४२
तदेष श्लोको भवति ।		तस्य हैतस्य पुरुषस्य	२८७
यदा सर्वे	६२४	तस्य हैतस्य साम्नो यः	
तद्धापि ब्रह्मदत्तश्चैकिता०	६८	प्रतिष्ठा वेद	७१
तद्धेदं तर्ह्यव्याकृतमासीत्	९४	तस्य हैतस्य साम्नो यः	
तद्यत्तत्सत्यमसौ	७०७	सुवर्णं वेद	७१
तद्यथा तृणजलायुका०	६०८	तस्य हैतस्य साम्नो यः	
तद्यथानः सुसमाहितम्	५९४	स्वं वेद	६९
तद्यथा पेशस्कारी पेश०	६१०	तस्या उपस्थान गायत्र्य०	७३३
तद्यथा महामत्स्य उभे	५६१	तस्या वेदिरुपस्थो	७९७
तद्यथा राजानमायान्तं	५९८	तस्यै वाचः पृथिवी	१८२
तद्यथा राजानं प्रयि०	६००	तꣳ हैतमुद्दालक	७९२
तद्यथास्मिन्नाकाशे	५६२	तान्होवाच ब्राह्मणा	३५५
तद्वा अस्यैतदतिच्छन्दा	५६८	ता वा अस्यैता हिता	५६४
तद्वा एतदक्षरं गार्ग्यदृष्टं	४५१	ताꣳ हैतामेके	७३०

	पृष्ठम्
ते देवा अब्रुवन्नेतावद्वा	५९
ते य एवमेतद्विदुः	७७६
ते ह वाचमूचुस्त्वं न	४४
ते हेमे प्राणा अहꣳश्रेयसे	७४५
ते होचुः क्व नु सोऽभूत्	५१
त्रय वा इदं नाम रूप	२०८
त्रयाः प्राजापत्याः	६९६
त्रयो लोका एत एव	१८०
त्रयो वेदा एत एव	१८०
त्रीण्यात्मनेऽकुरुतेति	१७६
त्वग्वै ग्रहः	३७६
त्वच एवास्य रुधिरं	४८३
द	
दिवश्चैनमादित्याच्च	१९७
दृप्तबालाकिर्हानूचानो	२१७
देवाः पितरो मनुष्या	१८०
द्वया ह प्राजापत्या	३४
द्वे वाव ब्रह्मणो रूपे मूर्तं	२८०
न	
न तत्र रथा न रथ०	५४७
नैवेह किंचनाग्र आसीत्	१३
प	
पर्जन्यो वा अग्निर्गौतम	७७१
पिता माता प्रजैत	१८१
पुरुषो वा अग्निर्गौतम	७७३
पूर्णमदः पूर्णमिद	६८५
पृथिव्येव यस्यायतन	४६२
पृथिव्यै चैनमग्नेश्च	१९६
प्राणस्य प्राणमुत चक्षुषः	६३७
प्राणेन रक्षन्नवर कुलाय	५५०
प्राणोऽपानो व्यान	७२६
प्राणो वै ग्रहः	३७५
ब	
ब्रह्म तं...भूतानि	३०४
ब्रह्म तं...वेदास्त	६६४
ब्रह्म वा इदमग्र आसी-त्तदात्मानमेवावेत्	१२१
ब्रह्म वा इदमग्र आसी-देकमेव	१४३
भ	
भूमिरन्तरिक्षं	७२४
म	

	पृष्ठम्
मनसैवानुद्रष्टव्यं	६३७
मनोमयोऽयं पुरुषः	७११
मनो वै ग्रहः	३७६
मनो ह्येवक्काम	७४८
माध्यान्यस्य शकराणि	४८३
मैत्रेयीति होवाच	२९९
मैत्रेयीति होवाच याज्ञ०	६६०
य	
यः पृथिव्यां तिष्ठन्	४३१
यः प्राणे तिष्ठन्	४३५
यः श्रोत्रे तिष्ठन्	४३६
यः सर्वेषु भूतेषु	४३५
य आकाशे तिष्ठन्	४३४
य आदित्ये तिष्ठन्	४३३
य एष एतस्मिन्मण्डले	७०९
यजुः प्राणो वै यजुः प्राणे	७२१
यत्किंच विजिज्ञास्यं	१८१
यत्किंचाविज्ञात प्राणस्य	१८२
यत्ते कश्चिदब्रवीत्तच्छृण०	४९४
यत्र वा अन्यदिव	५८५
यत्र हि द्वैतमिव भवति	
तदितर इतर जिघ्रति	३१९
यत्र हि द्वैतमिव भवति	
तदितर इतर पश्यति	६६८
यत्सप्तान्नानि मेधया त-	
पसाजनयत्पिता	१६४
यत्सप्तान्नानि मेधया त-	
पसाजनयत्पितेति	१६५
यत्समूलमावृहेयुः	४८५
यथा वृक्षो वनस्पतिः	४८२
यदा वै पुरुषः	७१५
यदेव ते कश्चिदब्रवीत्त-	
च्छृणवामेत्यब्रवीन्म	
उदङ्कः	४९८
यदेव ते कश्चिदब्रवीत्त-	
च्छृणवामेत्यब्रवीन्मे	
गर्दभीविपीतो	५०१
यदेव ते कश्चिदब्रवीत्त-	
च्छृणवामेत्यब्रवीन्मे	
बर्कुर्वार्ष्णः	४९९
यदेव ते कश्चिदब्रवीत्त-	
च्छृणवामेत्यब्रवीन्मे	

	पृष्ठम्		पृष्ठम्
विदग्धः	५०३	यस्यानुवित्तः प्रतिबुद्ध	६३३
यदेव ते कश्चिदब्रवीत्त-		याज्ञवल्क्य किंज्योतिरय	५१४
च्छृणवामेत्यब्रवीन्मे		याज्ञवल्क्याद्याज्ञवल्क्य	८१५
सत्यकामो	५०२	याज्ञवल्क्येति होवाच क-	
यदेतमनुपश्यत्यात्मान	६३५	तिभिरयमद्य ब्रह्मा	३६७
यद्वृक्षो वृक्णो रोहति	४८४	याज्ञवल्क्येति होवाच क-	
यद्वै तन्न जिघ्रति जिघ्रन्वै	५८१	तिभिरयमद्यर्त्विभः	३६४
यद्वै तन्न पश्यति पश्य०	५७८	याज्ञवल्क्येति होवाच क-	
यद्वै तन्न मनुते	५८१	त्ययमद्याध्वर्युरस्मिन्	३६५
यद्वै तन्न रसयते	५८१	याज्ञवल्क्येति होवाच क-	
यद्वै तन्न वदति	५८१	त्ययमद्योद्गाता	३६८
यद्वै तन्न विजानाति	५८२	याज्ञवल्क्येति होवाच य-	
यद्वै तन्न शृणोति	५८१	त्राय पुरुषो म्रियत	३७८
यद्वै तन्न स्पृशति	५८२	याज्ञवल्क्येति होवाच य-	
यश्चक्षुषि तिष्ठन्	४३६	त्राय पुरुषो म्रियते	३७९
यश्चन्द्रतारके	४३४	याज्ञवल्क्येति होवाच य-	
यस्तमसि तिष्ठन्	४३४	त्रास्य पुरुषस्य	३८०
यस्तेजसि तिष्ठन्	४३४	याज्ञवल्क्येति होवाच य-	
यस्त्वचि तिष्ठन्	४३६	दिदमन्तरिक्ष	३६२
यस्मादर्वाक्संवत्सरो०	६३६	याज्ञवल्क्येति होवाच य-	
यस्मिन्पञ्च पञ्चजनाः	६३६	दिद सर्वमहोरात्राभ्या	३५९

	पृष्ठम्
याज्ञवल्क्येति होवाच य-	
दिद सर्वं मृत्युना०	३५७
याज्ञवल्क्येति होवाच य-	
दिद सर्वं मृत्योरन्न	३७७
याज्ञवल्क्येति होवाच य-	
दिद सर्वं पूर्वपक्षा०	३६१
याज्ञवल्क्येति होवाच	
शाकल्यो	४६९
योऽग्नौ तिष्ठन्	४३२
यो दिक्षु तिष्ठन्	४३३
यो दिवि तिष्ठन्	४३३
योऽन्तरिक्षे तिष्ठन्	४३३
योऽप्सु तिष्ठन्	४३२
यो मनसि तिष्ठन्	४३६
योऽय दक्षिणेऽक्षन्पुरुषः	७१०
यो रेतसि तिष्ठन्	४३७
यो वा एतदक्षरं	४४९
यो वाचि तिष्ठन्	४३५
यो वायौ तिष्ठन्	४३३
यो विज्ञाने तिष्ठन्	४३६
यो वै स संवत्सरः	१८९
योषा वा अग्निर्गौतम	७७४
यो ह वा आयतन वेद	७४४
यो ह वै ज्येष्ठ च श्रेष्ठ च	७४१
यो ह वै प्रजापतिं वेद	७४५
यो ह वै प्रतिष्ठा वेद	७४३
यो ह वै वसिष्ठा वेद	७४२
यो ह वै शिश्नꣳ साधनꣳ	२७२
यो ह वै संपद वेद	७४४
र	
रूपाण्येव यस्यायतन...	
य एवायमादर्शे	४६६
रूपाण्येव यस्यायतन...	
य एवासावादित्ये	४६४
रेत एव यस्यायतन	४६८
रेतस इति मा वोचत	४८४
रेतो होच्चक्राम	७४८
व	
वाग्घोच्चक्राम	७४६
वाग्वै ग्रहः	३७५
वाचं धेनुमुपासीत	७१३
विज्ञात विजिज्ञास्यमवि०	१८१

	पृष्ठम्		पृष्ठम्
विद्युद्ब्रह्मेत्याहुः	७१२	स यथा दुन्दुभेर्हन्यमा०	३०५
वेत्थ यथेमाः प्रजाः	७५९	स यथा दुन्दुभेर्हन्यमा०	६६४
श		स यथार्द्रैधाग्नेरभ्याहितस्य	६६५
शाकल्येति होवाच	४६८	स यथार्द्रैधाग्नेरभ्याहितात्	३०८
श्रोत्र वै ग्रहः	३७६	स यथा वीणायै वाद्य०	३०७
श्रोत्र होच्चक्राम	७४८	स यथा वीणायै वाद्य०	६६५
श्वेतकेतुर्ह वा आरुणे०	७५७	स यथा शङ्खस्य ध्माय०	३०७
स		स यथा शङ्खस्य	६६५
स एष सवत्सरः प्रजा०	१८६	स यथा सर्वासामपा<	३१०
स ऐक्षत यदि वा	२६	स यथा सर्वासामपा<	६६५
स त्रेधात्मान व्यकु०	२३	स यथा सैन्धवखिल्य	३१३
स नैव व्यभवत्तच्छ्रेयो०	१४७	स यथा सैन्धववनो	६६६
स नैव व्यभवत्स विश०	१४६	स यथोर्णनाभिः	२४८
स नैव व्यभवत्स शौ०	१४६	स यामिच्छेत्कामयेत	८०२
समानमा साजीवीपुत्रात्	८१६	स यो मनुष्याणा<	५८८
स यः कामयेत	६८५	सलिल एको द्रष्टाद्वैतो	५८६
स य इच्छेत्पुत्रो मे	८०५	स वा अयमात्मा ब्रह्म	६११
स य इमा< स्त्रीर्लोका०	७३१	स वा अयमात्मा सर्वेषा	३३३
स यत्रायमणिमान न्येति	५९६	स वा अयं पुरुषो जाय०	५४१
स यत्रायमात्माबल्य	६०१	स वा एष एतस्मिन्बु०	५५९
स यत्रैतत्स्वप्न्यया०	२३९	स वा एष... संप्रसादे	५५४

	पृष्ठम्		पृष्ठम्
स वा एष .. स्वप्नान्ते	५९२	स होवाच गार्ग्यो य एवायमादर्शे	२२४
स वा एष ..स्वप्ने	५५८	स होवाच गार्ग्यो य एवायं छायामयः	२२६
स वा एष महानज आत्माजरोऽमरो	६५७	स होवाच गार्ग्यो य एवायं दिक्षु	२२५
स वा एष महानज आत्मान्नादो	६५६	स होवाच गार्ग्यो य एवाय यन्त	२२४
स वा एष महानज आत्मा योऽय	६४०	स होवाच गार्ग्यो य एवायं वायौ	२२२
स वै नैव रेमे तस्मादेकाकी न रमते	८४	स होवाच गार्ग्यो य एवासावादित्ये	२१८
स वै वाचमेव प्रथमामत्यवहत्सा	५६	स होवाच गार्ग्यो य एवासौ चन्द्रे	२२०
स ह प्रजापतिरीक्षाचक्रे	७९७	स होवाच गार्ग्यो य एवासौ विद्युति	२२१
स होवाच गार्ग्यो य एवायमग्नौ	२२३	स होवाच तथा नस्त्व गौतम	७६६
स होवाच . गार्ग्यो य एवायमप्सु	२२३	स होवाच तथा नस्त्व तात	७६३
स होवाच गार्ग्यो य एवायमाकाशे	२२१	स होवाच दैवेषु वै	७६४
स होवाच गार्ग्यो य एवायमात्मनि	२२६		

	पृष्ठम्		पृष्ठम्
स होवाच न वा अरे पत्युः कामाय	३०१	ष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पु- रुषः क्वैष	२३६
स होवाच न वा अरे पत्युः ,	६६२	स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुष- स्तदेषां	२३७
स होवाच प्रतिज्ञातो	७६४	स होवाचैतद्वै तदक्षर	४४३
स होवाच महिमान	४५७	स होवाचोवाच वै सो०	३९७
स होवाच यदूर्ध्वं गार्गि आकाश एव	४४३	स होवाचोषस्तश्चाक्रायणो	४०२
स होवाच यदूर्ध्वं गार्गि आकाशे तदोतं	४४१	सा चेदस्मै न दद्यात्का०	८०१
स होवाच याज्ञवल्क्यः प्रिया बतारे	३०१	सा चेदस्मै न दद्यादि०	८०१
स होवाच याज्ञवल्क्यः प्रिया वै खलु	६६१	साम प्राणो वै साम	७२२
स होवाच वायुर्वै गौतम	४३०	सा वा एषा देवता	५२
स होवाच विज्ञायते	७६५	सा वा एषा देवतैता- सा देवतानां पाप्मा- न मृत्युमपहत्य	५४
सहोवाचाजातशत्रुः प्र- तिलोमं	२२८	सा वा एषा देवतैतासा देवताना पाप्मान मृत्युमपहत्यैना	५६
स होवाचाजातशत्रुरेता- वन्नु	२२७	सा ह वागुवाच	७५०
स होवाचाजातशत्रुर्यत्रै-			

	पृष्ठम्		पृष्ठम्
सा होवाच नमस्तेऽस्तु	४४२	सा होवाचाह वै त्वा	४३९
सा होवाच ब्राह्मणा	४५२	सैषा गायत्र्येतस्मिंस्तुरीये	७२७
सा होवाच मैत्रेयी। यन्नु म इयं भगोः सर्वा	२९९	सोऽकामयत द्वितीयो	२५
सा होवाच मैत्रेयी । यन्नु म इयं भागोः सर्वा वित्तेन पूर्णा स्यात्स्यां	६६१	सोऽकामयत भूयसा-	२८
सा होवाच मैत्रेयी येनाहं	३००	सोऽकामयत मेध्य	३०
सा होवाच मैत्रेयी	६६१	सोऽबिभेत्तस्मादेकाकी	८१
सा होवाच मैत्रेय्यत्रैव मा भगवानमू०	३१७	सोऽयास्य आङ्गिरसोऽ०	६२
सा होवाच मैत्रेय्यत्रैव मा भगवान्मो०	६६७	सोऽवेदहं वाव सृष्टिः	८८
सा होवाच यदूर्ध्वं गा०	४४१	सोष्यन्तीमद्भिरभ्युक्षति	८१०
सा होवाच यदूर्ध्वं याज्ञ	४४२	सो ह्येयमीक्षांचक्रे	८७
		स्वप्नान्त उच्चावचमीय०	५५०
		स्वप्नेन शारीरमभिप्रहत्य	५४९
		ह	
		हस्तौ वै ग्रहः	३७६
		हिरण्मयी अरणी	८०९
		हिरण्मयेन पात्रेण	७३६



॥ ॐ ॥

नृसिंहपूर्वतापनीयोपनिषद्भाष्यम्

श्रीमच्छंकरभगवत्पूज्यपादैः
विरचितम् ।



॥ श्रीः ॥

॥ विषयानुक्रमणिका ॥

शान्तिमन्त्रस्य विघ्नोपशमार्थस्य विवरणम् ... ३—५

प्रथमोपनिषत् .... ७—४५

श्रीनृसिंहब्रह्मविद्याया आख्यायिकापूर्वमवतारणम् ९

सामसंबन्धित्वेन पृथिव्यन्तरिक्षद्युब्रह्मलोकानामुपासन श्रीनृसिंहोपासनान्तर्गतम् ... १९

साङ्गसामोपासनोपन्यासः ... २३

अग्निसूर्यचन्द्रब्रह्मरूपाणा सामाङ्गदेवतानामुपासननिरूपणम् ... २५

प्रथमसामोद्धारः ... २८

क्षीरोदार्णवशायिनो नृकेसरिणो योगारूढस्य उपासनोपपादनम् ... ३०

द्वितीयसामोद्धारः ... ३२

उपास्यस्य नृकेसरिणस्त्रिनेत्रत्वाद्याकारविशेषोपन्यासः ... ३३

तृतीयसामोद्धारः ... ३७

अस्य साम्नो विश्वस्रष्टृत्वोपन्यासः ... ३८

चतुर्थसामोद्धार· .. ४१
व्यवधानेन सामोद्धारस्य शङ्कापूर्वक प्रयोजनकथनम् ... ४२
नैरन्तर्येण सामोद्धारस्पष्टीकरणम् ... ४४

द्वितीयोपनिषत् ... ४७—८६

आख्यायिकाद्वारा अधिकारिविशेषणान्तरम् ... ४९
प्रणवचतुर्मात्राव्यूहोपासनम् . ५३
पादाक्षरसंख्यापूर्वककृत्स्नमूलमन्त्राक्षरसंख्यानिरूपणं हृदयादिपञ्चाङ्गोपन्यासश्च ... ५४
प्रत्येक मूलमन्त्राक्षराणा प्रणवसपुटितत्वविधानात् पदाज्ञाने प्राप्ते, तत्सौलभ्यार्थं पदोद्धार· .. ५७
उपास्यगुणविशेषनिर्णयार्थं मूलमन्त्रपदाना प्रत्येक प्रश्नप्रतिवचनाभ्यामर्थविवरणम् .. ५९
अहपदार्थविवरणवाक्यस्य अहमस्मीत्यादेरुपासनाफलपरत्वप्रदर्शनम् ... ८४

तृतीयोपनिषत् ... ८७—९६

उपासनानन्तर शक्तिबीजद्वयपाठस्य सपुटीकरणसिद्धिरूपप्रयोजनकथनपूर्वकं शक्तिबीजद्वयनिर्णयः .. ८९

चतुर्थोपनिषत् ... ९७—१२५

शक्तिबीजनिर्णयानन्तरं मूलमन्त्राङ्गमन्त्रपाठस्य प्रयोजनकथनपूर्वक मूलमन्त्राङ्गमन्त्राणामुद्देशक्रमः ... ९९

प्रणवात्मकाङ्गमन्त्रव्याख्यानम् ... १०१
सावित्रीमहालक्ष्मीनृसिंहगायत्रीरूपाणामङ्गमन्त्राणा व्याख्यानम् ... ११३
प्रणवसपुटिते एकैकस्मिन्मूलमन्त्राक्षरे तत्तद्देवतानृसिंह व्यूँह प्रदर्शयितु प्रत्येक प्रणवसपुटितमूलमन्त्राक्षराणा द्वात्रिंशन्नृसिंहव्यूहस्तुतिमन्त्राणा च पुरश्चरणार्थाना प्रदर्शनम् ... ११९

पञ्चमोपनिषत् ... १२७—१५४

पञ्चमाङ्गरूपान्त्राख्यमहाचक्रविद्यामभिधातु महाचक्रस्वरूपोद्धारः .. १२९
उद्धृतमहाचक्रे यथाविहितमन्त्राक्षराणा न्यासक्रमः .. १३५
महाचक्रविद्यायाः फलनिर्देशः ... १४०
उक्तायाः नृसिंहब्रह्मविद्यायाः फलविशेषप्रतिपादनम् ... १४२
पापक्षयार्थं नित्यमेतद्विद्यानुष्ठानेन तद्ग्रन्थाध्ययनेन जपेन वा आनुषङ्किकान्येव फलानि इति प्रतिपादनम् .. १४५
एतद्विद्यानुष्ठातुरध्येतुर्जप्तुश्च उत्कर्षतरतमभावेन सर्वोत्कृष्टत्वस्य सर्वोत्कृष्टफलस्य च निरूपणम् ... १५०



॥ नृसिंहपूर्वतापनीयोपनिषत् ॥

श्रीमच्छंकरभगवत्पादविरचितेन भाष्येण सहिता ।

यन्नाम्नोपनिषत्ख्याता तपनं तं विधुं गुरुम् ।
प्रणम्योपासनागर्भां तद्व्याख्यां श्रद्धयारभे ॥ १ ॥

आनुष्टुभात्सामराजान्नारसिंहादिदं जगत् ।
जातं यस्मिन्स्थितं लीनं नमस्तस्मै चिदात्मने ॥ २ ॥



'भद्रं कर्णेभिः शृणुयाम देवाः' इति मन्त्रान्तर्गतभद्रपदव्याख्यानपराम् ऋचम् उदितां शान्तौ पठन अन्याभ्यः श्रौतस्मार्तपौराणिककल्पप्रतिपादिताभ्यः साकारब्रह्मविद्याभ्य

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्ये-
माक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवांसस्तनू-
भिर्व्यशेम देवहितं यदायुः ॥ १ ॥

भद्रं कल्याणम्, कर्णेभिरिति च्छान्दसम्, कर्णैः शृणुयाम शृणुम देवाः सन्तो वयम्. भद्रं कल्याणं पश्येम अक्षभिः चक्षुर्भिः यजत्राः यजनशीलाः; स्थिरैरङ्गैः हृदयाद्यैः सामाङ्गप्रणवसावित्रीयजुर्लक्ष्मीनृसिंहगायत्रीरूपैः मूलमन्त्राङ्गव्याख्यानपरैः तनूभिः तनूमन्त्रैः 'यो वै नृसिंहो देवो भगवान्यश्च ब्रह्मा तस्मै वै नमो नमः' इत्याद्यैः; तुष्टुवांसः इति स्तुतिसाधनत्वेनोक्तत्वात् तनूशब्देन मन्त्रा गृह्यन्ते, तथा अङ्गशब्देन च; तुष्टुवांसः स्तुवानाः स्तुतिं कुर्वाणाः. व्यशेम विगतरोगं विविधैहिकामुष्मिकसुखभोगक्षमम् अशेम प्राप्नुयाम; आयुरिति प्रत्येकं संबध्यते; यद्देवहितं देवः तापनीये उक्तविद्ययोपास्यः तत्तदवसरोचितकरणबुद्धया शिक्षन हितमाचरति यस्मिन्नायुषि तत् तथोक्तमायुर्व्यशेमेति संबन्धः ॥

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः
पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरि-

ष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ २ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

स्वस्ति नः इत्यत्र स्वस्तिपदानां चतुर्णामपौनरुक्त्यं यास्क-वचनात् यथासंख्यम् । स्वस्तीत्यविनाशमायुः नः अस्मभ्यम् इन्द्रः दधातु ; कीदृक् ? वृद्धश्रवाः वृद्धात् बृहस्पतेः सद्विद्या-श्रवणं यस्य सः तथोक्तः दधातु । स्वस्तीत्याभिमुख्यमुपासनायां नः अस्मभ्यम् पूषा विश्ववेदाः विश्वानि वेदांसि यस्य सः तथोक्तः, अथवा सर्वे वेदा उपासनायामाभिमुख्यं दधतु स्वस्ति नः अस्मभ्यं पूजार्हतां तार्क्ष्यः देवभक्तो गरुत्मान् अरिष्टनेमिः अहिंसितवज्रः दधातु । स्वस्ति सुशोभनं नः अस्मभ्यं दधातु बृहस्पतिरित्यर्थः । अस्मिन्मन्त्रे अस्मच्छब्दवी-प्सया वक्ष्यमाणायां विद्यायामादरं दर्शयति । शान्तिः शान्तिः शान्तिः त्रिधा तु विघ्नोपशान्तिः वक्ष्यमाणविद्या-नुष्ठाने ॥

इति शान्तिः ॥





नृसिंहपूर्वतापनीयोपनिषद्भाष्यम्

प्रथमोपनिषत्

प्रथमोपनिषत् ॥



पो वा इदमासन्' इत्याद्या 'तदे-तन्निष्कामस्य भवति' इत्यन्ता तापनीयोपनिषत् श्रीनृसिंहाकारब्रह्मविषया सती निराकारब्रह्मप्रतिपत्त्युपायभूतां; अत एव पृथक्संबन्धाभिधेयप्रयोजनानि न वक्तव्यानि; यान्येव तु उपनिषत्संबन्धाभिधेयप्रयोजनानि तान्येवोपनिषद्व्याचिख्यासुना संक्षेपतो वक्तव्यानि। तत्र प्रयोजनसाधनाभिव्यञ्जकत्वेनाभिधेयसंबन्धशास्त्रं पारम्पर्येण प्रयोजनवत्। किं पुनः प्रयोजनमिति, उच्यते— रोगार्तस्येव रोगनिवृत्तौ स्वस्थता, दुःखात्मकस्य आत्मनो द्वैतप्रपञ्चस्योपशमे स्वस्थता द्वैताभावः प्रयोजनम्, द्वैतप्रपञ्चस्य च अविद्याकृतत्वाद्विद्यया तदुपशमः स्यादिति ब्रह्मविद्याप्रकाशनाय अस्या आरम्भः। 'यत्र हि द्वैतमिव' 'यत्र च अन्यदिव स्यात् तत्रान्योऽन्यत्पश्येत्...विजानीयात्' 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्...विजानीयात्' इत्या-

दिश्रुतिभ्योऽस्यार्थस्य सिद्धिः । तत्र तावदस्यामुपनिषदि इदं परामृश्यते— किं तावद्वेद्यं विद्याभेदः, आहोस्वित् अन्योन्यविशेषणविशेष्यभावाद्विशिष्टस्य च वेद्यस्यैक्यात् विद्यैक्यम् इति । तत्र किं नः प्रतिभाति ? विद्याभेद इति । तथा हि—प्रथमोपनिषदि लोकसाङ्गसामशुद्धसामग्र्यादिसामान्तर्गतस्वरविशेषक्षीरोदार्णवशायिनृकेसरिशंकरसच्चिदानन्दमयानामन्योन्यविशेषणविशेष्यभावरहितानां वेद्यानां श्रवणात् तथा प्रणवानुष्टुप्पदपदार्थशक्तिसामबीजसामाङ्गमन्त्रचतुष्टयानां वेद्याना द्वितीयतृतीयचतुर्थोपनिषत्सु यथासंख्यं श्रवणात् । अन्त्योपनिषदि महाचक्रविद्या श्रूयते । नन्वन्योन्यविशेषणविशेष्यभावरहितानामप्यङ्गाङ्गिभावो भवतु । नेति ब्रूमः, 'फलवत्संनिधावफलं तदङ्गम्' इति न्यायवैषम्यात् । तथा हि—लोकादितत्तद्वेद्याना फलसंबन्धेन 'यो जानीते सोऽमृतत्वं च गच्छति' इत्यसकृच्छ्रवणात् । ननु लोकादीनामन्योन्यविशेषणविशेष्यभावरहितानामपि श्रीनृसिंहाकारब्रह्मणा सह विशेषणविशेष्यभावसंभवात् । तथाहि— 'सर्वाँल्लोकान्सर्वान्देवान्सर्वानात्मनः सर्वाणि भूतान्युद्बृह्यात्युद्बृह्यते' इत्यादिपदव्याख्याने सर्वेषां वेद्यानां तत्संबन्धश्रवणात् । अतो विशिष्टस्य वेद्यस्यैक्यात् विद्यैक्यमिति । अ-

सोच्यते—सत्यं श्रूयते संबन्धः। तथापि अर्थवादत्वान्न विवक्ष्यते। अर्थवादश्च विध्यश्रवणात्, 'उद्गृह्णाति' 'विरमति' 'व्याप्नोति' 'ज्वलति' 'पश्यति' 'पलायन्ते' 'ददाति' 'मारयति' 'नमन्ति' इत्येवं वर्तमानोपदेशाच्च। न च वाच्यम् अधस्तात्पदोद्धारे 'तस्य ह वा उग्रं प्रथमं स्थानं जानीयात्' इति विधिः श्रूयते इति। यतः ततः प्रागपि 'प्रत्यक्षरमुभयत ओंकारो भवति' इति विधिबलात् प्रणवाक्षरमिश्रणेन मूलमन्त्राक्षरव्यत्ययात् तत्पदाज्ञाने प्राप्ते तत्तत्पदपरिमाणज्ञापनार्थं विधिरुपक्षीणः सन न तत्पदार्थानां श्रीनृसिंहब्रह्मणा सह संबन्धं विधातुं शक्नोति। अतः यावद्वेद्यं विद्याभेद इत्येवं प्राप्तम्। एवं प्राप्ते, ब्रूमः—सत्य पृथिव्यादिलोकानां परस्परं विशेषणविशेष्यभावो नावगम्यते, प्रत्येकं च वेद्यता श्रूयते 'जानीयात्' इति। तथापि श्रीनृसिंहब्रह्मणा सह संबन्धः तत्र तत्र श्रूयमाणः केन वारयितुं शक्यते? तथा हि— 'य एतं मन्त्रराजं नारसिंहमानुष्टुभं प्रायच्छत्' 'य एतं मन्त्रराजं नारसिंहमानुष्टुभं प्रतिगृह्णीयात्' इत्यादिमध्ये पुनश्च 'आनुष्टुभस्य मन्त्रराजस्य नारसिंहस्याङ्गमन्त्रान्नो ब्रूहि' इति 'मन्त्रराजं नारसिंहमानुष्टुभं भवति' इत्येवं मध्ये श्रावयित्वा अन्ते 'य एतं मन्त्रराजं नारसिंहमानुष्टुभं

नित्यमधीते' इत्यसकृदभ्यस्य आदिमध्यावसानेषु नृसिंहब्रह्मसंबन्धित्वेन संकीर्तनात् विद्याया ऐक्यमिति विनिश्चिते तत्संबन्धित्वेन यथायोग्यतया तदन्तर्गतं पदजातं सामसंबन्धि समस्तं यथायोग्यतया वर्णनीयम्। अपि च अन्त्योपनिषदि फलकथनावसरे कृत्स्ना श्रीनृसिंहब्रह्मविद्यामभिधाय 'य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते' इत्येतन्नारसिंहानुष्टुभशब्दानां कृत्स्ननृसिंहब्रह्मविद्याभिधायकत्वेन निश्चितानाम् असकृच्छ्रुतानामेव आदौ 'एतं मन्त्रराजं नारसिंहमानुष्टुभमपश्यत्' इति श्रवणात् तदन्तरालवर्तिपदजातं नृसिंहब्रह्मविद्यासंबद्धमिति निश्चीयते। तत्संबन्धश्च तत्तत्पदव्याख्यानावसरे स्पष्टमेव प्रदर्शयिष्यते। अपि च 'वाक्यान्वयात्' इति न्यायेन सर्वमेवेदं प्रकरणं नृसिंहब्रह्मविद्याप्रकरणमिति गम्यते। अथ यदुक्तं पदव्याख्यानवाक्याना नृसिंहब्रह्मविद्यासंबन्धसमर्पकाणां विध्यश्रवणात् वर्तमानापदेशाच्च अर्थवादत्वमिति, तदयुक्तम्। अधस्तात्पदोद्धारे 'तस्य ह वा उग्रं प्रथमं स्थानं जानीयात्' इति विधिः स्पष्ट एव श्रूयते। तत्र च विधौ तच्छब्देन साङ्गस्य मूलमन्त्रस्य परामर्शात् अङ्गानां च द्वैविध्यात् मूलमन्त्राङ्गमन्त्राणां सामाङ्गमन्त्राणां च यथायोग्यतया व्याख्यानव्याख्येयभावेनावस्थितत्वात् कृत्स्नैव

नृसिंहब्रह्मविद्या अवगम्यते । स च विधिः अनुषङ्गन्यायेन सर्वपदसंबन्धः स्पष्ट इति । ननु तत्राप्युक्तं पदज्ञानार्थं तदिति, तन्न । प्राक् 'प्रत्यक्षरमुभयत ओंकारो भवति' इति वाक्यादर्थाज्ञानेन पदाज्ञाने प्राप्ते, तत्पुरःसरमेव पदज्ञानमिति । नन्वेवं तच्छेषत्वेनोपरिष्टादर्थकथनमनुपपन्नम् । नानुपपन्नम्— उपरिष्टाद्धि 'कस्मादुच्यते' 'कस्मादुच्यते' इत्यर्थपुरःसरमेव पदं स्पष्टार्थमुपसंहरति—'तस्मादिदमुच्यते' इति ; अतः अवगम्यते प्रागप्यर्थज्ञानपुरःसरमेव पदज्ञानमिति । अतः सर्वसंबन्धिविधिश्रवणं स्पष्टमिति । किं च सर्वेषां पदानामर्थमाश्राव्य अन्ते 'य एवं वेद' इति विधिश्रवणात् । 'वेद' इति वर्तमानत्वात्कथं विधिरिति चेत्, न, 'वचनानि त्वपूर्वत्वात्' इति न्यायात् । 'य एवं वेद' इति य एवं प्राक्तनमर्थजातं श्रीनृसिंहब्रह्मसंबद्धं वेद उपास्ते । उपनिषदि साकारब्रह्मविद्याप्रकरणे पठितानां वेदोपासनाज्ञानध्यानपदानाम् उपासनार्थत्वेन निर्णीतत्वात् । अतो नायमर्थवाद इत्यतः पञ्चसूपनिषत्सु न यावद्वेद्यं विद्याभेद इति सिद्धम् । 'आपो वा इदमासन्' इत्यादिना श्रीनृसिंहब्रह्मविद्याप्रकरणमाख्यायिकापूर्वमवतारयति इयमुपनिषत् । तत्र तावत् प्रथमोपनिषदि सामसंबन्धित्वेन पृथिव्यन्तरिक्षद्यु-

ब्रह्मवेदसाङ्गसामाग्निसूर्यचन्द्रब्रह्मादिदेवानां सामोद्धारपूर्वकं क्षीरोदार्णवशायिन्युपविष्टे वा शेषाभोगमस्तकपरिवृते नृकेसरिणि योगारूढे वरदाभयहस्ते त्रिनेत्रे शंकरे पिनाकहस्ते सच्चिदानन्दमये ब्रह्मविवर्त उपासनम् । तस्मिन्नेव द्वितीयोपनिषदि प्रणवोपासनापूर्वकसामरहितानुष्टुब्मन्त्रपञ्चाङ्गपदोद्धारपूर्वकपदव्याख्याकथनगुणविशिष्टोपासनम् । तस्मिन्नेव तृतीयोपनिषदि सामान्वितत्वेन मूलमन्त्रसंबन्धित्वेन शक्तिबीजकथनं तन्निर्णयश्च । तस्मिन्नेव चतुर्थोपनिषदि मूलमन्त्राङ्गमन्त्रसामाङ्गमन्त्रैः प्रणवेन हृदयं सावित्रेण शिरो महालक्ष्मीशिखां व्याख्याय नृसिंहगायत्र्या कवचं व्याचष्टे; महाचक्रद्वात्रिंशद्व्यूहदेवतोद्देशपूर्वकं पुरश्चरणमन्त्राश्च । पञ्चमोपनिषदि मन्त्रवर्णे द्वात्रिंशद्व्यूहान्महाचक्रे विन्यस्य तत्स्वरूपप्रकथनेन अङ्गमन्त्रान्व्याख्याय श्रीनृसिंहब्रह्मविद्यानुष्ठातुः फलं व्याचष्टे ॥

आपो वा इदमासन्सलिलमेव स प्रजापतिरेकः पुष्करपर्णे समभवत्तस्यान्तर्मनसि कामः समवर्ततेदं सृजेयमिति तस्माद्यत्पुरुषो मनसाभिगच्छति तद्वाचा

वदति तत्कर्मणा करोति तदेषाभ्युक्ता-
कामस्तदग्रे समवर्तताधि मनसो रेतः
प्रथमं यदासीत् । सतो बन्धुमसति नि-
रविन्दन्हृदि प्रतीष्य कवयो मनीषेत्यु-
पैनं तदुपनमति यत्कामो भवति स त-
पोऽतप्यत स तपस्तप्त्वा स एतं मन्त्रराजं
नारसिंहमानुष्टुभमपश्यत्तेन वै सर्वमिद-
मसृजत यदिदं किंच तस्मात्सर्वमिदमा-
नुष्टुभमित्याचक्षते यदिदं किंचानुष्टुभो
वा इमानि भूतानि जायन्तेऽनुष्टुभा जा-
तानि जीवन्त्यनुष्टुभं प्रयन्त्यभिसंविशन्ति
तस्यैषा भवत्यनुष्टुप्प्रथमा भवत्यनुष्टुबुत्त-
मा भवति वाग्वा अनुष्टुब्वाचैव प्रयन्ति
वाचैवोद्यन्ति परमा वा एषा छन्दसां
यदनुष्टुबिति ॥ १ ॥

आपः आसन इति संबन्धः । वै प्रसिद्धम् । इदं प्रत्य-
क्षादिदृष्टं सलिलम् अम्बवेव स प्रजापतिः । स इति पूर्व-

परामर्शिना तच्छब्देन पुंलिङ्गेन प्रकृतं परामृशति 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति श्रुतेः। ब्रह्मा प्रजापतिः एकः सन् पुष्करपर्णे समभवत् आसीत्। तस्य प्रजापतेः मनसि अन्तःकरणे अन्तर्वर्ती कामः इच्छा समवर्तत, इदं सृजेयमिति सृष्टिविषय इत्यर्थः। तस्मात् यत्पुरुषो मनसाभिगच्छति अन्तःकरणेनेच्छति तद्वाचा वदति। वाग्वदनपूर्वकं कर्मकरणं लोकप्रसिद्धं दर्शयति— तत्कर्मणा करोतीति। उक्तमेवार्थं द्रढयितुम् ऋचं साक्षित्वेनोद्भावयति— तदेषाभ्युक्तेति। अर्थदार्ढ्यें ऋक् निर्णीतैव; सामयजुषोरर्थशैथिल्यमपि संभाव्यते— 'यद्वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तद्यदृचा तद्दृढम्' इति श्रुतेः। तस्मिन्नेवार्थे एषा ऋक् वक्ष्यमाणा अभ्युक्ता। मनसः कामः तदग्रे समवर्तत रेत उदकं प्रथमम् आदौ सृष्टयवसरे यदासीत् यस्मात्कारणादासीत्। अथवा कालनिर्देशः यदा इति, यस्मिन्काले प्रथमम् उदकमासीत्, तदैव मनसः कामः अधीत्युपरि विषये सृष्टिविषये समवर्तत इत्यर्थः। सतः ब्रह्मणो बन्धुं बन्धनं विवर्तं कवयः विपश्चितो हृदि निरविन्दन्, असति ब्रह्मणि, असच्छब्दस्य नामरूपाव्याकृतत्वेन ब्रह्मणि प्रयुक्तत्वात् 'असद्वा इदमग्र आसीत्' इत्यादौ।

हृदि अन्तःकरणे प्रतीष्य प्रत्यगात्मानमवेक्ष्य मनीषा मनीषया विपश्चिद्बुद्धया । ब्रह्मणो बन्धुं बन्धुमिव बन्धुं परं ब्रह्म व्याकर्तारं क्षीरोदार्णवादिविशेषणविशिष्टं भाविसृष्टेः स्रष्टारं मूलमन्त्रसामाद्युपास्यं हृदि निरविन्दन् इत्युत्तरार्धस्य गूढोऽभिप्रायः । इति-शब्दः ऋक्समाप्तिं द्योतयति । उपैनं कामिनं तत्काम्यम् उपनमति यस्मिन् कामो भवति । सः प्रजापतिः, तपः 'मनसश्चेन्द्रियाणां चैकाग्र्यं परमं तपः' इति स्मरणात् अतप्यत मनसश्चेन्द्रियाणां च ऐकाग्र्यमकरोत् । सः प्रजापतिः, तपस्तप्त्वा पूर्वं व्याख्यातम्, स प्रजापतिः एतं प्रकृतं सर्वनाम्नोपात्तं सतो बन्धुमित्यनेन गूढाभिप्रायेण सूचितम्, 'ज्योतिश्चरणाभिधानात्' इति न्यायेन, मन्त्रराजं प्राकरणिकमन्त्राणां राजानं प्रधानभूतं सामराजं वा । मन्त्रशब्दस्य 'अहेबुध्निय मन्त्रं मे गोपाय । यमृषयस्त्रयिविदा विदुः । ऋचः सामानि यजूंष्षि' इत्यादौ साम्न्यपि प्रयुक्तत्वात् । नारसिंहं नृसिंहसंबन्धि सामादि तद्धितान्; नृसिंहगायत्र्यादिप्राप्तौ तद्व्यावृत्त्यर्थम आनुष्टुभमिति अनुष्टुप्छन्दउपाधिकम् ऋग्विशेषमाह, 'गायत्रमेतदहर्भवति' इति न्यायात् । अपश्यत् दृष्टवानित्यभिप्रायः । एतदुक्तं भवति— द्वितीयतृतीयचतुर्थपञ्चमोपनिषत्सु मन्त्रराजादित्रयः

शब्दाः प्रयुक्ताः तत्पुरुषबहुव्रीहितद्धितसामर्थ्यात् पूर्वपूर्वोपनिषदर्थमाचक्षाणाः सन्त एव आदौ प्रयुक्ताः कृत्स्नामेव ब्रह्मविद्या संगृहीतवन्तः; अतश्च वक्ष्यमाणां कृत्स्नामेव ब्रह्मविद्यामपश्यदित्यर्थः। तेन वै प्रागुक्तेन, वै प्रसिद्धम्, सर्वमिदमसृजत प्रत्यक्षादिसिद्धमसृजत। यदिदं किंच स्पष्टम्। तस्मात्सर्वमिदमानुष्टुभमित्याचक्षते यदिदं किच मन्त्रराजनारसिंहशब्दौ। इह आनुष्टुभमिति तद्धितप्रयोगात् द्वात्रिंशदक्षराणामेव तत्साम्नश्च सामर्थ्यं दर्शयत्येव। अत्राप्युपाख्यायिकायां किल प्रजापतिः तपसा लोकत्रयसृष्टयर्थमेव कारणजिज्ञासुः अत्यन्तशुद्धान्तःकरणत्वात् शक्तित्रययुक्तां ब्रह्मस्वरूपिणीं भूतसृष्टिपुरःसरसर्वसृष्टिकारणिकामनुष्टुब्वृचम् अपश्यदित्याह। अनुष्टुभो वा इमानि भूतानि जायन्ते अनुष्टुभा जातानि जीवन्ति अनुष्टुभं प्रयन्त्यभिसंविशन्ति इति 'जन्माद्यस्य यतः' इत्यस्या ब्रह्मलक्षणलक्षितत्वं दर्शयति। उक्तमेवार्थं द्रढयितुम् ऋचं साक्षित्वेनोद्भावयति— तस्य ब्रह्मस्वरूपस्य साक्षिणी एषा वक्ष्यमाणा ऋक् भवति। अनुष्टुप् प्रथमा भवति सर्वसृष्टेः प्रथमा आद्या भवति। अनुष्टुप् उत्तमा श्रेष्ठा भवति। वाग्वा अनुष्टुप् सर्वो वाक्प्रपञ्चः अनुष्टुभि लीन इति दर्शयति। नामसृष्टिपूर्व-

कत्वाद्रूपसृष्टेः वाग्रूपत्वादनुष्टुभः अनुष्टुबेव मूलकारणम् । वाचैव प्रयन्ति अनुष्टुभैव प्रलयं गच्छन्ति भूतानि । वाचैव अनुष्टुभैव उद्यन्ति उत्पत्तिं गच्छन्ति । परमा वा एषा छन्दसां गायत्र्यादीनाम् , छन्दसां वेदानां वा, परमा उत्कृष्टा। परमत्वं च सामाधारत्वादनुष्टुभः । साम्नश्च परमत्वम् 'देवा वै नार्चिं न यजुष्यश्रयन्त ते सामन्येवाश्रयन्त' इति श्रुतेः, 'वेदानां सामवेदोऽस्मि' इति स्मृतेश्च । यदनुष्टुबिति इति-शब्दः ऋक्समाप्तिं द्योतयति ॥

एवं तावदाख्यायिकायामन्ते सकलनृसिंहोपासनसंग्राहकान् मन्त्रराजनारसिंहानुष्टुभशब्दान् विज्ञाय तैरेव शब्दैः सकलोपासनां सृष्टयर्थं प्रजापत्यनुष्ठितां संगृह्य इदानीमविशेषेणानुष्ठाने प्राप्ते, तत्र तावत्साम्नः ऋगक्षराभिव्यञ्जकत्वात् अभिव्यञ्जकाभिव्यङ्ग्ययोरभिव्यञ्जकपूर्वकत्वात् साम्नश्च सर्ववेदश्रेष्ठत्वात्—'देवा वै नार्चिं न यजुष्यश्रयन्त ते सामन्येवाश्रयन्त' इति श्रुतेः 'वेदानां सामवेदोऽस्मि' इति स्मृतेश्च, अस्य च सामराजत्वात् तदुपासनाया प्राप्तायां क्रमसूचनपूर्विकामाह—

ससागरां सपर्वतां ससद्वीपां वसुं-
धरां तत्साम्नः प्रथमं पादं जानीयाद्यक्ष-

गन्धर्वाप्सरोगणसेवितमन्तरिक्षं तत्सा-म्नो द्वितीयं पादं जानीयाद्वसुरुद्रादित्यैः सर्वैर्देवैः सेवितं दिवं तत्साम्नस्तृतीयं पादं जानीयाद्ब्रह्मस्वरूपं निरञ्जनं परम-व्योम्निकं तत्साम्नश्चतुर्थं पादं जानीया-द्यो जानीते सोऽमृतत्वं च गच्छत्यृग्य-जुःसामाथर्वाणश्चत्वारो वेदाः साङ्गाः स-शाखाश्चत्वारः पादा भवन्ति किं ध्यानं किं दैवतं कान्यङ्गानि कानि दैवतानि किं छन्दः क ऋषिरिति ॥ २ ॥

यथाकथंचिदुपासनारूपे प्राप्ते ससागरामिति प्रथमत एव सागरसंकीर्तनेन सागरपूर्विकामुपासनां द्योतयति । अत एव न पृथ्वीविशेषणं सागर इति केचिद्व्याचक्ष-ते ; ततश्च प्रथमतः सागरं क्षीरोदार्णवं ध्यात्वा तच्छा-यिन्युपविष्टे वा तस्मिन्पश्चाङ्गन्यासम् ऋक्सामयोः कृत्वा तस्मिन्नेव सपर्वतामित्याद्युपासनां सह सागरेण वर्तनं यस्या उपासनायाः तां ससागरां जानीयादित्यनुषङ्गः— यथा 'ब्रह्म पुच्छं प्रतिष्ठा' इत्यादेरानन्दमयाद्विच्छेदमिवेति, तद-

युक्तम् । न तावद्विशिष्टामुपासनां ससागरशब्दस्तावदाह, किंतु बद्धक्रमके पदार्थजाते तदादिन्यायेन सूचयति । तदन्यविशेषणत्वेनैकवाक्यत्वेऽपि समानम् । तस्माद्बद्धक्रमकमुपासनं प्रथमत एव सागरशब्दोपादानात्क्षीरोदार्णवपूर्वकं विज्ञेयम् । ततश्चायमर्थः । तत्साम्नः तस्या न्यस्ताया अनुष्टुभो न्यस्तस्य च साम्नः प्रथमं पादं क्षीरोदार्णवशायिनः उपविष्टस्य वा नृकेसरिणः उक्तविशेषणविशिष्टां वसुंधरां हृदयमङ्गं हृदयान्तर्वर्तित्वेन जानीयादित्यर्थः । एवमुत्तरेष्वपि त्रिषु पादेषु यक्षगन्धर्ववसुरुद्रब्रह्मस्वरूपं लोकसाहचर्याद्ब्रह्मलोकं तत्साम्नः तस्या न्यस्ताया अनुष्टुभो न्यस्तस्य च साम्नो द्वितीयं तृतीयं चतुर्थं पादं तस्य नृकेसरिणः शिरःशिखाकवचान्तर्वर्तित्वेन जानीयादिति योज्यम् । एवं नृकेसरिणं यो जानीते सोऽमृतत्वं च गच्छतीति गमनोपादानात्कार्यममृतत्वम्, न कैवल्यम्, 'कार्यं बादरिरस्य गत्युपपत्तेः' इति न्यायात् । अथवा देहान्ते देवः परं ब्रह्म निर्गुणं ब्रह्म तारकं तारकमात्राभिः प्रत्यग्ब्रह्मणोरेकत्वं व्याचष्टे इत्यन्ते श्रवणात् अमृतत्वं कैवल्यम् । एवमुपरिष्टात् उभयथा अस्य अमृतत्वं श्रूयमाणं व्याख्येयम् । ऋग्यजुःसामाथर्वाणश्चत्वारो वेदाः साङ्गाः सशाखाश्चत्वारः पादा भवन्तीति

महाचक्रं व्याख्यातम् । तस्य नाभ्यां क्षीरोदार्णवशायिनः उपविष्टस्य वा नृकेसरिणः क्रमप्राप्तं पञ्चममङ्गम् अस्त्राख्यं वक्ष्यामः । नन्वेवं साङ्गोपासनामपरिसमाप्य कोऽयं मध्ये ध्येयप्रश्नोपक्रमः पिशाचजल्पितमिव— किं ध्यानं किं दैवतं कान्यङ्गानि कानि दैवतानि किं छन्दः क ऋषिरिति ध्यानदेवताङ्गाङ्गदेवताछन्दर्षीणां प्रश्नः? अत्रोच्यते— अत्र किल आख्यायिकायां प्रजापतिः विरतेभ्यो देवेभ्यः सामद्वारिकामेकामुपासनां परिसमाप्य तूष्णीं बभूव श्रोतॄणां बोधं परीक्षितुम्— किं प्रागुक्त एवार्थे अवान्तरविशेषं पृच्छन्ति अन्यदप्यर्थजातं तदुपयोगि, न वेति । अनेनाभिप्रायेण मध्य एव प्रश्नोपक्रमः । तत्र षट्प्रश्नाः । प्रथमप्रश्ने जानीयादिति प्रागुक्तविधौ उपरिष्टाच्चोपनिषत्स्वा समाप्तेर्ज्ञानमात्रं ध्यानं वेति प्रश्नः । जानीयादिति विधावभ्यासस्य ध्यानस्याश्रवणात्तत्रोत्तराप्रदानात् 'अप्रतिषिद्धमनुमतं भवति' इति न्यायाज्जानीयादित्यत्र ध्यायेदित्यर्थः । ध्यायतिः ज्ञानाभ्यासे वर्तते । किं दैवतं किं छन्द क ऋषिरिति प्रश्नत्रये नारसिंहानुष्टुभतद्धितश्रवणात्स्वस्य च ब्रह्मणः प्रजापतेः कथकत्वेन दैवतछन्दर्षित्वेनोत्तरम्, 'यस्य वाक्यं स ऋषिर्या तेनोच्यते सा देवता' इत्याश्वलायनस्मरणात् । इति-शब्दः

प्रश्नसमाप्तिं द्योतयति ॥

स होवाच प्रजापतिः स यो ह वै तत्सावित्रस्याष्टाक्षरं पदं श्रियाभिषिक्तं तत्साम्नोऽङ्गं वेद श्रिया हैवाभिषिच्यते सर्वे वेदाः प्रणवादिकास्तं प्रणवं तत्साम्नोऽङ्गं वेद स त्रीँल्लोकाञ्जयति चतुर्विंशत्यक्षरा महालक्ष्मीर्यजुस्तत्साम्नोऽङ्गं वेद स आयुर्यशःकीर्तिज्ञानैश्वर्यवान्भवति तस्मादिदं साङ्गं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्राय नेच्छन्ति द्वात्रिंशदक्षरं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति सावित्रीं लक्ष्मीं यजुः प्रणवं यदि जानीयात्स्त्रीशूद्रः स मृतोऽधो गच्छति तस्मात्सर्वदा नाचष्टे यद्याचष्टे स आचार्यस्तेनैव मृतोऽधो गच्छति ॥

अत्र किल षट्प्रश्नाः प्रश्नचतुष्टयं नैरपेक्ष्येण अङ्गपूर्वत्वा-

दङ्गिज्ञानस्य पारिशेष्याच्च साम्नोऽङ्गं तदैवतं प्रश्नद्वयेन, स प्रजापतिः श्रोतृणां बोधमर्थितां च अवेक्ष्य हर्षितः, निपातानामनेकार्थत्वात्, उत्तरमुवाच—स यो ह वा इति। वीप्सया हर्षनिर्भरता दर्शयति। सावित्रस्य अष्टाक्षरं पदं श्रिया अभिषिक्तं श्रीबीजेनाभिषिक्तमुपरिष्टाच्छ्रीबीजमित्यर्थः। तत्साम्नोऽङ्गं वेद इत्यभिषिक्तमिति वदन् शिरःपूर्वकत्वादभिषेकस्य तस्मिन्नभिषिक्ते शिरोऽङ्गस्थाने साम्नोऽङ्गं वेद इत्यङ्गतां विधत्ते। श्रिया हैव अभिषिच्यत इत्यङ्गेषु सर्वत्र फलश्रवणम् 'द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यात्' इत्यर्थवादः, 'अनतिदृश्नꣳस्तृणाति प्रजयैवैनं पशुभिरनतिदृश्नं करोति' इति न्यायेन गुणफलाधिकारो वा। सर्वे वेदाः प्रणवादिकाः तं प्रणवमिति सर्वे वेदा उपवेदाश्च अष्टौ इत्यष्टसंख्यानन्तर तत्स्थाने हृदयाङ्गस्थाने प्रणवं विद्धत् सर्ववेदादिभूतात्प्रणवात् सामाक्षराण्यधिकतराणीति दर्शयति। तत्साम्नोऽङ्गं वेद स त्रीँल्लोकाञ्जयतीत्युक्तार्थम्। चतुर्विंशत्यक्षरा महालक्ष्मीर्यजुः तस्मिंश्चतुर्विंशत्यक्षरस्थाने सामतृतीयपादादुपरिष्टात् साम्नोऽङ्गं वेद शिखाङ्गस्थान इत्यर्थः। स आयुः यशः ज्ञानप्रशंसा कीर्तिः जनप्रशंसा ज्ञानैश्वर्यवान्भवतीत्युक्तार्थम्। यस्मादेवं सामा-

ङ्गफलम् , तस्मादिदं साङ्गं साम जानीयात्, यो जानीते सोऽमृतत्वं च गच्छतीत्युक्तार्थम् । सावित्रादिमन्त्राणां हृद-याद्यङ्गस्थाने प्राप्तानाम् अत्र आदावेव अङ्गत्वविधानार्थ-मपकर्षस्तु उपक्रमोपसंहाराभ्यां विद्यैक्ये तात्पर्यं दर्शयति । सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्राय स्त्री च शूद्रश्च स्त्री-शूद्रम् तस्मै स्त्रीशूद्राय नेच्छन्तीति निषेधं कुर्वन् प्रधानो-पासनायां स्त्रीशूद्रस्याप्यधिकारं दर्शयति । द्वात्रिंशदक्षरं साम जानीयादिति द्वात्रिंशदक्षराणां सामसंबन्धं विधत्ते । यो जानीते इत्याद्युक्तार्थम् । सावित्रीं लक्ष्मीं यजुः प्रणवं यदि जानीयात् स्त्रीशूद्रः, स मृतः अधः नरकं गच्छतीति प्रत्यवायदर्शनेन निषेधमेव द्रढयति । तस्मात्सर्वदा न आचष्टे इति कदाचिदपि न आचष्टे इत्याचार्यस्य निषेधं दर्शयति । यद्याचष्टे स आचार्यः, तेनैव कथनेन मृतः अधः गच्छ-तीति प्रत्यवायदर्शनेन निषेधमेव द्रढयतीति ॥

स होवाच प्रजापतिरग्निर्वै वेदा इदं सर्वं विश्वानि भूतानि प्राणा वा इन्द्रि-याणि पशवोऽन्नममृतं सम्राट्स्वराड्विरा-ट्तत्साम्नः प्रथमं पादं जानीयाद्ऋग्यजुःसा-मार्थर्वरूपः सूर्योऽन्तरादित्यो हिरण्मयः

पुरुषस्तत्साम्नो द्वितीयं पादं जानीयाद्य ओषधीनां प्रभवति तारापतिः सोमस्तत्साम्नस्तृतीयं पादं जानीयात्स ब्रह्मा स शिवः स हरिः स इन्द्रः सोऽग्निः सोऽक्षरः परमः स्वराट्तत्साम्नश्चतुर्थं पादं जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति। ॐ उग्रं प्रथमस्याद्यं ज्वलं द्वितीयस्याद्यं नृसिं तृतीयस्याद्यं मृत्युं चतुर्थस्याद्यं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति तस्मादिदं साम यत्र कुत्रचिन्नाचष्टे यदि दातुमपेक्षते पुत्राय शुश्रूषवे दाद्यत्यन्यस्मै शिष्याय चेति॥

एवं सामाङ्गान्युक्त्वा तदुपासनायां च स्त्रीशूद्रव्यतिरिक्तमधिकारिणमुक्त्वा अन्त्यप्रश्नाङ्गदेवतानि वक्तुं सामदेवतैव तत्तत्स्थाने निपतितस्याङ्गस्य सैव देवतेति स प्रजापतिर्हृषितः अन्त्यप्रश्न उत्तरमुवाच—अग्निर्वै वेदा इदं सर्वम् इत्यादि यो जानीते सोऽमृतत्वं च गच्छति इत्यन्तं

च ससागराम् इत्यादिना योजनीयम्। एतदुक्तं भवति। क्षीरोदार्णवशायिनि उपविष्टे वा न्यस्तस्य साङ्गस्य साम्नः पादशः उक्तगुणां पृथ्वीं हृदयान्तर्वर्तित्वेन अग्निर्वै वेदा इदं सर्वं विश्वानि भूतानि प्राणा इन्द्रियाणि पशवोऽन्नममृतं सम्राट्स्वराड्विराट्तत्साम्नः प्रथमपादस्य तदङ्गस्य प्रणवस्य हृदयमन्त्रस्य च दैवतं जानीयात् इति पारमेश्वरं हृदयं व्याख्यातम्। तथा यक्षगन्धर्वादिगुणविशिष्टमन्तरिक्षं शिरोऽन्तर्वर्तित्वेन सर्ववेदमयः सूर्यो हिरण्मयः पुरुषस्तत्साम्नो द्वितीयपादस्य शिरोमन्त्रस्य च तदङ्गस्य सावित्रमन्त्रस्य च दैवतमिति पारमेश्वरं शिरो व्याख्यातम्। तथा च वसुरुद्रादित्यैः सेवितं द्युलोकं शिखान्तर्वर्तित्वेन य ओषधीनां प्रभवति तारापतिश्चन्द्रमाः तत्साम्नस्तृतीयपादस्य शिखामन्त्रस्य च लक्ष्मीयजुषश्च दैवतम् इति पारमेश्वरं शिखाङ्गं व्याख्यातम्। तथा च ब्रह्मलोककवचान्तर्वर्तित्वेन स ब्रह्मेत्यादिमन्त्रवर्णात् तत्साम्नश्चतुर्थपादस्य च तदङ्गभूताया नृसिंहगायत्र्याश्च कवचमन्त्रस्य च दैवतम् इति पारमेश्वरं कवचं व्याख्यातम्। तथा, ओमिति प्रणवबहुलेन सामद्वारकेण महाचक्रेण पारमेश्वरमस्त्रं व्याख्यातम्। लोकानामङ्गेष्वन्तर्भावात् सामाङ्गदेवतासाहचर्यात् 'व्यतिषक्ता वा इमे लोकाः

तस्माद्यतिषक्तान्यङ्गानि भवन्ति' इति विधायकवचनाच्च इत्येष उपासनाक्रमः। एवं तावन्न्यस्तसामद्वारिकां पारमेश्वरीमुपासनां परिसमाप्य अथेदानीं न्यस्तं साम उद्धरति— उग्रमिति। ननु नायं सामोद्धारः, किंतु मन्त्रोद्धार एव; सामशब्दस्तु यौगिकवृत्त्या तेन सामर्थ्येन सह वर्तत इति साम मूलमन्त्रः। तन्न, 'गीतिषु सामाख्या' इति गीत्यां सामशब्दस्य रूढत्वात्, 'रूढियोंगमपहरति' इति न्यायात् सामोद्धार एव। ननु वेदेन सामशब्दो यौगिकः कृतः 'सैव नाम त्वमासीरमो नामाहं सोम' इत्युपक्रम्य 'सा चामश्चाभवतां तत्सामाभवत्तत्साम्नः सामत्वम्' इति श्रुतेः। सत्यं भवतु यौगिकः, तथाप्युभयोद्धारे सामोद्धारस्तु सिद्ध एव। एवं रूढेर्वैदिकप्रयोगाच्च सामोद्धारे स्थिते द्वात्रिंशदक्षरं साम जानीयादिति सामान्याकारेण सामसंबन्धे सिद्धे विशेषाकारेण मूलमन्त्राक्षराणां सामसंबन्धं विधातुमाह— उग्रं प्रथमस्याद्यमित्यादिना। अत्र हि सामगानां हस्ते मुखस्वरनिर्णयो द्रष्टव्यः। सप्तधा हि स्वरः षड्जादिभेदेन। तत्र हस्तगतस्वरानुसारेण मुखेन गीत्युच्चारणम्; तत्र हस्ताङ्गुष्ठोत्तमपर्वणः क्रौष्टकसंज्ञ उच्चैर्भावे कृते सर्वोदात्तां त्रिमात्रां चतुर्मात्रां पञ्च-

मात्रां वा कृत्वा विहिताक्षरेषु गीतिं गायेत्; तामाद्यं निरपेक्षं स्वरमित्याचक्षते, ततोऽङ्गुष्ठोत्तमपर्वणः वक्रीभावे कृते पूर्वोदात्तापेक्षया अनुदात्ताम् उत्तरापेक्षया उदात्ताम् एवमेवाङ्गुष्ठेन तर्ज्जनीमध्यमपर्वस्पर्शे कृते तत्संनिहिताङ्गुलिस्पर्शे उपकनिष्ठिकास्पर्शे कनिष्ठिकामध्यमपर्वस्पर्शे कृते पूर्वपूर्वापेक्षया उत्तरोत्तरापेक्षया उदात्तानुदात्तात्मिकां विहिताक्षरेषु गीतिमुच्चार्य अङ्गुष्ठेन कनिष्ठिकामूलपर्वस्पर्शे कृते सर्वानुदात्तां गीतिमुच्चारयेत्; तं त्वन्त्यं स्वरमित्याचक्षते । एवं मुखहस्ताभ्यां षड्जादयो यथाक्रमं सप्त स्वरा निष्पाद्यन्ते । स एष सामगानां सर्वसामसाधारणः स्वरनिर्णयः । ततश्च, उग्रं प्रथमस्य आद्यं सर्वोदात्तं सामपदानुषङ्गात् उक्ते अक्षरद्वये आद्यम् आद्यस्वरात्मकं साम जानीयादिति विधीयते, अन्यथा प्रथमपादस्य आद्यम् अक्षरद्वयं जानीयात् इत्येतस्य द्वितीयोपनिषदुक्तपदोद्धारादेव ज्ञातत्वात् 'अप्राप्ते शास्त्रमर्थवत्' इति न्यायो बाधितः स्यात्, सामपदस्य व्यर्थता स्यात्, उभयविधाने च वाक्यभेदः स्यात् । वेदितव्यसामसंबन्धस्वरविशेषे विहिते अनिर्धारितस्वरविशेषकं साम कथं विधातुं शक्येत? तस्मात् मूलमन्त्रोक्तप्रथमपादाक्षरद्वयस्य आद्यशब्दोक्तस्वरविशेषात्मकसामसंबन्ध एव

विधीयते । एवमुत्तरेष्वपि त्रिषु वाक्येषु योजनीयम् । ज्वलं द्वितीयस्य पादस्य आद्यं साम गीतिं जानीयात् । नृसिं तृतीयस्य आद्यमित्युक्तार्थम् । मृत्युं चतुर्थस्य आद्यमित्यादि गच्छतीत्यन्तम् उक्तार्थम् । यस्मादिदं साम परमरहस्यतरम्, तस्मादिदं साम यत्र कुत्रचित्पुंसि न आचष्टे इति कथयितुर्निषेधः । यदि दातुमपेक्षते पुत्राय शुश्रूषवे शुश्रूषारताय आचार्योपसर्पणेन श्रवणेच्छावते दास्यति दद्यादित्यर्थः । अन्यस्मै शिष्याय प्रागुक्तलक्षणाय च इति । इति-शब्दः सामदातृप्रतिग्रहीत्रोः अधिकारसमाप्तिं द्योतयति ॥

एवं तावत्साम्ना सह दातृप्रतिग्रहीत्रोः संबन्धं विधाय श्रीक्षीरोदार्णवशायिनो नृकेसरिणो योगिवदासीनस्य शयानस्य वा ध्येयस्य आश्रयाश्रयिलक्षणसंबन्धविशेषोपासनां कृत्स्नफलवतीं विधातुमाह—

क्षीरोदार्णवशायिनं नृकेसरिं योगिध्येयं परमं पदं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति वीरं प्रथमस्यार्धान्त्यं तंसं द्वितीयस्यार्धान्त्यं हंभी तृतीयस्यार्धान्त्यं मृत्युं चतुर्थस्यार्धान्त्यं

साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति तस्मादिदं साम येन केनचिदाचार्यमुखेन यो जानीते स तेनैव शरीरेण संसारान्मुच्यते मोचयति मुमुक्षुर्भवति जपात्तेनैव शरीरेण देवतादर्शनं करोति तस्मादिदमेव मुख्यं द्वारं कलौ नान्येषां भवति तस्मादिदं साङ्गं साम जानीयाद्यो जानीते स मुमुक्षुर्भवति ॥ ५ ॥

क्षीरोदार्णवशायिनं ना चासौ केसरी च नृकेसरी तं नृकेसरिणम् । नृकेसरिमिति छान्दसम् । योगिवदासीनं शेषभोगमस्तकपरिवृतं रहस्यकल्पान्तरपर्यालोचनया अस्मिन्नेव स्थाने शाखान्तरश्रुत्यन्तरपर्यालोचनया आसीनं शेषभोगमूर्धावृतम् । द्विशाखगामिनी इयमुपनिषत् भृगुशाखायाम् आङ्गिरसशाखायां च । परमं पदं परमाश्रयभूतम् । जानीयादिति सर्वत्रानुषज्यते । सामेत्यादि गच्छतीत्यन्तम् उक्तार्थं भवति । यत्साम जानीयात् तदुक्तगुणविशिष्टे नृकेसरिणि साङ्गं न्यस्तं जानीयादित्यर्थः । इदा-

नीं साम्नो द्वितीयोद्धारमक्षराणां स्वराविशेषसंबन्धार्थमाह— वीर प्रथमस्यार्धान्त्यं प्रथमपदोक्ताक्षरद्वय आद्यार्धे 'प्रथमातिक्रमे कारणाभावात्' इति न्यायेन अन्त्यम् अन्त्यस्वरात्मकं साम जानीयात् इत्यनुषज्यते। अत एव अस्मिन्नेव स्थाने शाखान्तरे पाठान्तरं वीरं प्रथमाद्यार्धस्य अन्त्यमिति। अत्रापि विधानविषये प्रागुक्ते चोद्यसमाधाने। ततो वीरो अनुदात्तात्मिका गीतिः; रं मध्यवर्तिस्वरात्मिका गीतिः; एवमुत्तरेष्वपि तदुद्धारवाक्येषु योजनीयम्। तंसं द्वितीयस्यार्धान्त्यम् इत्युक्तार्थम्। तम् अनुदात्तात्मिका गीतिः, हंभी तृतीयस्यार्धान्त्यम्। तृतीयाद्यार्धस्य अन्त्यमिति पाठान्तरम्। हम् अनुदात्तात्मिका गीतिः; भी मध्यवर्तिस्वरात्मिका गीतिः; मृ अनुदात्तात्मिका गीतिः; त्युं पारिशेष्यान्मध्यवर्तिस्वरात्मिका गीतिः; चतुर्थस्यार्धान्त्यम् इत्युक्तार्थम्। मृत्युं चतुर्थाद्यार्धस्य अन्त्यमिति पाठान्तरम्। सामेत्यादि गच्छतीत्यन्तम् उक्तार्थम्। यस्मात्सामैकदेशपरिज्ञानात् कृत्स्नफलावाप्तिः तत्र कृत्स्नसामपरिज्ञाने किमुतेत्याह— तस्मादिदं विहिताक्षरेषूद्धृतं कृत्स्नं साम येन केनचित् येन केनापि सामोद्धारवाक्यकदम्बकेनापि यो जानीते इत्यनुषङ्गः। आचार्यमुखेन यो जानीते इत्याचार्यमुखोपायान्तर-

योर्विकल्पः । यद्वा आचार्यशब्दो वेदमभिधत्ते, 'तस्मादाचार्यवचः प्रमाणम्' इत्यादौ प्रयोगात्; आचार्यमुखेन वेदमुखेन सामोद्धारवाक्यकदम्बकेनेत्यर्थः । स तेनैव स्वयमेव सामपरिज्ञानेन संसारान्मुच्यते, मोचयति अन्यं वा साम ज्ञापयन्। सामपरिज्ञानात् सरागोऽपि मुमुक्षुर्भवति जपात्, संख्यानुपादानात् सकृदेव सामजपात् । यत्साङ्गेन साम्ना पारमेश्वरं शरीरं क्षीरोदार्णवशायीत्यादिपदकदम्बकव्याकृतम्, तेनैव शरीरेण देवतादर्शनं करोति देवता प्रत्यक्षा भवति । तस्मादिदमेव साङ्गं सामैव मुख्यं द्वारं देवतादर्शने तद्व्याकृतौ च; कलौ पापबाहुल्येन अन्येषां सामरहितानां केवलमूलमन्त्रपरिज्ञातृणां देवतादर्शनं झटिति न भवतीत्यर्थः । यस्मादिदं साङ्गं साम देवतादर्शने देवताकारव्याकृतौ च मुख्यमेव द्वारम्, तस्मादिदं साङ्गं साम जानीयात्; मुमुक्षुर्भवति मानुषानन्दारूढोऽपि एतत्परिज्ञानात् मानुषानन्दं विहाय मोक्षेप्सुर्भवति । यद्वा मुमुक्षुः एतज्जानीयात् इत्यन्वयः । तस्य भवतीति फलनिर्देशः । भू सत्तायामिति धातोः रूपम् । साकारब्रह्मोपासनाद्वारं सन्मात्रतां प्राप्नोतीत्यर्थः ॥

ॐ ऋतं सत्यं परं ब्रह्म पुरुषं नृके-
सरिविग्रहम् । कृष्णपिङ्गलमूर्ध्वरेतं वि-

रूपाक्षं शंकरं नीललोहितमुमापतिं पशुपतिं पिनाकिनं ह्यमितद्युतिमीशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्यो यजुर्वेदवाच्यस्तं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति । महा प्रथमान्तार्धस्याद्यं र्वतो द्वितीयान्तार्धस्याद्यं षणं तृतीयान्तार्धस्याद्यं नमा चतुर्थान्तार्धस्याद्यं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति । तस्मादिदं सच्चिदानन्दमयं परं ब्रह्म तमेवं विद्वानमृत इह भवति । तस्मादिदं साङ्गं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥ ६ ॥

एवं तावत् यदङ्गम् उपास्यदेवताकारव्याकृतौ क्षमम्, तदेवाङ्गं निर्दिशन् आह— ओमिति । एतच्चतुर्थोपनिषदि स्पष्टीकरिष्यति— ओमित्येतदक्षरम् इत्यादिना । नृकेसरिविग्रहो व्याख्यातः; स न स्वमायया लीलाविग्रहः, किं तु

कर्मविपाकजन्मानुभवरूपाणां केवलतिर्यग्रूपाणां मत्स्यकूर्मादीनां केवलातिर्यग्रूपाणां वामनादीनां लीलारूपत्वेनैव दृष्टत्वात् अस्य च तद्विलक्षणत्वात् न स्वमायालीलाविग्रहता स्यादिति इमामाशङ्कां मन्त्रवर्णादपनेतुं मन्त्रमाह— ऋतं सत्यं पर ब्रह्म पुरुषं नृकेसरिविग्रहम् । ना च पुरुषश्च केसरी च सिंहश्च नृकेसरी । तत्र पुरुषमित्यनूद्य सत्यं परं ब्रह्म जानीयादिति विधीयते । एतदुक्तं भवति— सत्यस्य परब्रह्मणः स्वमायया लीलाविग्रहं पुरुषाकारम् ऋतमिति परमार्थं जानीयादिति यावत् । यद्वा, ऋत सत्य परं ब्रह्म ब्रह्मात्मकं पुरुषाकारम् ओमित्योंकारेण व्याख्यातम्, ऋतमिति धननाम ऋतमयं हिरण्मयं हिरण्यमयं जानीयादित्यर्थः । अत एव सतो बन्धुमिति बन्धुरिति धननाम ब्रह्मणो विवर्तं हिरण्मयम् असति ब्रह्मणि हृदि निरविन्दन्निति कैश्चिद्व्याख्यातम् । कृष्णपिङ्गलं कृष्णपिङ्गले अक्षिणी यस्य तं तथोक्तम् । ऊर्ध्वरेतमिति च्छान्दसम् । ऊर्ध्वरेतस्कं योगारूढमासीनं विरूपाक्षं ललाटनेत्रम् . ललाटनेत्रेण रौद्रता प्राप्नोति तद्व्यावृत्त्यर्थं शंकरं सुखकरं वरदाभयहस्तं शकरसाहचर्यान्नीललोहितमिति नीलकण्ठम् उर्वरितप्रदेशे लोहितम् । नीललोहितौ वर्णौ ललाटनेत्रयोर्यथायोग्यतयास्य धृतौ तथो-

क्तम् । कल्पान्तरे तु श्वेतवर्णम् ; एवं सुवर्णलोहितशुक्लाकाराणां विकल्पः कामनावशाद्व्यवस्थितः । उमापतिं उमा गौरी तस्याः पतिः तम् । 'श्रियं लक्ष्मीम्' इति सप्त शक्तयो वक्ष्यन्ते । पशुपतिः पशूना प्राणिनां पतिः, यद्वा पशूनां वेदानां गायत्र्यादीनाम्, 'पशवो वै छन्दांसि' इति श्रुतेः । पिनाकिनं पिनाकधनुर्हस्तम् । हीति निश्चितार्थः । अमितद्युतिम् अमितप्रकाशम् । ईशानः सर्वविद्यानां प्रभुः । ईश्वरः सर्वभूतानां प्रभुः । ब्रह्माधिपतिः, ब्रह्म तपः मनसो विषयेभ्यो विवर्त्य दर्शनं पूर्वोक्तोपासनं तस्य अधिपतिः अधिष्ठाय पालयिता । ब्रह्मणोऽधिपतिः ब्रह्मणोऽधिष्ठाता । ब्रह्मेत्यन्ननाम अन्नं क्षीरं ततश्च क्षीरस्य अधिष्ठाता । यद्वा ब्रह्मणः अथर्ववेदस्य अधिष्ठाता । एवं यो यजुर्वेदवाच्यः प्रागुक्तेन यजुषा वेदेन वाच्यः यजुर्वेदवाच्यः । प्रागुक्तानां गुणानां प्रथमानिर्दिष्टानां जानीयादित्यनेनान्वयं कर्तुं विशिष्टतया एकत्वाभिप्रायेण द्वितीयान्ततया निर्दिशति— तमिति । सामेत्यादि गच्छतीत्यन्तम् उक्तार्थम् । एवं प्रागुक्तमाकारं नृकेसरिण्येव जानीयात् । अत्र केचित्प्रागुक्तमाकारं मन्त्रवर्णात्पृथक्त्वेन उपास्यमाचक्षते ; तदयुक्तम्, एवं तर्हि उपक्रमोपसंहाराभ्यां नृसिंहब्रह्मविद्यैक्यमवगतं बाध्येत । नृसिंहपद-

व्याख्यानावसरे नृसिंह एव आसीत्परमेश्वर इति नृसिंहेश्वरयोः सामानाधिकरण्यमवगतं बाध्येत । तस्मात् त्रिनेत्राद्याकारविशिष्टः अस्यां विद्यायां नृसिंह एवोपास्य इति सिद्धम् । अथेदानीं तृतीयं सामोद्धारमाह—म पारिशेष्यान्मध्यस्वरवर्तिगीतिः ; हा सर्वोदात्तात्मिका गीतिः ; प्रथमान्तार्धस्य आद्यमिति । प्रथमपादोक्ताक्षरद्वये अन्त्यार्धस्य आद्यस्वरम् आद्यस्वरयुक्तं साम जानीयात् इत्यनुषज्यते । वं पारिशेष्यान्मध्यस्वरवर्तिगीति ; तां सर्वोदात्तात्मिका गीतिः ; द्वितीयान्तार्धस्य आद्यमित्युक्तार्थम् । ष पारिशेष्यान्मध्यस्वरवर्तिगीतिः ; णम् , सर्वोदात्तात्मिका गीतिः ; तृतीयान्तार्धस्य आद्यमित्युक्तार्थम् । न पारिशेष्यान्मध्यस्वरवर्तिगीतिः ; मा सर्वोदात्तात्मिका गीतिः ; चतुर्थान्तार्धस्य आद्यमित्युक्तार्थम् । सामेत्यादि गच्छतीत्यन्तम् उक्तार्थम् । ननु अत्र अक्षरद्वयमध्ये अन्तार्धस्येत्यन्तस्य अक्षरस्यार्धं दीर्घादिमात्रा तस्या आद्यस्वरसंबन्धः कस्मान्न विधीयते ? तन्न, षष्ठीतत्पुरुषात्कर्मधारयस्य बलीयस्त्वात् । अन्तं च तदर्धं च अन्तार्धं प्रथमापेक्षया द्वितीयमक्षरम् अन्तं च तदर्धं चेति ; अन्यथा अन्तस्याक्षरस्य मात्रादि अर्धमिति षष्ठीतत्पुरुषः, ' एतया निषादस्थपतिं याजयेत् ' इति न्यायात् । ननु अतितुच्छमेतत् , मात्रायामप्याधा-

रापेक्षया कर्मधारयसंभवात्। सत्यम्। 'द्वात्रिंशदक्षरं साम' इत्यत्र द्वात्रिंशदक्षराणामेव स्वरात्मकसामसंबन्धः श्रूयते, न मात्राणाम्, तस्मादन्तार्धशब्देन द्वितीयाक्षरस्यैव आद्यस्वरसंबन्धो विधीयत इति सिद्धम्। यस्मात्सामैकदेशोऽपि कृत्स्नफलावाप्तौ क्षम., किमुत कृत्स्नसामज्ञानम्। तस्मादिदं सच्चिदानन्दमयं परं ब्रह्म, तादृशनृसिंहप्रतिपादकमूलमन्त्राभिव्यञ्जकत्वात् परं ब्रह्म जानीयादित्यनुषज्यते। सामाभिव्यक्तमूलमन्त्रप्रतिपाद्योऽयं नृसिंहाकारसच्चिदानन्दं परं ब्रह्मेत्येकः संबन्धः। यद्वा सच्चिदानन्दमयं ब्रह्मेत्येकः। प्राङ्मन्त्रवर्णात् ब्रह्माकारता प्रतिपादितापि अदृढा स्यादिति शङ्का, तद्व्यावृत्त्यर्थमिदमुच्यते—सच्चिदानन्दमयं ब्रह्म जानीयादिति। तं नृसिंहाकारममुम् एवमुक्तप्रकारेण विद्वान् जानन् अमृते क्षीरे 'पञ्चामृतान्यानय' इत्यादावमृतशब्दस्य क्षीरे दृष्टत्वात्, इहैव लोके उत्कृष्टो भवतीत्यर्थः। यद्वा एवं पञ्चाङ्गन्यासे कृते इहैव जीवन्मुक्तो भवति आनन्दो भवतीत्यर्थः। यस्मात्साङ्गं साम कृत्स्ननृसिंहब्रह्मविद्याप्रतिपादकमूलमन्त्राभिव्यञ्जकम्, तस्मादिदमित्यादि गच्छतीत्यन्तम् उक्तार्थम्॥

अस्य साम्नः उक्तप्रकारेण विश्वस्रष्टृत्वं दर्शयितुमाह—

विश्वसृज एतेन वै विश्वमिदमसृजन्त

यद्विश्वमसृजन्त तस्माद्विश्वसृजो विश्वमेनाननु प्रजायते ब्रह्मणः सायुज्यं सलोकतां यन्ति तस्मादिदं साङ्गं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति । विष्णुं प्रथमस्यान्त्यं मुखं द्वितीयस्यान्त्यं भद्रं तृतीयस्यान्त्यं म्यहं चतुर्थस्यान्त्यं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति योऽसौ सोऽवेदयदिदं किं चात्मनि ब्रह्मण्यानुष्टुभं जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति । स्त्रीपुंसोर्वा य इहैव स्थातुमपेक्षते स सर्वैश्वर्यं ददाति यत्र कुत्रापि म्रियते देहान्ते देवः परं ब्रह्म तारकं व्याचष्टे येनासावमृती भूत्वा सोऽमृतत्वं च गच्छति । तस्मादिदं साममध्यगं जपति तस्मादिदं सामाङ्गं प्रजापतिस्तस्मादिदं सामाङ्गं प्रजापतिर्य एवं वेदेति महोप-

निषद्य एतां महोपनिषदं वेद स कृतपुरश्चरणोऽपि महाविष्णुर्भवति महाविष्णुर्भवतीति ॥ ७ ॥

इति प्रथमोपनिषत् ॥

विश्वसृजः एतेन साम्ना नृसिंहब्रह्मविद्याप्रतिपादकमूलमन्त्राभिव्यञ्जकेन, वै प्रसिद्धम्, सर्वमिदमसृजन्त । यत् यस्मात्सर्वमसृजन्त, तस्मात् विश्वसृजः— इति विश्वसृक्शब्दं निर्वक्ति । विश्वमेनाननु प्रजायते । ब्रह्मणः सायुज्यं सलोकतां यन्तीति उपासकानां तादात्म्यभेदोपासनयोः भेदेन फलनिर्देशः । ब्रह्मणः सायुज्यं सलोकतां यन्तीति यस्मात्साङ्गात्साम्नः ईदृशमुपासकानां फलम्, तस्मादिदमित्यादि गच्छतीत्यन्तम् उक्तार्थम् । तस्मादिदं साङ्गं सामेत्यसकृदभ्यासस्य अयमभिप्रायः— साङ्गसाम्नैव कृत्स्नब्रह्मविद्याप्रतिपादकमन्त्राभिव्यक्त्या या ब्रह्मविद्या उत्पन्ना सैव फलवती नान्येति । अत एवोक्तम् 'तस्मादिदमेव मुख्यं द्वारं कलौ' इति पापभूयिष्ठेऽत्र काले अस्यैव मुख्यता अन्येषां तु गौणतेति । कालान्तरे तु अस्या अन्यस्य वैकल्पिकी मुख्यतेति सर्वमनवद्यम् । अथेदानीं चतुर्थं सामोद्धारमाह—

विष्णुं सर्वानुदात्तात्मिका गीतिः । प्रथमस्य अन्त्यमिति, प्रथमपादोक्ताक्षरद्वयेऽपि अन्त्यम् अन्त्यस्वरयुक्तं जानीयादिति प्राक्तनमनुषज्यते । मुखं सर्वानुदात्तात्मिका गीतिः द्वितीयस्य अन्त्यमिति, द्वितीयपादोक्ताक्षरद्वयेऽपि अन्त्यस्वरयुक्तं सामेति संबन्धः । ननु सर्वोद्धारेषु प्रथमद्वितीयशब्दौ कस्मात्पादाभिप्रायेण व्याख्यायेते, न उक्ताक्षरसंख्यापेक्षया ? तथा हि, प्रथमान्त्यमिति उक्ताक्षरद्वयमध्ये प्रथमस्याक्षरस्य अन्त्यं स्वरं जानीयादिति । तथा द्वितीयान्त्यमिति उक्ताक्षरद्वयमध्ये द्वितीयस्याक्षरस्य अन्त्यं स्वरं जानीयात् । एवं प्रथमोद्धारेऽपि प्रथमस्याक्षरस्य द्वितीयस्याक्षरस्य आद्यस्वरं जानीयादिति कस्मान्न व्याख्यायते ? उच्यते । सर्वत्र हि अक्षरद्वयमुक्त्वैव प्रथमद्वितीयतृतीयचतुर्थशब्दाः श्रूयन्ते । न हि अक्षरद्वयोक्तौ तृतीयचतुर्थशब्दावुपपन्नौ, तृतीयचतुर्थयोरक्षरयोरभावात्, इति पादाभिप्रायेण व्याख्येयाविति निश्चिते, तत्साहचर्यात्प्रथमद्वितीयशब्दावक्षरद्वयोक्तावुपपन्नाविति न अक्षराभिप्रायेण व्याख्येयौ ; किं तु पादाभिप्रायेणैवेति स्थितम् । भद्रम्, सर्वानुदात्तात्मिका गीतिः तृतीयस्य अन्त्यमित्युक्तार्थम् । स्यहम्, सर्वानुदात्तात्मिका गीतिः चतुर्थस्य अन्त्यमित्युक्तार्थम् ।

ननु कस्मान्नैरन्तर्येण सामोद्धाराभावः, नैरन्तर्येण हि उद्धृते साम्नि सौकर्यं स्यात्— द्वितीयोपनिषदुक्तपदोद्धारवत्। उच्यते— सत्यं सौकर्यं स्यात्, किं तु सामद्रष्टा प्रजापतिः सर्वान्देवान्द्रष्टुं शक्तोऽपि मूलमन्त्रवत् नेदं साम अपश्यत्, किं तु तद्दर्शनाय अस्यामुपासनायाम् उपासनैकदेशानुष्ठानात् ईषच्छुद्धान्तःकरणः सन् प्रथमोद्धारमपश्यत्, पुनश्च क्षीरोदार्णवाद्युपास्यमुपास्य द्वितीयमुद्धारमपश्यत्, एवमभ्यधिकोपासनानुष्ठानादभ्यधिकशुद्धान्तःकरणः तृतीयं चतुर्थमपश्यदिति प्रजापतेरपि तद्दर्शने महानायासः; किमुतान्येषाम्— इति नैरन्तर्येण सामोद्धाराभावः साम्नो दुर्लभतां दुर्दर्शनतां च दर्शयति। यः प्रजापतिरसौ स प्रजापतिरवेदयत् निवेदितवान् उपदिष्टवानिदं किंच यदिदं प्रागुक्तमुपासनम् आत्मनि ब्रह्मणीति ब्रह्मण्यात्मनीति ब्रह्मात्मकतां स्वस्मिन् परिज्ञाय आनुष्टुभम् अनुष्टुप्संबन्धि सामद्वारकमुपासनं जानीते यो जानीते सोऽमृतत्वं च गच्छतीत्युक्तार्थम्। स्त्रीपुंसोर्वा स्त्रियां वा पुंसि वा प्रागुक्तमुपासनं प्रजापतिरुपदिष्टवानित्यर्थः। अथवा ब्रह्मणि हिरण्यगर्भे एतदुपासनं स्त्रीपुंसोर्वा। यद्वा आत्मनि ब्रह्मणीति ब्रह्मणि परमेश्वरे आनुष्टुभं साम न्यस्तं जानीते। अस्मि-

न्पक्षे प्रागुक्तो यच्छब्दः उपास्यपरः; न प्रजापतिपरः । स्त्रीपुंसोर्वा स्त्रीपुंसोश्च वा-शब्दः समुच्चयार्थः, 'वायुर्वा त्वा मनुर्वा त्वा' इत्यादौ दृष्टत्वात् । एतदुक्तं भवति— उपास्येश्वरे सामन्यासं कृत्वा उपासकेन आत्मन्यपि सामन्यासः कार्यः । य उपासकः इह लोके उत्कर्षेण स्थातुमपेक्षते, तस्मै सर्वैश्वर्यं ददाति । देहान्ते तु देवः परं ब्रह्म तारकं व्याचष्टे, कामिनं प्रकृत्य देहान्ते इति विशेषणोपादानात् कामित्वेन प्रागधिकाराच्च । निष्कामस्यार्वागपि देवः परं ब्रह्म तारकं प्रणवस्थं सामाङ्गं प्रणवेन व्याख्यातम्, येन प्रणवेन व्याख्यातेन अमृती भूत्वा स श्रोता अमृतत्वं च कैवल्यं प्राप्नोति । यस्मात् तारकस्थं परब्रह्म व्याख्येयम्, तस्मादिदं तारकं साममध्यगं साममध्यवर्ति जपति, सामोपासनाङ्गप्रणवजपो यथाशक्तीति दर्शयति । एतदेव आह— तस्मादिदं तारकं साम्नोऽङ्गं प्रजापतिः ऋषित्वेन । यद्वा इदं तारकं परमेश्वरस्वरूपाख्यानेन, साम च परमेश्वरविषयविद्याप्रतिपादकमूलमन्त्राभिव्यञ्जकत्वेन, प्रजापतिरुभयकथनेन—इत्येतत्त्रितयमवश्यमुपासनायामङ्गम् । एतदेव त्रितयमस्यामुपासनायामावश्यकमिति दर्शयितुं द्विरभ्यासः—तस्मादिदं सामाङ्गं प्रजापतिः तस्मादिदं सामाङ्गं प्रजापतिः इति ।

यस्मादेवं साम, तस्मादस्य नैरन्तर्येणोद्धारः स्पष्टीक्रियते । तत्र मूलमन्त्रप्रथमपादाक्षरेष्वष्टसु मुखहस्ताभ्यां हस्ताङ्गुष्ठोत्तमपर्वोच्छ्रयेण आद्यमक्षरद्वयं मुखेन प्रागाय तृतीयमक्षरं कनिष्ठिकामूलपर्वस्पर्शेन तथैव मुखेन प्रागाय चतुर्थं पञ्चमं चैकैकं पृथक्पृथगङ्गुष्ठोत्तमपर्वतर्जनीस्पर्शतत्संनिहिताङ्गुल्युपकनिष्ठिकाकनिष्ठिकामध्यमध्यपर्वस्पर्शेन तथैव मुखेन प्रागायेत्। षष्ठमङ्गुष्ठोत्तमपर्वोच्छ्रयेण तथैव मुखेन प्रागायेत। सप्तमाष्टमाक्षरे कनिष्ठिकामूलपर्वस्पर्शेन यथाविहितस्वरैः आद्याक्षरद्वयाद्यतृतीयाक्षरान्त्यचतुर्थपञ्चमाक्षरमध्यषष्ठाक्षराद्यसप्तमाष्टमाक्षरान्त्यैः अप्रमत्तः तथैव मुखेन गायेत् । तथैव तृतीयषष्ठयोरङ्गुलीभ्यां दीर्घं गृह्णीयात्। एवं द्वितीयतृतीयचतुर्थपादाक्षरेष्वष्टसु साम गेयम । द्वितीयपादे षष्ठं दीर्घं तृतीये चतुर्थमक्षरं दीर्घं चतुर्थे षष्ठं दीर्घमिति शुद्धं साम; साङ्गं चेत् प्रथमपादान्ते प्रणवं निक्षिप्य द्वितीयपादान्ते सावित्रीं तृतीयपादान्ते यजुर्लक्ष्मीं चतुर्थपादान्ते नृसिंहगायत्रीं गायेत । स्त्री चेत् शूद्रश्चेत् एतत्त्रितयं विहाय शुद्धं साम गायेत् । एष नैरन्तर्येण सामोद्धारः; उच्चारस्यातिदुर्लभत्वादतिरहस्यत्वाच्च लिखितोऽपि न लिखित्वा प्रदर्श्यते, वाचैव स्पष्टीक्रियत इति । य एवम् उक्तप्रकारेण वेद उपास्ते । इति-

शब्दः अस्या उपासनाया नामकरणं करोति । उपनिषत्सु एष समयः प्रणवगर्भितप्रणवबहुलोपासनानां महोपनिषदिति नाम तत्र तत्र । महोपनिषत् उपनिपूर्वस्य सदेः क्विबन्तस्य गत्यवसादनविशरणार्थत्वात् महद्ब्रह्म गमयति ज्ञापयतीति महोपनिषत्, महान्तं संसारमवसादयति क्लेशयति नाशयतीति वा महोपनिषदिति । 'ओमित्यात्मानं युञ्जीतैतद्वै महोपनिषदम्' इति श्रुतेः । य एताम् उक्तप्रकारेण प्रतिपादितां महोपनिषदं वेद उपास्ते, स उपासकः कृतपुरश्चरणः कृतं प्रागुक्तोपासनं येन स तथोक्तः महाविष्णुर्भवति । विष्लृ व्याप्तौ । द्विरभ्यासः प्रथमोपनिषत्समाप्तिं द्योतयति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
नृसिंहपूर्वतापनीयोपनिषद्भाष्ये
प्रथमोपनिषद्भाष्यं संपूर्णम् ॥





नृसिंहपूर्वतापनीयोपनिषद्भाष्यम्

द्वितीयोपनिषत्

द्वितीयोपनिषत् ॥

एवं तावत्प्रथमोपनिषदन्ते 'य एतां महोपनिषदं वेद' इत्येतच्छब्दपरामृष्टसामोपनिषदो महोपनिषदश्च सामानाधिकरण्यमुक्तम्। महोपनिषच्च द्वात्रिंशन्नृसिंहलीलाविग्रहस्तुतिमन्त्रालिका, तस्या अन्ते 'य एवं वेदेति महोपनिषत्' इत्युपसंहारात्। तत्र तावत् उभयोपनिषत्सामानाधिकरण्यात् सामाभिव्यक्तमूलमन्त्रद्वात्रिंशदक्षरेषु महाचक्रन्यस्तेषु नृसिंहद्वात्रिंशद्धूहानुपास्य, तैरेव मन्त्रैः तां देवतां स्तुत्वा सामोपासनां कुर्यादित्यवगम्यते। अत एव स्तुत्युपनिषदः पुरश्चरणोपासनार्थत्वमाह— 'स कृतपुरश्चरणः' इति। कृतं पुरश्चरणं स्तुत्युपासनं येन स तथोक्तः। एवं पुरश्चरणोपासनायां मुमुक्षोरुपासकस्य अधिकारसंपत्तिमभिधाय तस्यैव तदुपासनास्वीकारेऽन्यदप्यधिकारिविशेषणमाख्यायिकाद्वारेण आह—

देवा ह वै मृत्योः पाप्मभ्यः संसाराच्चाबिभयुस्ते प्रजापतिमुपाधावंस्तेभ्य एतं

मन्त्रराजं नारसिंहमानुष्टुभं प्रायच्छत्तेन वै स मृत्युमजयन्स पाप्मानमतरन्स संसारं चातरंस्तस्माद्यो मृत्योः पाप्मभ्यः संसाराच्च बिभीयात्स एतं मन्त्रराजं नारसिंहमानुष्टुभं प्रतिगृह्णीयात्स मृत्युं जयति स पाप्मानं तरति स संसारं तरति तस्य ह वै प्रणवस्य या पूर्वा मात्रा पृथिव्यकारः स ऋग्भिर्ऋग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्यः सा साम्नः प्रथमः पादो भवति द्वितीयान्तरिक्षं स उकारः स यजुर्भिर्यजुर्वेदो विष्णू रुद्रास्त्रिष्टुब्दक्षिणाग्निः सा साम्नो द्वितीयः पादो भवति तृतीया द्यौः स मकारः स सामभिः सामवेदो रुद्रा आदित्या जगत्याहवनीयः सा साम्नस्तृतीयः पादो भवति यावसानेऽस्य चतुर्थ्यर्धमात्रा सा सोमलोक ओंकारः सोऽथर्वणैर्मन्त्रैरथ-

र्ववेदः संवर्तकोऽग्निर्मरुतो विराडेक ऋषिर्भास्वती मा साम्नश्चतुर्थः पादो भवति ॥ १ ॥

देवा अकृतपुरश्चरणा वै मृत्योरबिभयु.। ते उपासका देवाः मृत्योः मरणहेतोर्वैवस्वतात् , स च मृत्युः पाप्मपूर्वक इति पाप्मभ्यः, तच्च पापं संसारपूर्वकमिति संसाराच्च अज्ञानभयात् समस्ताद्व्यस्ताद्वितयात् अबिभयु. भयमागच्छन्— इति प्रत्येकं संबध्यते । द्विविधा हि उपासका देवाः मुमुक्षवः अमुमुक्षवश्चेति; तत्र मुमुक्षूणां त्रितयं समुचितं विशेषणम् । अमुमुक्षूणां ह्यकृतपुरश्चरणानां व्यस्तं द्वितयं विशेषणम्, केचन केवलं मृत्योर्जयमेव कामयन्ते, केचन पाप्मन एव जयम् , अन्ये तु त्रितयजयम् । ते द्विविधा देवाः प्रजापतिमुपाधावन् , उपपूर्वको धावतिः पूजामाह, उप समीपमेत्य प्रजापतिमपूजयन् स्तुतिशुश्रूषादक्षिणाभिश्च । तेभ्यो देवेभ्यः प्रीतः प्रजापतिः एतं मन्त्रराजमित्याद्यानुष्टुभमित्यन्तं सर्वमुक्तार्थं प्रायच्छत् प्रादात्। तेन प्रदानेन वै स प्रजापतिः मृत्युमजयत् । देवा अपि मृत्युमजयन् । अजयन्निति बहुवचनात् स इत्येकवचनात् उभयत्रापि प्रकृत्यर्थसंबन्धे प्राप्ते, यथायोग्यतया वचनं योज्यम् । तथा तेनेत्यर्थप्राप्तं स्वीकरणं

परामृश्यते। एतदुक्तं भवति—तेन प्रदानेन प्रजापतिः मृत्युमजयत्, तेन स्वीकारेण देवा मृत्युमजयन्निति। कैश्चिदेवं व्याख्यातम्—समृत्युमिति समस्तं कृत्वा सह मृत्युना वर्तते यदज्ञानं तत्तथोक्तम्, तन्न, पूर्वं तस्याप्रकृतत्वात्। अथार्थप्राप्तं प्रकृतमिति चेत्, भवतु न कश्चिद्विरोधः; किं तु दातुः फलं न संकीर्तितं स्यादिति दाता कथं प्रवर्तेत? दक्षिणादिभिरिति चेत्, न। विरक्ते तु का वार्ता। तस्मादुभयत्रापि फलवत्युपासनेयमिति व्याख्या ज्यायसी। एवमुत्तरत्रापि व्याख्येयम्—पाप्मानं स संसारम् अतरत् अतरन्निति च। यस्मादिदमुभयत्र फलवत्, तस्माद्यः प्रागुक्तः उपासकः मृत्योः पाप्मभ्यः संसाराच्च बिभीयात् समस्ताद्यस्ताद्दितयाद्भयं गच्छेत्, स प्रागुक्त उपासको गुरूपसर्पणेन एतं मन्त्रराजमित्यादि स संसारं तरतीत्यन्तं स्पष्टार्थम्। प्रतिगृह्णीयात् स्वीकुर्यादित्यर्थः। अनेनैतद्दर्शयति—मूलमन्त्रमात्रग्रहणे गुरूपसर्पणमावश्यकम्। सामप्रभृत्युपासनांशे गुरूपसर्पणाच्छ्रुतितः तद्व्याख्यानाद्वेति विकल्पः, 'तस्मादिदं साम येन केनचिदाचार्यमुखेन' इति श्रुतेः। अत एव एतद्विषयरहस्यकल्पग्रन्थान् असमर्थश्चेत् गुरुमुखाच्छ्रृणुयात् समर्थश्चेत्स्वयमेवावेक्षेत, मूलमन्त्रं सबीजं सशक्तिकं साङ्गं सन्यासं गुरुमुखात्स्वीकृत्य। एवं प्रागुक्त-

स्योपासकस्य मुमुक्षोः प्रागुक्तं त्रितयं विशेषणम् इतरस्य द्वितयं विशेषणम् उभयत्रापि स्तुत्युपनिषत्प्रतिपादितं स्तवनं तेषां व्यूहानामुपासनं साम्ना मूलमन्त्राभिव्यक्तिश्चेति त्रितयमप्येतत् पुरश्चरणरूपत्वात्साधारणम् । एवं विशिष्टमधिकारिणमभिधाय तदुपासनाप्रारम्भस्य प्रणवोपासनापूर्वकत्वात्, प्रणवमात्रानृसिंहव्यूहे— 'ॐ सं ॐ यो वै नृसिंहो देवो भगवान्याश्चतस्रोऽर्धमात्रास्तस्मै वै नमो नमः' इति मन्त्रवर्णात् पुरश्चरणोपासनान्तर्गतत्वेन स्थितेऽपि, अत्रापि मात्राशब्दादर्धशब्दाच्चतुःशब्दाच्च तन्मात्राव्यूहप्रत्यभिज्ञानात् तस्मिन्नेव व्यूहे चतुर्मात्रासंबन्धित्वेन उपासनाविशेषमाह— तस्य प्रागुक्तस्य मन्त्रराजस्य सामाभिव्यक्ताक्षरस्य संपुटितत्वेन स्थितस्य ह निश्रितं सामाभिव्यक्तमूलमन्त्राक्षरसंपुटीकरणेन स्थितत्वात् साम्ना संबन्धः, 'तस्मात्प्रत्यक्षरमुभयत ओंकारो भवति' इति श्रुतेः । प्रणवस्य या पूर्वा मात्रेत्यादि सा साम्नश्चतुर्थः पादो भवतीत्यन्तं स्पष्टार्थम् । अकारोकारमकारार्धमात्रात्मको यथासंख्यं पृथिव्यन्तरिक्षद्युसोमलोकऋग्यजुःसामाथर्वणब्रह्मविष्णुमहेश्वरोंकारवसुरुद्रादित्यमरुद्गायत्रीत्रिष्टुब्जगतीविराड्गार्हपत्यदक्षिणाग्न्याहवनीयसंवर्तकात्मकः प्रणवः तस्मिन्नृसिंहव्यूहे विश्वरूपन्यायेनावस्थितः

उपास्य. । नन्वनेक एव लीलाविग्रहाः कथं न भवन्ति । नेति ब्रूम. 'यः' 'तस्मै' इत्येकवचनात् एक एवायं लीलाविग्रह इत्यवगम्यते ॥

एवं तावत्पुरश्चरणान्तर्गतप्रणवमात्राव्यूहोपासनमभिधाय इदानीं सामाभिव्यक्तमूलमन्त्रेण ब्रह्मोपासनामभिधातुं मूलमन्त्रस्य प्रणवसपुटीकरणादक्षरसंख्याविवृद्धे. कथं द्वात्रिंशदक्षरं सामेत्याशङ्क्य पादशः पञ्चाङ्गन्यासं च अभिधातुं पादाक्षरसंख्यापूर्विकां कृत्स्नमूलमन्त्राक्षरसंख्यामाह—

अष्टाक्षरः प्रथमः पादो भवत्यष्टाक्षरास्त्रयः पादा भवन्त्येवं द्वात्रिंशदक्षराणि संपद्यन्ते द्वात्रिंशदक्षरा वा अनुष्टुब्भवत्यनुष्टुभा सर्वमिदं सृष्टमनुष्टुभा सर्वमुपसंहृतं तस्य हि पञ्चाङ्गानि भवन्ति चत्वारः पादाश्चत्वार्यङ्गानि भवन्ति सप्रणवं सर्वं पञ्चमं भवति । ॐ हृदयाय नमः । ॐ शिरसे स्वाहा । ॐ शिखायै वषट् । ॐ कवचाय हुम् । ॐ

अस्त्राय फडिति प्रथमं प्रथमेन युज्यते द्वितीयं द्वितीयेन तृतीयं तृतीयेन चतुर्थं चतुर्थेन पञ्चमं पञ्चमेन व्यतिषक्ता वा इमे लोकास्तस्माद्व्यतिषक्तान्यङ्गानि भवन्त्योमित्येतदक्षरमिदं सर्वं तस्मात्प्रत्यक्षरमुभयत ओंकारो भवतीत्यक्षराणां न्यासमुपदिशन्ति ब्रह्मवादिनः ॥ २ ॥

अष्टाक्षर प्रथमः पादो भवतीत्यादि सप्रणवं सर्वं पञ्चमं भवतीत्यन्तं स्पष्टार्थम् । ॐ हृदयेत्याद्यङ्गमन्त्राणां पञ्चानां सामाङ्गमन्त्रैरेव व्याख्यातत्वात् न पृथग्व्याख्यानापेक्षेति, हृदयेत्यादि पञ्चमेनेत्यन्तं स्पष्टार्थम् । व्यतिषक्ता वा इमे लोकास्तस्माद्व्यतिषक्तान्यङ्गानि भवन्तीति लोकबुद्ध्योपास्यानां हृदयाद्यङ्गानां सामाभिव्यक्तमूलमन्त्रप्रतिपाद्ये नृसिंहब्रह्मव्यूहे क्षीरोदार्णवशायिनि उपविष्टे वा लोकव्यतिषङ्गहेतुकाङ्गव्यतिषक्तता विधीयते । तस्माद्व्यतिषक्तान्यङ्गानि भवन्तीत्यत्र व्यतिषक्तानि यथायोग्यतया अन्योन्यं मिश्रितान्युपास्यानीत्यर्थः । ततश्च अयमर्थः संपद्यते— पारमेश्वरं हृदयाख्यमङ्गं पारमेश्वरशिरोऽङ्गादधःप्रदे-

शान्तःस्थितं हृदयप्रदेशादारभ्य उपास्यम् । अत एव सामाङ्गप्रणवव्याख्यानेन मूलमन्त्रहृदयाङ्गव्याख्यानावसरे पारमेश्वरं हृदयं व्याख्यातम् ; इतरथा तद्व्याख्यानमप्रस्तुतं स्यात् ; तस्मादङ्गव्यतिषक्ततविधानादेव तद्व्याख्यानं प्रस्तुतमिति सिद्धम् । यत एवं हृदयाङ्गोपासनैव तदन्तर्गतत्वात् नेत्रत्रयोपासना, अत एव नेत्रत्रयाङ्गोपासना न पृथगभिहिता । एवमुत्तरत्रापि शिखाख्यमङ्गं पारमेश्वरं शिरोऽङ्गे मूर्ध्नि च व्यतिषक्तं सामाङ्गलक्ष्मीयजुर्मन्त्रेण व्याख्यातमुपास्यम् । शिरश्च द्वितीयमङ्गं यथोक्तहृदये व्यतिषक्तं सामाङ्गसावित्रीमन्त्रेण व्याख्यातम् । पारमेश्वरं कवचम् यथोक्तहृदयैकदेशे नाभेरूर्ध्वं ग्रीवातोऽधः पृष्ठप्रदेशव्यापि सामाङ्गनृसिंहगायत्र्या व्याख्यातमुपास्यम् । एवं पञ्चममङ्गम् अस्त्राख्यम् उत्तराधरभावेन तन्नाभिमध्यवर्ति क्षीरोदार्णवशायिपारमेश्वरव्यूहचतुष्टयाङ्गव्यापितया व्यवस्थितं व्यतिषक्तमुपास्यमिति यथायोग्यतया व्यतिषक्तशब्दस्याङ्गेषु स्थितिः । पञ्चाङ्गन्यासोपन्यासः न षष्ठमङ्गमिति तस्य हृदयान्तर्गतत्वात् इति प्रागभिहितम् । पञ्चमेऽङ्गे सप्रणवतां विधातुमाह— यस्मादोमित्येतदक्षरमिदं सर्वमिति, यदिदमर्थजातमभिधानाभिधेयभूतं तस्याभिधानाव्यतिरेकादभिधानभेदस्य च

ओंकाराव्यतिरेकात् ओंकार एवेदं सर्वम् । तस्मात्प्रत्यक्षरमुभयत ओंकारो भवति प्रत्यक्षरमेकैकं मूलमन्त्राक्षरं प्रणवेन संपुटितं कुर्यात्—इत्यक्षराणां मूलमन्त्राक्षराणां न्यासम् अङ्गाख्येऽङ्गे उपदिशन्ति कथयन्ति ब्रह्मवादिनः ब्रह्मैवोपास्यमिति ये वदन्ति ते ब्रह्मवादिनः । अत्र च उपदिशन्तीति विशेषणोपादानात् मूलमन्त्राङ्गजातमुपदेशगम्यमिति दर्शयति । तमिमं पञ्चाङ्गन्यासं यथोक्तविशेषणे परमेश्वरे यथोक्तविशेषणविशिष्टं विधाय स्वात्मन्यपि विदध्यात्, अस्मिन्हि प्रकरणे तस्यार्थजातस्य प्रायशः परमेश्वरसंबन्धितया श्रुतत्वादिति ॥

एवं तावत् 'तस्मात्प्रत्यक्षरमुभयत ओंकारो भवति' इति विधानात्सामाभिव्यक्तमूलमन्त्राक्षरव्यवधानेन अर्थाप्रतिपादने औपाधिकेन पदाज्ञानेन प्राप्ते, तदव्यवधानेनार्थप्रतिपादनोपाधिना गूढेन पदपरिमाणं ज्ञापयितुं पदोद्धारमाह—

तस्य ह वा उग्रं प्रथमं स्थानं जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति वीरं द्वितीयं स्थानं महाविष्णुं तृतीयं ज्वलन्तं चतुर्थं सर्वतोमुखं पञ्चमं नृसिंहं षष्ठं भीषणं सप्तमं भद्रमष्टमं मृत्युमृत्युं

नवमं नमामि दशममहमित्येकादशं स्थानं जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति । एकादशपदा वा अनुष्टुब्भवत्यनुष्टुभा सर्वमिदं सृष्टमनुष्टुभा सर्वमुपसंहृतं तस्मात्सर्वमिदमानुष्टुभं जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥ ३ ॥

तस्य ह वा इत्यादि सर्वमुपसंहृतमित्यन्तं स्पष्टार्थम् । स्थानं जानीयात् पदं जानीयात् । एकादशपदा वा अनुष्टुब्भवतीत्युपसंहारात् प्राक्तन· सर्वोऽपि स्थानशब्दः पदे वर्तते । यस्मादभिधानाभिधेयप्रपञ्चस्याभिधानाव्यतिरेकात् 'वाचारम्भणं विकारो नामधेयम्' इति श्रुतेः नामप्रपञ्चस्य सामान्यविशेषात्मकस्यानुष्टुन्नामाव्यतिरेकात् अनुष्टुभश्च आद्यब्रह्मविवर्तात्मकत्वात् साकारब्रह्मप्रतिपादकत्वेन ब्रह्मत्वे सिद्धे ब्रह्मणश्च सृष्ट्युपसंहारकारणत्वेनोपादानत्वादित्यनुष्टुवेवोपादानम् , तस्मात्सर्वमानुष्टुभमित्यादि गच्छतीत्यन्तं स्पष्टार्थं व्याख्येयमुक्तार्थम् ॥

देवा ह वै प्रजापतिमब्रुवन्नथ कस्मादु-

च्यत उग्रमिति स होवाच प्रजापतिर्य-
स्मात्स्वमहिम्ना सर्वाल्लोकान्सर्वान्देवा-
न्सर्वानात्मनः सर्वाणि भूतान्युद्गृह्णात्यज-
स्रं सृजति विसृजति वासयत्युद्ग्राह्यन
उद्गृह्यते । स्तुहि श्रुतं गर्तसदं युवानं मृगं
नभीममुपहत्नुमुग्रम् । मृडा जरित्रे सिंह
स्तवानो अन्यं ते अस्मन्निवपन्तु सेनाः ।
तस्मादुच्यत उग्रमिति । अथ कस्मादु-
च्यते वीरमिति यस्मात्स्वमहिम्ना सर्वा-
ल्लोकान्सर्वान्देवान्सर्वानात्मनः सर्वाणि
भूतानि विरमति विरामयत्यजस्रं सृजति
विसृजति वासयति । यतो वीरः कर्म-
ण्यः सुदक्षो युक्तग्रावा जायते देवकामः ।
तस्मादुच्यते वीरमिति । अथ कस्मादुच्यते
महाविष्णुमिति । यः सर्वाल्लोकान्व्याप्नो-
ति व्यापयति स्नेहो यथा पललपिण्डमो-
तप्रोतमनुप्राप्तं व्यतिषक्तो व्याप्यते व्या-

पयते। यस्मान्न जातः परोऽन्योऽस्ति य आविवेश भुवनानि विश्वा। प्रजापतिः प्रजया संविदानस्त्रीणि ज्योतींषि सचते स षोडशीति। तस्मादुच्यते महाविष्णुमिति। अथ कस्मादुच्यते ज्वलन्तमिति। यः स्वमहिम्ना सर्वाल्लोकान्सर्वान्देवान्सर्वानात्मनः सर्वाणि भूतानि स्वतेजसा ज्वलति ज्वालयति ज्वाल्यते ज्वालयते। सविता प्रसविता दीप्तो दीपयन्दीप्यमानः। ज्वलञ्ज्वलिता तपन्वितपन्संतपन्रोचनो रोचमानः शोभनः शोभमानः कल्याणः। तस्मादुच्यते ज्वलन्तमिति। अथ कस्मादुच्यते सर्वतोमुखमिति। यस्मादनिन्द्रियोऽपि सर्वतः पश्यति सर्वतः शृणोति सर्वतो गच्छति सर्वत आदत्ते सर्वगः सर्वतस्तिष्ठति। एकः पुरस्ताद्य इदं बभूव

यतो बभूव भुवनस्य गोपाः । यमप्येति भुवनं सांपराये नमामि तमहं सर्वतोमुखम् । तस्मादुच्यते सर्वतोमुखमिति । अथ कस्मादुच्यते नृसिंहमिति । यस्मात्सर्वेषां भूतानां नो वीर्यतमः श्रेष्ठतमश्च सिंहो वीर्यतमः श्रेष्ठतमश्च तस्मान्नृसिंह आसीत्परमेश्वरो जगद्धितं वा एतद्रूपं यदक्षरं भवति । प्र तद्विष्णुः स्तवते वीर्याय मृगो नभीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधि क्षियन्ति भुवनानि विश्वा । तस्मादुच्यते नृसिंहमिति । अथ कस्मादुच्यते भीषणमिति यस्मात्स्वमहिम्ना यस्य रूपं दृष्ट्वा सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि भीत्या पलायन्ते स्वयं यतः कुतश्चिन्न बिभेति । भीषास्माद्वातः पवते भीषोदेति सूर्यः । भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः ।

तस्मादुच्यते भीषणमिति । अथ कस्मादुच्यते भद्रमिति । यस्मात्स्वयं भद्रो भूत्वा सर्वदा भद्रं ददाति रोचनो रोचमानः शोभनः शोभमानः कल्याणः । भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः । तस्मादुच्यते भद्रमिति । अथ कस्मादुच्यते मृत्युमृत्युमिति । यस्मात्स्वभक्तानां स्मृत एव मृत्युमपमृत्युं च मारयति । य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः । यस्य च्छायामृतं यो मृत्युमृत्युः कस्मै देवाय हविषा विधेम । तस्मादुच्यते मृत्युमृत्युमिति । अथ कस्मादुच्यते नमामीति यस्माद्यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च । प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वद

त्युक्थ्यम् । यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे । तस्मादुच्यते नमामीति । अथ कस्मादुच्यतेऽहमिति । अहमस्मि प्रथमजा ऋता३स्य पूर्वं देवेभ्यो अमृतस्य ना३भायि । यो मा ददाति स इदेव मा३वाः । अहमन्नमन्नमदन्तमा३द्मि । अहं विश्वं भुवनमभ्यभवा३म् । सुवर्न ज्योतीः । य एवं वेदेत्युपनिषत् ॥ ४ ॥

इति द्वितीयोपनिषत् ॥

यदर्थप्रतिपादकगूढोपाधिना पदज्ञानमभूत् तमेव गूढोपाधिं विवृणोति प्रश्नोत्तराभ्याम् । स च अत्र बहुतरो व्याख्येयः साङ्गसामाधिव्यक्तमाङ्गमूलमन्त्रं प्रतिपाद्य । स च मूलमन्त्रः पदत्रयात्मकः प्रथम पादः पदद्वयात्मको द्वितीयः पदत्रयात्मकस्तृतीयः तत्संख्याकपद एव चतुर्थ इत्येकादशपदात्मकः । एवमेकादशपदात्मके मन्त्रे पञ्चाङ्गन्यासानन्तरमुक्ते मन्त्रे द्वितीयान्तेषु नवसु पदेषु मन्त्रान्त्यं पदद्वयं

तृतीयपादाद्यं च पदमपि त्रितयमपि अधस्तनेषूपरितनेषु च तृतीयपादाद्यपदादन्यत्रानुषज्यते, तृतीयपादाद्यपदे द्वितयमनुषज्यते, एवं क्रियाकारकाद्यन्वयसंबन्धशुद्धिः। तत्र पञ्चाङ्गन्यासानन्तरं पठितत्वात्पदोद्धारतदर्थकथनस्य सर्वेष्वेव पादेषु साङ्गेष्वर्थः कथनीय इत्याद्ये पादे पदत्रयात्मके साङ्गे लोकाद्यग्न्यादिना सामोपनिषद्युपास्ये सामाङ्गप्रणवेन च मूलमन्त्रहृदयाङ्गव्याख्याने प्राप्ते तत्रैकैकं पदं बहुतरेष्वर्थेषु व्याख्येयम्। तथोपरितनऋचः एकादशपदसंबन्धिन्यः प्रश्नोत्तरान्तरालवर्तिब्राह्मणवर्तिन्यः 'तदेषाभ्युक्ता' इत्येवं ब्राह्मणोक्तार्थे साक्षित्वेनोद्भाविता महाचक्रे न्यस्ते द्वात्रिंशद्व्यूहनृसिंहात्मके ब्रह्मणि एकैकमूलमन्त्रपदव्याख्यानपरत्वेन वर्णनीयाः। तथा ब्राह्मणमेकैकमूलमन्त्रपदव्याख्यानपरत्वेन महाचक्रनाभिवर्तिक्षीरोदार्णवसंबन्धिमूलनृसिंहव्यूहे ब्रह्मणि प्रागुक्तगुणविशिष्टे व्याख्येयम्। अत एव तत्र साक्षित्वेनोद्भावनम् ऋग्ब्राह्मणयोः तत्तत्पदव्याख्यानावसरे विभागक्रमं च स्पष्टं प्रदर्शयिष्यामः। तत्र तावदेकैकं पदं धातूपसर्गादियोगेन बहुतरमर्थजातं कथं वदिष्यति प्रजापतिः, कथं च व्याख्यास्यत्यस्मान्व्युत्पन्नान्प्रति — इत्येवं देवाः विस्मयेन ह हर्षिताः वै प्रजापतिमब्रुवन्निति सर्वपदसाधारणं व्याख्यानं पृष्ट्वा अथ अन-

न्तरं कस्मात्प्रकृतिप्रत्ययविभागात् अनाख्यातात्मकं प्रथमपद-मुच्यते व्याख्यायते उभयत्रापि मूलनृसिंहव्यूहे द्वात्रिंशन्नृ-सिंहव्यूहे च उग्रमिति । इति-शब्दः प्रश्नसमाप्तिं द्योतयति । स प्रजापतिः तान्देवान्परमेश्वरोपासननिष्ठान् विवक्षितार्थ-प्रष्टॄन् दृष्ट्वा हर्षितः उत्तरमुवाच । एवमुत्तरेष्वपि प्रश्नोत्तरेषु योज्यम् । यस्मात्स्वमहिम्ना स्वतन्त्रशक्त्या मायया तस्या आत्मतन्त्रत्वादेव स्वातन्त्र्यम् । स्वमहिम्नेति च वचनं सर्व-शक्तिमत्तृतीयपादाद्यपदानुषङ्गं दर्शयति । एवं तत्तत्पदव्या-ख्यानावसरे । सर्वाँल्लोकान् पृथिव्यादीन्पार्थिवत्वावान्तरजा-तिभेदभिन्नान् सर्वान्देवान अग्न्यादीन सप्रणवव्याख्यानपक्षे ऋग्ब्रह्मादिगार्हपत्यान्तान् प्रणवप्रथममात्राप्रतिपादितान् सर्वा-नात्मनः विश्वादीन् सामाङ्गप्रणवव्याख्याने वक्ष्यमाणान् स-र्वाणि भूतानि उद्बृंहाति, उदित्यव्ययम् उ इत्येतस्य नि-पातस्य स्थाने, वर्णसाम्यात् अन्वित्युपसर्गस्यार्थे, ग्रह इत्ययं गृह्णातीति भावव्युत्पत्त्या, अनुगृह्णातीत्यर्थः । अजस्रम् अ-नवरतं तथा च उत्पूर्वको गृह्णाति-शब्दः सृष्टिविमोचन-वसतिषु वर्तते । उद्ब्रूह्यते उद्बृंह्यते इत्यात्मनेपदात् प्रयो-जककर्तृत्वं साक्षात्कर्तृत्वं च इत्युक्तमेवार्थं द्रढयति । तत-श्चायमर्थः— पूर्वोक्तार्थानुग्राहकत्वं स्रष्टृत्वं च विपूर्वकस्य

सृज़तेरुपसंहारार्थत्वेन तदर्थत्वं विमोचनार्थत्वं वा अवस्थितिकारयितृत्वमनुग्रहे प्रयोजकत्वमिति मूलनृसिंहव्यूहहृदयान्तर्वर्तित्वेन उपास्यम् । एवं मूलनृसिंहगूढहृदयोपासापरत्वेन उग्रपदं व्याख्याय अथेदानीं तदेव पदं द्वात्रिंशद्व्यूहोपासनापरत्वेन व्याख्यातुम् ऋचमाह । स्तुहीति स्तोतारं प्रत्यक्षीकृत्याह परोक्षीकृत्य स्तुत्यम । श्रुतम् 'यौ वै नृसिंहः' इत्यादिमन्त्रवर्णैरेव श्रुतं द्वात्रिंशन्नृसिंहव्यूहम् । गर्तसदं गर्ते महाचक्रे, गृणातेः स्तुतिकर्मणो गीयते स्तूयते इति व्युत्पत्त्या गर्तम् , सीदतीति गर्तसदम् । युवानं प्रसिद्धम् । मृगं सिंहरूपम् । नभीमम् अभयंकरम् । उपहव्नुम् अनुग्रहार्थं सर्वत्रोपगमशीलम् । उग्रं द्वात्रिंशन्नृसिंहव्यूहरूपम् । अत्रापि सशक्तिकनृसिंहपदस्यानुषङ्गः । स्तुहीत्येवं संबन्धः । एवं परोक्षतः स्तुते द्वात्रिंशन्नृसिंहव्यूहे तत्सामर्थ्यादक्षरश्रवणयुक्तत्वाच्च तच्छ्रुत्वा प्रत्यक्षो हि अभूत् स व्यूहः उपासकायेति प्रत्यक्षीकृत्वा आह उत्तरार्धेन— हे सिंह द्वात्रिंशद्व्यूह स्तवानः स्तूयमानः त्वं मृड सुखय जरित्रे स्तोत्रकर्त्रे । यद्वा चतुर्थी द्वितीयार्थे । ते तव सेनाः अस्मन् अस्मत्तः अन्यं निवपन्तु विनाशयन्तु । यद्वा स्वानुग्रहं लब्ध्वा परानुग्रहं प्रार्थयते— ते तव सेनाः तद्व्यूहरूपाः अस्मदन्यं निपूर्वको वपतिरनुग्रहार्थे वर्तते अनुगृ-

ह्वन्त्वित्यर्थः । यस्मादेव प्रागुक्तेन प्रकारेणोभयोपास्ये उग्रपदं क्षमम्, तस्मादुच्यते उग्रमिति । इति-शब्दः उत्तरसमाप्तिं द्योतयति । एवं प्रथमपदमुभयोपासने क्षममिति विज्ञाय अथेदानीं द्वितीयं पदमुभयोपास्ये व्याख्यातुं द्वितीयो देवप्रश्नः; स च प्रथमदेवप्रश्नेन व्याख्यातः; अथ कस्मादुच्यते वीरमिति । स होवाच प्रजापतिरिति प्रागुक्तमनुषज्य उत्तरम् । यस्मात्स्वमहिम्नेत्यादि सर्वाणि भूतानीत्यन्तमुक्तार्थम् । विरमति विरामयति विविधप्रकारेण प्रागुक्तान्प्रति रमति । रम् क्रीडायाम् । तथैव तानाक्रीडयति । कथं क्रीडयतीत्यपेक्षिते आह— अजस्रमित्यादि वासयतीत्यन्तमुक्तार्थम् । एतदुक्तं भवति— सृष्टिस्थितिलयविमोचनकर्तृत्वरूपाः ब्रह्मादिक्रियाः क्रीडाः प्रागुक्तार्थाः । अतः मूलनृसिंहव्यूहहृदयं क्रीडायुक्तमुपास्यम् । एवं मूलनृसिंहोपासनापरत्वेन द्वितीयं पदं व्याख्याय द्वात्रिंशन्नृसिंहव्यूहोपासनायां तदेव पदं व्याख्यातुमर्धर्चमाह—यतो वीर इति । देवकामः तांस्तान् ब्रह्मादिदेवान् स्वेन रूपेणावतारयितुं कामयते इति देवकामः । यद्वा नृसिंहव्यूहमेव धृत्वा ब्रह्मादिरूपं प्रकटयति क्वचिदायुधैः क्वचिद्विश्वरूपोपपत्तिन्यायेन 'यो वै नृसिंहो देवो भगवान्यश्च ब्रह्मा' इत्यादिषु 'यो वै नृसिंहो देवो भग-

वान्ये चाष्टौ वसव' इत्यादिषु च पदेषु। एवं देवकामो जायते यतो वीरः शूरः, यद्वा वीरः विविधावताररूपेण रमणीयसंसारशीलो वीरः, कर्मण्यः तत्तदवतरणरूपकर्मशीलः उपासकानुग्रहणे। सुदक्षः पूजितबलः, यद्वा पूजितः। युक्तग्रावा युक्तो ग्रावभिर्युक्तग्रावा, सोमे अध्वर्यवादिरूपः, 'यो वै नृसिंहो देवो भगवान्यश्च सर्वम्' इत्यादिमन्त्रवर्णात्। यस्मादुक्तप्रकारेण उभयोपास्ये वीरपदं क्षमम्, तस्मादुच्यते वीरमिति। इतिशब्दः उत्तरसमाप्तिं द्योतयति। अथेदानीं तृतीयपदं व्याख्यातुं देवप्रश्नः; स च उक्तार्थः। सर्वत्र प्रश्नवाक्येषु अथशब्दः तत्तदानन्तर्यार्थः। अथ कस्मादुच्यते महाविष्णुम्। इति-शब्दः अनुषक्तप्रश्नसमाप्तिं द्योतयति। स होवाच प्रजापतिः इत्यनुषज्योत्तरम्। य इत्यत्रापि स्वमहिम्नेत्यनुषङ्गाच्छक्तिमन्नृसिंहपदस्यानुषङ्गः। सर्वाँल्लोकान्व्याप्नोति व्यापयतीत्यत्र सर्वलोकपदाद्देवात्मभूतानां संग्रहः प्रारब्धक्रमत्वेनावगतानां तदादिन्यायेन। विष्णुरिति विष्ल व्याप्ताविति धातोः रूपम्। तच्च व्यापकत्वं निरुपपदत्वेन महत्त्वं प्राप्तमिति महच्छब्देन तदेव दृढीकृतम्। यद्वा मह इति तेजोनाम महो व्यापकम्। व्यापकत्वे दृष्टान्तमाह— स्नेहः तैलादिः यथा पललपिण्डं मांसपिण्डम् ओतम् अनु-

स्यूतं प्रोतं प्रकर्षेणानुस्यूतम् अनुषक्तं तादृशं पिण्डं व्यतिषक्तः अवयवसंभिन्नः व्याप्यते व्यापयते—इति दृष्टान्ते आत्मनेपदोपादानात् व्याप्नोति व्यापयतीति दार्ष्टान्तिके च परस्मैपदोपादानात् उभयपदी अयं धातुरिति दर्शयति । एतदुक्तं भवति—प्रागुक्तसर्वलोकादीन् प्रति साक्षाद्व्यापकत्वं प्रयोजकव्यापकत्वं च मूलनृसिंहहृदये उपास्यमिति । एवं तावत्साङ्गमूलनृसिंहव्यूहोपासनापरत्वेन महाविष्णुपदं तृतीयं व्याख्याय अथेदानीं तदेव पदं द्वात्रिंशन्नृसिंहव्यूहोपास्यपरत्वेन व्याख्यातुम् ऋचमाह— यस्मात् द्वात्रिंशन्नृसिंहव्यूहात् परः उत्कृष्टः न जातः जातोऽन्यो नास्ति सर्वस्यैवान्तर्भावात् यो व्यूहः स विश्वा सर्वाणि भुवनानि भूतानि आविवेश प्रविष्टः । व्याप्तुं तत्तद्रूपधारणेन विश्वरूपावतरणेन आविर्भवति प्रजया आविर्भूत्या सह प्रजापतिरपि संविदानः विजानन तमुपास्यतया त्रीणि ज्योतींषि गार्हपत्यादीन् सचते सेवते । स प्रजापतिः उपासनां कुर्वन षोडशी कला निराकारब्रह्मतया बभूव । तस्य च आद्यस्योपासकस्य प्रजापतेः अन्यस्य वा उपासकस्य अयमुपासनाक्रमः—अत्र च प्रकरणे महाचक्रनाभिवर्तिक्षीरोदार्णवसंबन्ध्युपास्यो मूलनृसिंहव्यूह इति पूर्वाचार्याणां परिभाषा संप्रदायागता ।

तत्र च प्रणवपूर्वकशक्तिबीजोच्चारणपूर्वकं सामाभिव्यक्तद्वात्रिंशदक्षरेषु न्यस्तेषु चक्रे यथासंख्यम् एकैकस्मिन्नक्षरे प्रणवसंपुटिते तत्तद्व्यूहमन्त्रैः तं तं व्यूहं स्तुत्वा तथैवोपास्यः। एवं द्वात्रिंशन्नृसिंहव्यूहोपासनया स्वात्मानं महाविष्णुमुपास्य साङ्गसामाभिव्यक्तसाङ्गमूलमन्त्रेण नृसिंहव्यूहे प्रकरणे श्रुतत्वात् पञ्चाङ्गन्यासं विधाय संप्रदायानुसारेण तस्मिन्महाविष्णौ च तथैव पञ्चाङ्गन्यासं विधाय ततः साङ्गोपासनम् आरभेत। तत्र प्रथमपादे पदत्रयात्मके प्रथमपदव्याख्यानप्रतिपादितगुणविशिष्टं शक्तिमन्नृसिंहपदपूर्वकं नमस्क्रियापदपूर्वकान्त्यपदमुच्चरन् सामाङ्गप्रणवमन्त्रहृदयमन्त्रप्रतिपादितगुणविशिष्टं मूलनृसिंहव्यूहमुपास्य द्वात्रिंशन्नृसिंहव्यूहम् ऋक्प्रतिपादितम् उपासीत। एवं प्रतिपदं मूलनृसिंहव्यूहोपासनपूर्वकं द्वात्रिंशन्नृसिंहव्यूहोपासनम्। अत एव हृदयाद्यङ्गमन्त्राणामर्थं व्याचक्षाणैरस्माभिरुक्तं प्रपञ्चागमशास्त्रे 'हृदयं बुद्धिगम्यत्वात्प्रणामः स्यान्नमःपदम्। क्रियते हृदये नातो बुद्धिगम्या नमस्क्रिया' इति। एवं द्वितीयतृतीयचतुर्थपादेषु तत्तत्पदोपासनां प्रागुक्तां कृत्स्नां विधाय महाविष्णुरूपान्त्यशब्दप्रतिपादितरूपे वा उपास्यरूपे वा सायुज्यतया सच्चिदानन्दरूपे वा अथवा यथान्तःकरणशुद्धियोग्यतया समाधिना

वा तिष्ठेत उपासकः । आद्यद्वितीयोपासनयोः साममूलमन्त्र-प्रणवानां वैकल्पिकजपपूर्वकत्वेनावस्थानम् । तथा यत्र यत्र मूलमन्त्रस्मृतिः तत्र तत्र प्रणवशक्तिबीजसंपुटीकरणम्, तत्रापि ईषन्मूलमन्त्रजपपूर्वकः प्रणवजपः श्रेयान्, तस्य सर्वोत्कृष्टत्वात्सर्वमन्त्रजपप्रत्याम्नायत्वेन विहितत्वात् 'यः प्रणवमधीते स सर्वमधीते' इति श्रुतेः । अन्त्ययोरुपासनयोरन्त्यसामनि निराकारतयावस्थितौ न जपो नान्यचिन्तनं समाधावेवावस्थितिरिति परमरहस्यविवेको न कस्यचित्प्रतिपादनीय इति स्थितम् । यस्मादिदं महाविष्णुपदम् उभयोपास्यप्रतिपादनक्षमम्, तस्मादुच्यते महाविष्णुमिति । इति-शब्दः तृतीयपदप्रश्नोत्तरसमाप्तिं द्योतयति । एवं प्रथमपादः व्याख्यातः । एवं प्रथमपादोपासनां साङ्गां विधाय तथैव द्वितीयपादोपासनां विधातुं तदाद्यं पदम्, मन्त्रापेक्षया चतुर्थं च पदम्, व्याख्यातुं प्रश्नोपक्रमः; स च उक्तार्थः; अथ कस्मादुच्यते ज्वलन्तमिति । इति-शब्दो व्याख्यातः । स होवाच प्रजापतिरित्यनुषज्योत्तरम् । यः स्वमहिम्ना स्वाधीनमायया सर्वाँल्लोकानन्तरिक्षगतान्पूर्वोक्तान्भाविनश्च सर्वान् लोकान् तदन्तर्गतान्सर्वान्देवान यक्षगन्धर्वादीन् सर्वानात्मनः ऋग्यजुःसामाथर्वरूपान्पुरुषानन्यानृषीन्सामाङ्गसावित्रमन्त्र-

व्याख्यातांश्च सर्वाणि भूतानि एतान्पूर्वोक्तान्वक्ष्यमाणांश्च स्वतेजसा ज्वलति स्वकीयप्रकाशेन, ज्वालयति एतानपि प्रकाशयति, शिरोऽन्तर्गतं तेजो व्याख्यातम्, सर्वाङ्गाङ्गिव्यापितयाङ्गानामन्योन्यसंबन्धश्रवणात् 'तस्माद्यतिषक्तान्यङ्गानि भवन्ति' इति श्रुतेः। एवं साक्षात्प्रयोजकत्वेन च स्वपरसंबन्धितया शिरोऽङ्गान्तर्गततेजःसंबन्धे सिद्धेऽपि एतदेव आवेदयितुम् उभयपदित्वेन धातुं प्रयुङ्क्ते, प्राक्परस्मैपदम् इदानीमात्मनेपदम्, ज्वाल्यते ज्वालयते इति। एवं मूलनृसिंहव्यूहोपास्ये चतुर्थं पदं व्याख्याय द्वात्रिंशन्नृसिंहव्यूहे व्याख्यातुम् ऋचमाह— सविता सवितृमण्डलवद्वर्तुलतया स्थितत्वात् सवितायं द्वात्रिंशन्नृसिंहव्यूहः; अत एव प्रसविता सर्वकर्मानुष्ठाने अभ्यनुज्ञाता, एतद्व्यूहोपासनपूर्वकत्वात् इतरोपासनस्य। दीप्रः दीपयन्दीप्यमानः यथा अयं सविता रात्रितमोविनाशनेन दीप्रः प्रकाशमानः कर्मानुष्ठाने अभ्यनुज्ञाता, तथा अयं द्वात्रिंशन्नृसिंहव्यूहः उपासितः उपासकाय मूलनृसिंहव्यूहोपासकाज्ञानरात्रितमोविनाशनेन दीप्रः प्रकाशमानः प्रधानोपासनाभ्यनुज्ञाता। दीपयन्दीप्यमानः इति शतृशानच्प्रत्ययौ वर्तमानकालार्थौ उक्तमेवार्थं द्रढयतः। ज्वलञ्ज्वलिता प्रकाशं कुर्वन्प्रकाशयिता। यद्वा उभयत्रापि

ज्वलञ्शब्दो दहनार्थे वर्तमानोऽपि अज्ञानदाहकत्वेन व्याख्येयः। तत्र लोकाद्यज्ञानस्य प्रकाशवत्तादाहकः प्रकृते च उपासकाज्ञानदाहक इति। ज्वलन् प्रकाशनेनाज्ञानदहनं कुर्वन् ज्वलिता अज्ञानदहनकर्ता तपन् तापं कुर्वन् अज्ञानस्य वितपन् स्वयं शान्तः संतपन् संतापं कुर्वन् अज्ञानस्य। एते शतृप्रत्यया वर्तमानकालाः सन्तः यस्मिन्काले एतद्ब्रह्मोपासनं वर्तते तस्मिन्नेव महाविष्णुरुपासकः प्रकाशात्मकोऽधिकारी वर्तत इति दर्शयन्ति। रोचनः अनुद्वेगकरः रोचमानः इच्छाकरः; अत एव शोभनः शोभमानः कल्याणः इति एतदुक्तं भवति—मूलनृसिंहव्यूहस्य शिरोऽङ्गे उन्नते स्थितं तेजः सर्वप्रकाशकं सर्वाज्ञानदाहकं च इति सामाङ्गसावित्रमन्त्रेण व्याख्यातमुपास्यमिति। यस्मादुभयोपास्यप्रतिपादनक्षमं ज्वलन्तमिति पदं तस्मादुभयोपास्यपरत्वेनोपसंहरति—तस्मादुच्यते ज्वलन्तमिति। इति-शब्दो व्याख्यातः। अथेदानीं क्रमप्राप्तम्, मूलमन्त्रापेक्षया पञ्चमं पदम्, पादापेक्षया द्वितीयम्, उभयोपास्ये व्याख्यातुं देवप्रश्नः—अथ कस्मादुच्यते सर्वतोमुखमिति; स च उक्तार्थः। स होवाच प्रजापतिरित्यनुषज्योत्तरम्। यस्मात् स्वमहिम्नेति अनुषज्य व्याख्येयम्। अनिन्द्रियोऽपीति सेन्द्रियस्य व्याख्यातविग्रहस्य तद-

भिमानराहित्यात् अनिन्द्रियत्वम्; अनिन्द्रियोऽप्ययं मूलनृसिंहव्यूहः सर्वतः पश्यति सर्वतः शृणोतीति बुद्धीन्द्रियोपलक्षणम्, सर्वतो गच्छति सर्वत आदत्ते सर्वगः सर्वतस्तिष्ठतीति कर्मेन्द्रियोपलक्षणम्, एवमुभयेन्द्रियाभिमानरहितोऽप्ययं व्यूहः उभयेन्द्रियजन्यकार्यकरणशक्तिमान्शिरोऽङ्गे उपास्य इति दर्शयति। एवमिदं सर्वतोमुखपदं मूलनृसिंहोपास्यपरत्वेन व्याख्याय अथेदानीं द्वात्रिंशन्नृसिंहोपायस्परत्वेन ऋचा व्याचष्टे—एकः पुरस्तात् प्राक् ब्रह्मा नृसिंहाकारो बभूव, इदं सर्वं यतो बभूव, भुवनस्य गोपा गोप्ता नृसिंह एव विष्णुर्बभूव। यम् अप्येति लयं गच्छति सांपराये प्रलयकाले भुवनं सर्वं स नृसिंह एव महेश्वरो बभूवेति बद्धक्रमकाणां व्यूहानां त्रयाणां प्रथमत एवोपादानेन तदादिन्यायेन इतरेषामेकोनत्रिंशद्व्यूहानां ग्रहणमस्मिन्मन्त्रे। नमामि नमस्करोमि तं व्यूहम् अहं नमामीत्येतत्पदद्वयमत्र वदन् सर्वपदव्याख्याने अनुषक्तमिति दर्शयति। सर्वत्र स्वमहिम्नेत्युपादानात् तत्र तत्र शक्तिमन्नृसिंहपदमप्येतदनुषक्तम्। सर्वतोमुखमिति सर्वतो नृसिंहाकाराणि मुखानि यस्य स तथोक्तः तं नृसिंहं सर्वतोमुखं नमाम्यहमित्यर्थः। यस्मादिदं पदमुभयोपास्यप्रतिपादने शक्तं तदुभयप्रतिपादकत्वेन तस्मादित्युपसंहर-

ति— तस्मादुच्यते सर्वतोमुखमिति । एतदुक्तं भवति— द्वितीयपादे शिरोऽङ्गविशिष्टः प्रतिपादितसर्वप्रकाशकत्वसर्वाज्ञानदाहकत्वोभयेन्द्रियाभिमानरहितत्वोभयेन्द्रियकार्यकरणशक्तिमत्त्वगुणविशिष्टः सामाङ्गसवितृमन्त्रव्याख्यातगुणविशिष्टः मूलनृसिंहव्यूहः उपास्यः, तत इतरो व्यूह इति । एवमाद्यादङ्गादुन्नतप्रदेशस्थितत्वाच्छिरसः शिरस्त्वम् उन्नतत्वम् । अत एव शिर आदित्यः सर्वोत्कृष्टः प्रकाशः तस्मै उन्नताय उन्नतस्थायादित्याय सर्वोत्कृष्टाय प्रकाशाय स्वाहेति प्रपञ्चविलापनम्; तस्मात्प्रपञ्चाकारात् तदाकारां बुद्धिं प्रत्याहृत्य नृसिंहाकारमेव उपासीत इत्येवं शिरोऽङ्गमन्त्रस्यार्थः, 'यो वै नृसिंहो देवो भगवान्यश्च सर्वम्' इति श्रुतेः। अत एवोक्तं शिरोऽङ्गमन्त्रार्थं व्याचक्षाणैः अस्माभिः प्रपञ्चागमशास्त्रे—'तुङ्गार्थत्वाच्छिरोऽङ्गस्य विषयाहरणे त्विषः। शिरोमन्त्रेण चोत्तुङ्गविषयाहृतिरीरिता' इति । एवं द्वितीये पादे साङ्गोपासनामभिधाय तथैव तृतीयपादोपासनामभिधातुं तदाद्यं पदम्, षष्ठं च मूलमन्त्रापेक्षया, उक्तोपास्ये व्याख्यातुं देवप्रश्नः—अथ कस्मादुच्यते नृसिंहमिति; स च उक्तार्थः। स होवाच प्रजापतिरित्यनुषज्योत्तरम् । अत्र च यस्माच्छब्दप्रयोगात् स्वमहिम्नेति अस्य अनुषङ्गं दर्शयति । यस्मात्सर्वेषां

भूतानां मध्ये ना पुरुषाकारो वीर्यवत्तमः ततः सर्वातिशायिनः श्रेष्ठतमश्च सिंहो वीर्यवत्तमः श्रेष्ठतमश्चेत्युक्तार्थम् । तत्तश्च उभयात्मरूपप्रदर्शनेन यद्यद्रूपं कामयते तत्तद्धारणे लीलयैव शक्तोऽयमिति दर्शयति । यस्मादेवं तस्मान्नृसिंहः परमेश्वर आसीदित्यन्वयः । न च नृसिंहे परमेश्वर आसीदित्यन्वयः, वैयधिकरण्यापत्तेः, सामानाधिकरण्यान्वयोपपत्तौ सत्यां वैयधिकरण्यानुपपत्तेः । तस्मान्नृसिंहः परमेश्वरस्त्रिनेत्रो नीलकण्ठः पिनाकीति सिद्धम् । ऋतं सत्यमिति प्राग्व्याख्यातं मन्त्रवर्णाश्च उक्तं जगद्धितं जगतो हितं जगद्धितम् अनिष्टनिरसनेन, वै प्रसिद्धम्, एतद्रूपं प्रागुपास्यत्वेन यदुक्तमक्षरं भवति यदक्षरमविनाशं चिद्रूपं निराकारं तदेव साकारमुपासकानुग्रहाय भवतीत्यन्वयः । एवं नृसिंहपदं षष्ठं मूलनृसिंहव्यूहोपास्ये व्याख्याय तदेव पदम् ऋचा द्वात्रिंशन्नृसिंहव्यूहे व्याचष्टे—विष्णुः मृगः सिंहः प्रस्तवते स्तुतिं प्राप्नोति स्तुतिमन्त्रैः तद्वीर्याय तत्तत्सामभ्यर्थाय नभीमः न भयंकरः । कुचरः कुत्रायं न चरति सर्वदेवविग्रहेषु लीलया स्वयं विचरति सर्वदेवलीलाविग्रहधारीत्यर्थः । गिरिष्ठाः गिरिः पर्वतः तत्स्थ ईश्वरात्मक इत्यर्थः; यद्वा गिरिषु वाग्रूपासु स्तुतिषु यद्यद्रूपमभिलषन् स्तोता कामयते

तत्तद्रूपं स्वस्मिन्स्थापयतीति गिरिष्ठाः । यस्य त्रिषु विक्रमणेषु विग्रहेषु विविधं क्रमणं विक्रमणं तेषु ब्रह्मविष्णुमहेश्वरात्मकेषु । अधि इत्युपरिभावे । अध्युरुषु बहुलीलाविग्रहेषु । भुवनानि सर्वाणि क्षियन्ति निवसन्ति, स्वभावतः तानि ज्ञानपूर्वकाणि निवसन्ति विनिवसन्ति—एषु लीलाविग्रहेषु वयं तिष्ठाम इति । तर्हि क्षियतिरैश्वर्यकर्म ऐश्वर्यं प्राप्नुवन्तीति । एवं नानाविधविक्रमणावतरणे वीर्याय सामर्थ्याय तद्दर्शनाय विष्णुर्मृगः सिंहः प्रस्तवते प्रकर्षेण स्तुतिं लभत इत्यर्थः । यस्माच्चेदमुभयोपास्ये नृसिंहपदं व्याख्यातं तस्मादित्युपसंहरति—तस्माद्उच्यते नृसिंहमिति । एवमुभयापेक्षया आद्यं षष्ठं नृसिंहपदम् उभयोपास्ये व्याख्याय अथेदानीम् उभयापेक्षया द्वितीयं सप्तमं च पदं व्याख्यातुं प्रश्नः—अथ कस्मादुच्यते भीषणमिति । स होवाच प्रजापतिरित्यनुषङ्गोत्तरम् । यस्माच्छब्दोपादानात्स्वमहिम्नेत्यनुषङ्गः । यस्मात्स्वमहिम्ना यस्य मूलनृसिंहव्यूहस्वरूपं साङ्गं शिखाङ्गयुक्तं मौलिप्रदेशे चान्द्रतेजोराशियुक्तं सामाङ्गयजुर्लक्ष्मीमन्त्रव्याख्यातं भूर्भुवःस्वर्महर्लोकचतुष्टयसंपिण्डिततेजोराशियुक्तम् अप्रधृष्यतेजोमयं रूपं दृष्ट्वा सर्वे देवास्तदङ्गद्युनिवासिनो वसुरुद्रादित्याः सर्वाणि भूतानीमानि भीत्या भयेन पलायन्ते

पलायनं कुर्वन्ति, स्वयं देवः यस्मात्कस्मादपि न बिभेति निरतिशयाभयगुणविशिष्ट उपास्यः। एवम् उक्तोपास्ये भीषणपदं व्याख्याय तदेव पदं द्वितीये व्यूहे कृत्वा व्याचष्टे— भीषेत्यादि। भीषा भीत्या अस्मान्मूलव्यूहात् वातः वायुः पवते वाति। वातपदोपादानात् पञ्चमहाभूतव्यूहः उपलक्षितः। भीषोदेति सूर्यः इति सोमसूर्यव्यूहौ उपलक्षितौ। भीषास्मादग्निश्च इत्याग्नेयो व्यूहः। इन्द्रश्चेति सर्वव्यूहः। मृत्युर्धावति पञ्चम इति मृत्युव्यूहः। तत्र अस्यामृचि यद्यपि पञ्चानां व्यूहानामुपादानम्, तथापि तदादिन्यायेन सर्वसंकलनतया भियो दर्शनात् वातादित्यादीनां स्वस्वरूपेण भयदर्शनमुखेन सर्वेषां ब्रह्मादीनां संग्रहणात् भयाभावरूपस्य नृसिंहस्य प्रवेशनेन वा तत्तद्रूपधारणेन वा उभयरूपतेति, द्विरूपत्वमस्ति सर्वेषाम्। तत्र एकैकस्य देवस्य तत्तद्रूपधारणेन उभयरूपं दर्शयन् भूतानां देवानां च स्वान्तर्भावेन उभयरूपं प्रदर्शयति। इत्युभयरूपेण सर्वं द्वात्रिंशद्व्यूहं सगृह्णातीयमृगिति तत्त्वार्थः। यस्मादेवमुभयोपास्ये भीषणपदं व्याख्यातं तस्मादित्युपसंहरति— तस्मादुच्यते भीषणमिति। एवमुक्तोपास्ये प्रागुक्तपदं व्याख्याय अथेदानीमुभयापेक्षया तृतीयमष्टमं च पदमुभयोपास्ये व्याख्यातुं देवप्रश्नः— अथ कस्मादुच्यते

भद्रमिति । स होवाच प्रजापतिरित्यनुषज्योत्तरम् । यस्मात्पदोपादानात् स्वमहिम्नेत्यनुषङ्गः । स्वयं भद्रो भूत्वा भजनीयो माङ्गलिको भूत्वा सर्वदा भद्रं माङ्गलिकं ददाति भद्रदातृस्वरूपं च मूलव्यूहे उपास्यमिति दर्शयति । रोचनो दीप्तियुक्तः । रोचमानः शिखाङ्गेन रुचिं दीप्तिं कुर्वन्, शानच्प्रत्ययान्तत्वात् । तदङ्गं द्वितीयतेजोरूपादङ्गादधिकतरतेजोरूपम् । अतश्च नानाभरणयुक्तमौलिगतं तेजः तदन्तर्गतानां देवानां च स्वतेजसा अभिभवतीत्येवमुपास्यम् । अत एवोक्तमस्माभिः शिखाङ्गमन्त्रं व्याचक्षाणैः प्रपञ्चागमशास्त्रे— 'शिखा तेजः समुद्दिष्टं वषडित्यङ्गमुच्यते । तत्तेजोऽस्य ततः प्रोक्ता शिखा मन्त्रेण मन्त्रिणः' इति । निरतिशयतेजोऽवयवः शिखेत्यर्थः, 'यस्य ज्ञानमयी शिखा' इति श्रुतेः । शोभनः स्वरूपेण, शोभमानः शिखाङ्गतेजसा, अत एव कल्याणः माङ्गलिकमूलनृसिंहव्यूहः । एवमुक्तोपास्ये अष्टमं पदं व्याख्याय अथेदानीं तेनैव पदेन द्वात्रिंशद्व्यूहम् ऋचा व्याचष्टे—भद्रं कर्णेभिरिति । इयमृक् प्रारम्भे शान्तिपाठे व्याख्याता । तनूभिरेव एभिस्तनूमन्त्रैरेव स्थिरैरङ्गैरिति विशेषः । पञ्चमाङ्गान्तर्भावात्स्तुतिमन्त्राणामेव उभयोपास्ये व्याख्यानं तस्मादित्युपसंहरति— तस्मा-

दुच्यते भद्रमिति । इति-शब्दो व्याख्यातः । एवं तृतीयपादे तत्तत्पदव्याख्यानेन साङ्गोपासनामभिधाय तथैव चतुर्थपादोपासनामभिधातुं तदाद्यपदं मूलमन्त्रापेक्षया नवमं च पदम् उभयोपास्ये व्याख्यातुं देवप्रश्नः— अथ कस्मादुच्यते मृत्युमृत्युमिति । स होवाच प्रजापतिरित्यनुषज्योत्तरम् । यस्मात् स्वमहिम्नेत्यनुषङ्गः । स्वभक्तानां भज सेवायां स्वसेवकानाम् अनन्यभावेन स्मृत एव उपासित एव मृत्युं साक्षात्कालप्राप्तम् अपमृत्युं च अवान्तरप्राप्तं जातकर्मणि गणितशास्त्रनिर्णीतायुःपरिमाणात् तदन्तरा मृत्युः अपमृत्युः तं च अनन्यभावेन उपासकानाम् अप्रार्थित एव मारयति विनाशयतीत्येवंरूपं कवचमङ्गमुपास्यम् । तस्य सामाङ्गमन्त्रेण नृसिंहगायत्र्या नृसिंहरूपेण व्याख्यातत्वात् स्वान् तदुपासकान् स्वस्वरूपान्संपाद्य मृत्युमपमृत्युं च मारयतीत्यर्थः, 'यो वै नृसिंहो देवो भगवान्यश्च जीवः' इति मन्त्रवर्णात् । इदं प्रागुक्तं पदं मूलनृसिंहव्यूहोपास्यपरत्वेन व्याख्याय अथेदानीं तेनैव पदेन द्वात्रिंशद्व्यूहम् ऋचा व्याचष्टे । यो द्वात्रिंशन्नृसिंहव्यूह आत्मदाः आत्मानं ददातीत्यात्मदाः स्वस्वरूपदाता सर्वेषां देवानां स्वरूपं दत्वा धारयतीत्यर्थः । बलदाः सामर्थ्यदाता स्वोपासकानां स्वस्वरूपधारणे शक्तिं

ददातीत्यर्थः । यस्य प्रशिषं मूलनृसिंहव्यूहस्य अङ्गचतुष्टय-प्रशिषं प्रकर्षेण शिष्यत इति प्रशिषं प्रोर्वरितं द्वात्रिंशद्व्यूहं विश्वे देवाः सर्वे देवा. उपासते उपास्तिं कुर्वन्तीत्यर्थः । यस्य च्छायामृतम्, छायेति गृहनाम, छायैवामृतं छाया-मृतं महाचक्रम्, तदन्तर्भावादस्य व्यूहस्य; यो व्यूहो मृत्यु-मृत्युः मृत्योरपि मृत्युः, 'मृत्युर्यस्योपसेचनम्' इति श्रुतेः । कं प्रजापतिं ब्रह्मणो व्यूहम्, तदादिन्यायेन बद्धक्रमकत्वात् सर्वं संगृह्णाति; देवम्, 'देवो दानाद्वा द्योतनाद्वा दीपनाद्वा' इति यास्कवचनात् । हविषा हविष्प्रदानेन होमेन नैवेद्येन वा अर्चनेन । अत एव वक्ष्यति महाचक्रप्रकरणे—'अनुष्टुभा होमं कुर्यात् अनुष्टुभा अर्चनम्' इति । विधेम परिचरेम । य-द्वा 'विधतिर्दानकर्म' इति यास्कवचनात् ब्राह्मव्यूहप्रभृति-व्यूहाय हविर्दद्मः—इति विभक्तिव्यत्ययः क-शब्दे देव-शब्दे च । तस्मिन्पक्षे विधतिः परिचरणकर्मेति तत्त्वार्थः । एवं प्रा-गुक्तोपास्ये मृत्युमृत्युपदं व्याख्यातं तस्मादित्युपसंहरति—तस्मादुच्यते मृत्युमृत्युमिति । एवं प्रागुक्तपदं प्रागु-क्तोपास्ये व्याख्याय अथेदानीमुभयापेक्षया द्वितीयं दशमं च पदं व्याख्यातुं देवप्रश्नः— अथ कस्मादुच्यते नमामीति । स होवाच प्रजापतिरित्यनुषज्योत्तरम् । यस्मात् स्वम-

हिम्नेत्यनुषङ्गः । नमामीत्यस्या आख्यातपदत्वात् अस्मदर्थं प्रत्ययार्थं विहाय प्रकृत्यर्थं व्याचष्टे । तथा च अस्य प्राक्तनसर्वपदार्थसंबन्धिनः सर्वत्रानुषङ्गः । यस्माच्छब्दोपादानात् स्वमहिम्नेत्यनुषङ्गः प्रकृत्यर्थेन । यस्मात् यं सर्वे देवाः प्रागुक्तविशेषणं मूलनृसिंहव्यूहं सर्वे पृथिव्यन्तरिक्षब्रह्मलोकनिवासिनः महाचक्रोपासकाश्च नमन्ति नमस्कुर्वन्ति— इति सर्वनमस्कार्यगुणविशिष्टः उपास्यः इति दर्शयति । तथा च द्विविधोपासकानां देवानामधिकारिविशेषणमाह— मुमुक्षवो ब्रह्मवादिनश्च इति, अब्रह्मवादिन इति अन्यथा द्वैविध्यासंभवात् । यद्वा मुमुक्षवो ब्रह्मवादिनो मुक्ताश्च लीलया विग्रहं परिगृह्य नमन्तीत्यनुषङ्गः । एतदुक्तं भवति—ब्रह्मलोके 'स ब्रह्मा स शिवः स हरिः' इत्यादिमन्त्रवर्णोपात्तसामाङ्गनृसिंहगायत्र्या व्याख्यातनृसिंहव्यूहः चतुर्थकवचाङ्गाश्रयत्वेनोपास्यः । तच्च कवचं सर्वानेतानुपास्यान्संगृह्णातीत्यङ्गचतुष्टयान्तर्गतानन्यांश्च । अत एवोक्तमस्माभिः कवचाङ्गमन्त्रार्थं व्याचक्षाणैः प्रपञ्चसारे— 'कवचग्रह इत्यस्माद्धातोः कवचसंभवः । हुं तेजस्तेजसा तेन गृह्यते कवचं ततः' इति । एवं प्रकृत्यर्थसहितेन च पदार्थं प्रतिपाद्य साधारणरूपरूपं सर्वनमस्कार्यत्वगुणमभिधाय अथेदानीं सा-

मादिमन्त्रसाधारणत्वेन पुनः प्रकृत्यर्थम् ऋचा व्याचष्टे—प्र नूनमिति । उक्थ्यं प्रशस्तं ब्रह्मणस्पतिः ब्रह्मणः साकारस्य निराकारस्य च पतिः उपदेशद्वारा पाता पालयिता । नूनं निश्चितं मन्त्रं सामराजं स्तुहीत्यादि य आत्मदा इत्यन्तं द्वात्रिंशद्व्यूहप्रतिपादकं मन्त्रजातम् । यस्मिन्प्रागुक्ते मन्त्रे इन्द्रो मित्रो वरुणोऽर्यमा देवा ओकांसि गृह्याण्युपासनाय चक्रिरे कृतवन्त इत्यर्थः । अनेनैतदर्शयति—यथा देवे उपास्ये गुरौ च भक्तिः तथा मन्त्रेऽपीति । तदुक्तम्—'गुरौ देवे च मन्त्रे च सदृशी भक्तिरिष्यते' इति । तत्र च मन्त्रस्य नमस्कार्यत्वश्रवणात् । एवं नमामीत्येतदाख्यातपदमुक्तोपास्ये व्याख्यातं तस्मादित्युपसंहरति—तस्मादुच्यते नमामीति । एवं नमामीति पदं प्रकृत्यर्थसंबन्धित्वेन व्याख्याय अथेदानीमहमिति कर्तृपदं सर्वसाधारण्येन व्याख्यातुं देवप्रश्नः—अथ कस्मादुच्यतेऽहमिति । तत्र आख्यातोक्तमपुरुषप्रयोगादर्थादेव अहमिति प्राप्ते पुनः प्रयोगः स च कस्मादिति चोद्याभिप्रायेण । स होवाच प्रजापतिरित्यनुषज्योत्तरम् । पश्चाङ्गोपासनाकर्तृफलं निर्दिश्यते तादात्म्यलक्षणम् । न च मुमुक्षोरेतदनिष्टमिति वाच्यम्, ऐश्वर्ये सति एतत्फलावाप्तेः । य इह स्थातुमपेक्षते तस्य

तादात्म्यलक्षणं सर्वैश्वर्यं ददाति देहान्ते देवः परं ब्रह्म तारकमिति श्रुतेः फलपदमिदं न तु उपासकपदम् । तच्च पृथक्सामाभिव्यक्तं मन्त्रेण व्याचष्टे । तच्च सर्वपदेष्वनुषज्यमानं सर्वपदजातं सामाभिव्यक्तमेव व्याख्यातमिति नियमं दर्शयति । तथा च प्रागुक्ता सर्वोपासना सामपूर्विकैवेति । ततश्च प्रागुक्तायामुपासनायाम् उपास्योपासकभावेन प्रवृत्तः उपासकः उपासनातः शुद्धान्तःकरणः प्रत्यगात्मकतयैव उपास्यं साक्षात्कृत्य आह अनेन साम्ना अन्येषामुपासनफलं दर्शयितुम्— अहमस्मि प्रागुक्तमुपास्यम् अहं भवामि प्रथमजाः पुरश्चरणोपासनायाः प्रथमोत्पन्नः । ऋतस्य सत्यमूर्तामूर्तस्य जगतः पूर्वं स्यां देवेभ्यो अमृतस्य क्षीरस्य नाभायि नाभ्यां यो मा ददाति स्वीकरोति धारयति वा, स इदेव इत्थमेव मा माम् अवा रक्षितवान् । तथा च अन्नस्तावकेन मन्त्रेण सामाभिव्यक्तेन फलनिर्देशं कुर्वन क्षीरोदार्णवसंबन्धिनीयमुपासनेति दर्शयति । अहमन्नं क्षीरम् उपास्याधारम् अहमेव भवामि । अन्नमदन्वा योऽत्ति, तमन्नमदन्तं देवब्राह्मणेभ्यो अन्नमदातारम् अहमद्मि अहं भक्षयामि । यद्वा अन्नमदन्तम् अन्नादनकर्तारं जीवभावापन्नं पश्चाङ्गोपासनात. अद्मि भक्षयामि संसाररूपं विनाशयामीत्यर्थः । यत

एवम्, अतोऽहं विश्वं सर्वं भुवनम् अभ्यभवाम् अभिभवामि सुवर्न ज्योतीः सूर्यज्योतिरिव । यद्वा सुवर्णाकारस्योपास्यस्य ज्योतिः प्रकाशः अहमेव भवामीति फलनिर्देशः । इदं च फलमनुषङ्गात् प्रतिपदं प्रतिपादं च अनुसंधेयम् । असकृत्साकाराखण्डवाक्यार्थोपदेशे हि दार्ढ्यं स्यात्– तत्त्वमसीति नवकृत्व उपदेशवत् । एवं साकारनिष्ठस्य यद्यन्तःकरणं शुद्धं ततोऽपि इदमेव फलं व्याख्यातम् । अत एव नोत्तरोपसंहारः प्राक्तनवत् तस्मादुच्यत इति, उपासनाभ्यासाददैतापत्तेः; 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' इति श्रुतेः । एतत्सर्वं सामाङ्गप्रणवेन हृदयमन्वव्याख्यानावसरे स्पष्टीक्रियते । य उपासकः एवं प्रागुक्तमुपास्यम् अहंग्रहोपासनया अधिकारतरतमभावाद्वा उपास्योपासकभावेन वा वेद उपास्ते । इति-शब्दः प्रागुक्तसफलोपासनसमाप्तिं दर्शयति । उपनिषदिति उपनिषच्छब्दो व्याख्यातः । इदं च सामाधीतं नैवेद्ये विनियुक्तं तच्च आनुष्टुभं द्रष्टव्यम् । न तु षट्स्वरं साङ्गं वा, यतः प्रथमोपनिषदि यच्छब्दस्य तृतीयव्याख्यानावसरे तथैव व्याख्यातत्वात् । आनुष्टुभं च अनुष्टुप्स्वराभ्यां गेयम् । तौ च प्रथमोत्तमौ, तथा च अनुष्टुभा भूतोत्पत्तिव्याख्यानावसरे साक्षित्वेनोद्भावितायाम् ऋचि 'त-

स्वैषा भवति' इत्यत्र 'अनुष्टुप्प्रथमा भवति अनुष्टुबुत्तमा भवति' इति प्रथमोत्तमयोः स्वरयोः अनुष्टुप्शब्देन व्याख्यातत्वात्, 'वाग्वा अनुष्टुप्' इति गीतिमात्रेऽपि वाक्शब्दस्य प्रयुक्तत्वात्, 'सैषा वाग्वनस्पतिषु वदति या दुन्दुभौ या ऋणवे या वीणायाम्' इति श्रुतेः। वाचैव प्रयन्ति गीत्यैव प्रयन्ति प्रथमस्वरेण गायन्ति वाचैवोद्यन्ति गीत्यैवोत्तमस्वरेण गायन्त्यक्षराणीत्यर्थः। परमा वा एषा छन्दसां यदनुष्टुबित्यनुष्टुप्छन्द इति। ततश्च अस्मिन्प्रकरणे अनुष्टुप्शब्देन त्रयोऽर्था उच्यन्ते— क्वचित्प्रथमोत्तमौ स्वरौ क्वचिद्गीतिः क्वचिच्छन्द इति यथायोग्यतया ग्राह्या इत्यनुष्टुप्सामोद्धार इति रहस्यमिति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
नृसिंहपूर्वतापनीयोपनिषद्भाष्ये
द्वितीयोपनिषद्भाष्यं संपूर्णम् ॥




नृसिंहपूर्वतापनीयो-
पनिषद्भाष्यम्
तृतीयोपनिषत्

तृतीयोपनिषत् ॥



वं द्वितीयोपनिषदि साङ्गां सफलामुपासनामभिधाय अथेदानीं तस्याः शक्तिबीजनिर्णयपूर्वकत्वात् तन्निर्णयार्थं तृतीयोपनिषदारभ्यते प्रश्नोत्तराख्यायिकया । नन्वेवं तर्हि इयं पूर्वमेव आरब्धव्या, एतत्पूर्वकत्वात्प्रागुक्ताया उपासनायाः । सत्यम् । शक्तिबीजद्वयस्य संपुटीकरणेन विवक्षितत्वात् अर्थात्प्राक्प्राप्तस्यार्थस्य पश्चात्संकीर्तने संपुटीकरणं स्यात्; अन्यथा अर्थानुसारेण संकीर्तने पूर्वमेव द्वयं स्यात्, नोपरिष्टात्—इति संपुटीकरणासंभवादिति पाठत उपासनाया ऊर्ध्वं संबन्धः शक्तिबीजस्य, अर्थाख्येन प्रमाणेन प्राक्संबन्धः । न हि अनवधृतशक्तिकस्य उपासनस्य उपास्याकारावधृतिः । तथा हि कथमस्यायमाकार इति पर्यनुयुक्ते, स्वसामर्थ्यादिति

वाच्यम् । ततश्च सामर्थ्यावधारणपूर्वकमेव उपास्याकारावधारणमिति अर्थात्प्राक्संबन्धः, पाठश्च अनन्तरमिति—कथं नु संपुटीकरणं स्यादिति प्रजापतेर्हृदयम् । किंच उपासनानन्तरं पठितापि इयमुपनिषत् शक्तिबीजनिर्णयात्मिका तत्र तत्र पदपादसाङ्गोपासनावतरणे 'यस्मात्स्वमहिम्ना' 'यः स्वमहिम्ना' इति वीप्साशब्देन च अपकृष्टा सती पूर्वं संबन्धं लभते— महोपनिषदपकर्षणवत् । अतश्च आरम्भणीयेति सिद्धम् ।

देवा ह वै प्रजापतिमब्रुवन्नानुष्टुभस्य मन्त्रराजस्य नारसिंहस्य शक्तिं बीजं च नो ब्रूहि भगव इति स होवाच प्रजापतिर्माया वा एषा नारसिंही सर्वमिदं सृजति सर्वमिदं रक्षति सर्वमिदं संहरति तस्मान्मायामेनां शक्तिं विद्याद्य एतां मायां शक्तिं वेद स पाप्मानं तरति स संसारं तरति स मृत्युं तरति सोऽमृतत्वं च गच्छति महतीं श्रियमश्नुते मीमांसन्ते ब्रह्मवादिनो ह्स्वा वा दी-

र्घा वा प्लुता वेति । यदि ह्रस्वा भवति सर्वं पाप्मानं दहत्यमृतत्वं च गच्छति यदि दीर्घा भवति महतीं श्रियमाप्नुयादमृतत्वं च गच्छति यदि प्लुता भवति ज्ञानवान्भवत्यमृतत्वं च गच्छति तदेतदृषिणोक्तं निदर्शनम्— सईं पाहि य ऋजीषी तरुत्रः श्रियं लक्ष्मीमौपलाम्बिकां गां षष्टीं च यामिन्द्रसेनेत्युत आहुस्तां विद्यां ब्रह्मयोनिं सरूपां तामिहायुषे शरणं प्रपद्ये । सर्वेषां वा एतद्भूतानामाकाशः परायणं सर्वाणि ह वा इमानि भूतान्याकाशादेव जायन्ते । आकाशादेव जातानि जीवन्त्याकाशं प्रयन्त्यभिसंविशन्ति तस्मादाकाशं बीजं विद्यात्तदेतदृषिणोक्तं निदर्शनम्— हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमस-

दञ्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्। य एवं वेदेति महोपनिषत्॥ १॥

इति तृतीयोपनिषत्॥

देवा ह वै इत्यादि स होवाच प्रजापतिरित्यन्तं स्पष्टार्थम्। मायाविपुरुषाधीना मायेत्युच्यते। लोके हि माया प्रसारकमायाव्यधीना दृष्टा। वै प्रसिद्धम्। एषा नारसिंही नृसिंहाधीना। यस्मादियं नृसिंहाकारब्रह्माधीना सती सर्वमिदं सृजतीत्यादि संहरतीत्यन्तं स्पष्टार्थम्। जगज्जन्मस्थितिलयकारणत्वम् एतदधीनम्, शुद्धस्य ब्रह्मणोऽकारणत्वात्। यस्मादेवं तस्मान्मायामेतां शक्तिं विद्यात् नृसिंहाधीनामुपासीत। य एतां मायां शक्तिं वेद उपास्ते। तदुपासनाफलमाह—स पाप्मानमित्याद्यश्नुत इत्यन्तं स्पष्टार्थम्। मीमांसन्ते विचारयन्ति ब्रह्मवादिनः— ह्रस्वा वा दीर्घा वा प्लुता वा इति। सामान्तर्भावात्प्लुतैवेति प्राप्ते ह्रस्वदीर्घयोः फलविशेषसंबन्धार्थमियं मीमांसा; तामाह। यदि ह्रस्वेत्यादि गच्छतीत्यन्तं स्पष्टार्थम्। ह्रस्वदीर्घप्लुतसंबन्धः सव्यञ्जनस्य स्वरस्य, उत साकाराख्यं व्यञ्जनं विहाय स्वरस्य संबन्ध इति संदेहः। एतस्मिन्संदेहे निर्णयाय एतद्व-

क्ष्यमाणं निदर्शनमुदाहरणम् ऋषिणोक्तं सईमिति । साकार-व्यञ्जनात् पृथक्करणं सबिन्दुकस्य स्वरस्य । अतः सबिन्दुके स्वरे ह्रस्वादिसंबन्धो मायाबुद्ध्योपासनं च । सईमिति समासः सकारश्च ईं च सईम् । तस्याः संबोधने ईमिति निपात-त्वाददोषः । हे सईं सबिन्दुकस्वर त्वदालम्बनेन एता. वक्ष्यमाणाः शक्तीः उपासिताः पाहि रक्ष । यद्वा स इति व्यस्तं यत्तदोर्नित्यसंबन्धः । य ऋजीषी ऋजुभावेच्छुः तरुत्रः तरणशील., स ईं शक्तिं सबिन्दुकं स्वरं श्रियादि-बुद्ध्योपासितं पाः पालितवान् । पा पालने । पालकाधीन-त्वात्पालनीयशक्तेः । हीति निश्चितम् । सबिन्दुकस्वराल-म्बनत्वेनोपास्याः तव व्यूहसंबन्धिनीः शक्तीराह— श्रियं विष्णुशक्तिं पाः पालितवान् । यद्वा पाहि । एवमुत्तरत्रापि द्विधा संबन्धः । लक्ष्मीं नृसिंहशक्तिम् , औपलामम्बिकां गौरीं महेश्वरशक्तिम् , गां सरस्वतीं ब्रह्मशक्तिम् , षष्ठीं च स्कन्दशक्तिम् , यामिन्द्रसेनेत्याहुः तामिन्द्रशक्तिमिन्द्राणीम् , विद्याम् ईश्वरशक्तिम् , ब्रह्मयोनिं ब्रह्मावाप्त्यै कारणभूतां सरूपां साकारां तां तां शक्तिम् इह सबिन्दुके स्वरे आयुषे उपा-सनानुकूलायुरभिवर्धनाय शरणं प्रविशामि । एवं शक्त्यक्षर-निर्णयं तदाश्रितां सप्तविधशक्त्युपासनां दीर्घादिमात्रोपास-


नां सफलामभिधाय अथेदानीं बीजाक्षरनिर्णयं तदाश्रितां सफलां च उपासनाम् अभिधातुं तन्निर्णयमाह—— सर्वेषां वा इत्याद्यभिसंविशन्तीत्यन्तं स्पष्टार्थम् । आकाशशब्दो हकारं वक्ति । सर्वागमशास्त्रप्रसिद्धे. आगमरूपोपनिषत्प्रसिद्धेश्च । यस्मादेवं तस्मादाकाशशब्दवाच्यं हकारं बीजं विद्यात् । बीजं निदानं मूलकारणं तद्बुद्ध्योपासीत तद्वाचकं वा निपातरूपेण । स च अयं वाच्यवाचकसंबन्धो लोकेऽप्रसिद्ध इति मन्त्वागमशास्त्रैकगम्यम् । एवं शक्त्यक्षरमपि शक्तिवाचकत्वाच्छक्तिः तद्बुद्ध्योपास्यत्वाद्वा । शक्तिबीजयोस्तद्बुद्ध्योपास्यत्वं तद्वाचकत्वादेवेति रहस्यम् । यथा प्रणवाक्षरं ब्रह्मवाचकत्वाद्ब्रह्मबुद्ध्योपास्यमभूत् तद्वच्छक्तिबीजम्; तच्च सस्वरं व्यञ्जनमात्रं वेति संदेहः, तद्व्यावृत्त्यर्थमाह—— तदेतत् ऋषिणोक्तं निदर्शनम्। तच्चोक्तार्थम्। हंसः परमात्मा। हं मूलकारणं सद्बृहत् । यद्वा सकारेण संबद्धमजपागायत्रीरूपेण वर्तमानं नासिकापुटाभ्यां निःसृतं ब्राह्मणस्त्रीशूद्राद्यधिकारतया वर्तमानं संकल्पादेव फलदं परमात्मवाचकं स इति । हंसः परमात्मा वक्ष्यमाणं सर्वमभूदिति वाक्यशेषः । शुचौ बुद्धौ सीदतीति शुचिषत् । हंस एव वसुः देवः । स एवान्तरिक्षे सीदतीत्यन्तरिक्षसत् । बृहत् बृंहणत्वादन्तरिक्षा-

श्रितो देवः स एव होता। वेदिषत् वेद्यां सीदतीति वेदिषत्। स एवातिथिः दुरोणसत् दुरोण इति गृहनाम दुर्वा भवन्ति दुस्तर्णः तस्मिन्सीदतीति दुरोणसत् । स एव नरि जीवे सीदतीति नृषत्, 'य आत्मनि तिष्ठन्' इति श्रुतेः । वरसत् वरे वरिष्ठे स्थाने सीदतीति वरसत् । स एव ऋतेन सत्येन सीदतीति ऋतसत्। स एव व्योम्नि हृदयाकाशे उपलभ्यतया सीदतीति व्योमसत् । अब्जा अप्सु क्षीरोदार्णवे उपास्यतया जात इत्यब्जाः। गोषु वा उपास्यतया प्रतिपाद्यत्वेन जात इति गोजाः । 'ऋतं सत्यम्' इति मन्त्रवर्णादुपास्यतया जात इति ऋतजाः । अद्रौ मेघे जात इत्यद्रिजाः । छन्दसि जनिरय सुबन्तप्रयोगे सकारान्तो दृष्ट इति सोपपदो विसर्गान्तो दीर्घश्च सुतेजाः इतिवत्। एवं परमात्मैव बृहन्महानिति । ऋतं सत्यं ज्ञेयमिति शेषः । य उपासकः एवं परमात्मतत्त्वं बीजाक्षरवाच्यं तद्बुद्धया च उपास्यं वेद जानाति। इति-शब्दः शक्तिबीजनिर्णयसमाप्तिं द्योतयति । यद्वा इति इत्येवं निपातानामनेकार्थत्वात् इत्येवं महोपनिषत् इति महोपनिषदि पठितानां मन्त्राणाम् एव-शब्दात् एतदेव शक्तिबीजं संबध्नाति । ततश्च मूलमन्त्रे षष्ठपदे त्र्यक्षरे नृकारं सकारं विहाय शिष्टमक्षरद्वयं यथापठितं शक्तिबीजं

द्रष्टव्यं सामर्थ्यात् । परमात्मवाचकमाथर्वणंच द्वितीयं हंसंच प्रथमं यत्पठितं तदित्येवं स्तुतिमन्त्रेषु सर्वेषु चतुर्थ-पादे नृकारं सकारं विहाय यच्छिष्टमक्षरद्वयं यथापठितं तच्छक्तिबीजमिति तत्त्वं रहस्यं च इति शक्तिबीजाक्षर-निर्णयः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
नृसिंहपूर्वतापनीयोपनिषद्भाष्ये
तृतीयोपनिषद्भाष्यं संपूर्णम् ॥




नृसिंहपूर्वतापनीयो-
पनिषद्भाष्यम्
चतुर्थोपनिषत्

चतुर्थोपनिषत् ॥



एवं तावच्छक्तिबीजसंपुटितां साङ्गां नृसिंहब्रह्मोपासनामभिधाय अथेदानीं तदङ्गहृदयादिमन्त्रव्याख्यानाय यथासंख्यं सामाङ्गमूलमन्त्राङ्गमन्त्रोपनिषत् प्रश्नोत्तररूपाख्यायिकया चतुर्थी आरभ्यते । ननु यदि मूलमन्त्राङ्गमन्त्रव्याख्यानाय उपनिषदियं प्रस्तुता, तर्हि तदङ्गव्याख्यावसरे अस्याः प्रस्तावः स्यात्; न त्विदानीं प्रस्तावो युक्तः । किं च मूलमन्त्रपदव्याख्यानावसरे तदुपासनायाः कृत्स्नाया एव उक्तत्वात् अन्ते तत्फलस्य च उक्तत्वात् किमपरमवशिष्टम्, यदर्थमियमुपनिषदारभ्यते— अत्रोच्यते । सत्यम् । तदङ्गव्याख्यानावसरे पञ्चमाङ्गन्यासे च 'प्रत्यक्षरमुभयत ओंकारो भवति' इति वचनात् मूलमन्त्राक्षराणां यथापठितानां व्यत्यासे कृते मूलमन्त्रतत्पदापरिज्ञाने प्राप्ते तत्परिज्ञानस्यैवान्तरङ्गत्वात् तदर्थं पदोद्धारः प्रस्तुतः; तदन-

न्तरं तदर्थज्ञाने प्रस्तुते शक्तिबीजनिर्णयः प्रस्तुतः; इत्येवं पञ्चमाङ्गन्यासपदोद्धारतदर्थशक्तिबीजनिर्णयानाम् अन्योन्यं बद्धक्रमकत्वादन्तरङ्गत्वाच्च तदन्तराले प्रवेशो अस्य अयुक्त इति इयमुपनिषत् शक्तिबीजनिर्णयानन्तरं पठिता। यथा गुरुमते अधिकारलक्षणं मध्ये एव पठितम्, तथा इयमुपनिषत् उपरिष्टान्महाचक्रोपासनाफलकथनयोर्बद्धक्रमकत्वात् तदन्तराले प्रवेशमलभमाना मध्यस्थैव शोभते। किं च सामाङ्गप्रणवेन शक्तिबीजाक्षरमिश्रितेन हृदयाङ्गमन्त्रो व्याख्येय इति न तदङ्गन्यासावसरे अस्याः प्रवेशो युक्तः, तदानीं शक्तिबीजाक्षरस्याप्रस्तुतत्वेनाशक्यत्वान्मिश्रणस्य। तस्माच्छक्तिबीजनिर्णयानन्तरम् अस्या आरम्भो युक्तः। यदुक्तं कृत्स्नविद्याभिधानात्किमवशिष्टमिति, तन्न। अत्रत्यमेवानागतावेक्षणन्यायेन व्याख्यातृभिरेव तत्रोपसंहृतम्, न तु तत्रत्यं शब्दोपात्तमिति। यदुक्तमन्ते फलस्य च उक्तत्वात्किंशिष्टमिति, तदुक्तमेव प्राक्तनन्यायेन, कृत्स्नत्वाद्विद्यायाः। तस्मात्सूक्तं शक्तिबीजनिर्णयानन्तरमस्या आरम्भः शोभत इति॥

देवा ह वै प्रजापतिमब्रुवन्नानुष्टुभस्य मन्त्रराजस्य नारसिंहस्याङ्गमन्त्रान्नो ब्रू-

हि भगव इति । स होवाच प्रजापतिः प्रणवं सावित्रीं यजुर्लक्ष्मीं नृसिंहगायत्रीमित्यङ्गानि जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति । ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोंकार एव यच्चान्यत्त्रिकालातीतं तदप्योंकार एव सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पाज्जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक्तैजसो द्वितीयः पादो यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत्सुषुप्तं सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक्चेतोमुखः प्राज्ञस्तृतीयः पाद एष सर्वेश्वर एष सर्वज्ञ एषो-

ऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानां न बहिःप्रज्ञं नान्तःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनमदृष्टमव्यवहार्यमग्राह्यमलक्षणमलिङ्गमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥ १ ॥

देवा ह वा इत्यादि नारसिंहस्य इत्यन्तं स्पष्टार्थम् । अङ्गमन्त्रान्नो ब्रूहि भगव इति । वेदे रुकारादेशान्तो भगवच्छब्द इति संबोधनं भगव इति । अङ्गेषु हृदयाद्यङ्गेषु व्याख्येयेषु तद्व्याख्यानमन्त्राः अङ्गमन्त्राः, यद्वा अङ्गानि च मन्त्राश्च अङ्गमन्त्राः इत्युभयथापि समास उक्तः, किं तु उभयथाप्येषां मूलमन्त्राङ्गमन्त्रसंबन्धः संख्यातः स्थानाच्च सामर्थ्याच्च प्रतीत नूनं न निवारयितुं शक्यते । स होवाच प्रजापतिरित्यादि गच्छतीत्यन्तमुक्तार्थम् । येनैव क्रमेणाङ्गानामुद्देशः कृतः, तेनैव क्रमेण तद्व्याख्यामाह— ओमित्येतदक्षरमिति । कथं पुनरोंकारनिर्णयः साकारात्मतत्त्वप्रतिपत्त्युपायत्वं प्रतिपद्यत इति । उच्यते— 'ओमित्येतदालम्बनम्' 'एतद्वै

सत्यकाम परं चापरं च यदोंकारः' 'ओमित्यात्मानं युञ्जीत' 'ओमिति ब्रह्म' 'ओंकार एवेदं सर्वम्' इत्यादिश्रुतिभ्यो रज्ज्वादिरिव सर्पादिविकल्पस्य अद्वयात्मा परमार्थः सन् प्राणादिविकल्पास्पदो यथा, तथा सर्वो वाक्प्रपञ्चः प्राणाद्यात्मविषयः ओंकार एव । स च आनुष्टुबङ्गं सत्त्वात्मस्वरूपमेव, तदभिधायकत्वात् । ओंकारविकारशब्दाभिधेयश्च सर्वः प्राणादिः आत्मविकल्पः अभिधानव्यतिरेकेण नास्ति, 'वाचारम्भणं विकारो नामधेयम्' 'तस्येदं वाचा तन्त्या नामभिर्दामभिः सर्वं सितम्' 'सर्वं हीदं नामनि' इत्यादिश्रुतिभ्यः । अत आह— ओमित्येतदक्षरमिदं सर्वमिति । यदिदमर्थजातम् अभिधानाभिधेयभूतं तस्याभिधानाव्यतिरेकात् अभिधानभेदस्य ओंकाराव्यतिरेकात् ओंकार एव इदं सर्वम् । परं च ब्रह्म अभिधानाभिधेयोपायपूर्वकमवगम्यत इति ओंकार एव । तस्यैतस्य परापरब्रह्मरूपस्याक्षरस्य ओमित्येतस्य उपव्याख्यानं ब्रह्मप्रतिपत्त्युपायत्वात् ब्रह्मसमीपतया विस्पष्टम् आख्यानं प्रकटकथनम् उपव्याख्यानं प्रस्तुतं जानीयादिति शेषः । न त्वनुषङ्गः, 'व्यवायान्नानुषज्यते' इति न्यायात् । भूतं भवद्भविष्यदिति कालत्रयपरिच्छेद्यं यत्, तत् ओंकार एव, उक्तन्यायतः । यच्चान्यत् त्रिकाला-

तीतं कार्याधिगम्यं कालत्रयापरिच्छेद्यम् अव्याकृतादि तद्-प्योंकार एव— इति अभिधानाभिधेययोरेकत्वे अभिधान-प्राधान्येन निर्देशः कृतः ओमित्येतदक्षरमिदं सर्वमित्यादि । अभिधानप्राधान्येन निर्दिष्टस्य पुनरभिधेयप्राधान्येन निर्देशः अभिधानाभिधेययोरेकत्वप्रतिपत्त्यर्थम् । इतरथा हि अभि-धानतन्त्रा अभिधेयप्रतिपत्तिः इति अभिधेयस्याभिधानत्वं गौणमित्याशङ्का स्यात् । एकत्वप्रतिपत्तेश्च प्रयोजनमभि-धानाभिधेययोः एकेनैव प्रयत्नेन प्रविलापयन् तद्विलक्षणं ब्रह्म प्रतिपद्यते इति । तथा च वक्ष्यति— पादा मात्रा मात्राश्च पादा इति । तदाह । सर्वं हि एतद्ब्रह्म, सर्वं यदुक्तमोकारमात्रम् एतद्ब्रह्म । तच्च ब्रह्म परोक्षाभिहितं प्रत्यक्षतो विशेषेण निर्दिशति— अयमात्मा ब्रह्मेति । अयमिति चतुष्पात्त्वेन प्रविभज्यमानं प्रत्यगात्मानं प्रत्य-क्षतया अभिनयेन निर्दिशति— सोऽयमात्मेति । सोऽय-मात्मा ओंकाराभिधेयः परापरत्वेन व्यवस्थितः चतुष्पात् कार्षापणवत् । न गौरिव चतुष्पात् । त्रयाणां विश्वादीनां पूर्वपूर्वप्रविलापनेन तुरीयस्य प्रतिपत्तिरिति करणसाधनः पादशब्दः ; तुरीयस्य तु पद्यत इति कर्मसाधनः पाद-शब्दः । कथं चतुष्पादित्यत्र आह— जागरितं स्थान-

मस्येति जागरितस्थानः । बहिःप्रज्ञः स्वात्मव्यतिरिक्ते विषये प्रज्ञा यस्य सः बहिःप्रज्ञः, बहिर्विषये यस्य प्रज्ञा विद्याकृता अवभासत इत्यर्थः । तथा सप्ताङ्गः सप्तशक्तयः अङ्गे हृदयाख्ये यस्य स तथोक्तः, विष्णुशक्तीनां विष्णुवक्षःस्थलाश्रयत्वप्रसिद्धेः । 'विष्णोर्वक्षःस्थलाश्रया' इति स्मृतेः, 'विष्णोर्वक्षःस्थले स्थिताम्' इति च, 'करद्वयस्थप्रविकासिपङ्कजां वक्षःस्थलेन श्रियमुद्वहन्विभुः' इति च । तथा एकोनविंशतिमुखो मूलमन्त्रापेक्षया एकोनविंशतितममक्षरं बीजं मुखं यस्य मूलनृसिंहव्यूहस्य स तथोक्तः । तस्य नाभेरूर्ध्वं मूर्धतः प्राक् हृदयाख्यम् अङ्गम्, अत उपास्योपासकयोरैक्ये भेदे वा हृदयाङ्गन्यासादिकमविरुद्धम् । नन्वेवं सप्तान्यङ्गानि मूर्धैव सुतेजा इत्येवमादीनि यस्य स तथोक्तः । तथा एकोनविंशतिर्मुखानि अस्य बुद्धीन्द्रियकर्मेन्द्रियाणि वायवश्च प्राणादयः पञ्च मनो बुद्धिरहंकारश्चित्तमिति मुखानीव तानि उपलब्धिद्वारत्वादित्येवं यथासंख्यं विराड्हिरण्यगर्भपरत्वेन वाक्यद्वयं माण्डूक्योपनिषत्प्रणवविद्यायां व्याख्यातम्, तथा अत्रापि कस्मान्न व्याख्यायते? उच्यते— अत्र अस्य अपरविद्याप्रकरणाश्रितत्वात् प्रणवविद्यायां तथाङ्गत्वेन च विनियोगात् प्रणवं तत्साम्नोऽङ्गं

जानीयादिति तथा शक्तिबीजनिर्णयानन्तरम् अस्याङ्गस्य पाठात्। माण्डूक्ये प्रणवविद्यायामनारभ्य अधीतत्वात् प्राधान्यम् अङ्गत्वेन विनियोगाभावाच्च तथा तत्र शक्तिबीजयोरप्रस्तुतत्वाच्च विद्याभेदाच्च तथा व्याख्यानभेदेनार्थभेदात् पृथगर्थप्रतीतिर्ज्यायसी। ननु उभयत्राप्यन्यूनातिरिक्तपाठप्रत्यभिज्ञानेन विद्यैक्यात् अङ्गविद्याया उत्कर्षः प्रधानविद्याया अङ्गविद्याप्रवेशः। अत्रोच्यते—'अन्यथात्वं शब्दादिति चेन् न अविशेषात्' इति न्यायेन विद्याभेदस्यैव युक्तत्वात् आभ्युदयिककाम्येष्टिवाक्यवत्। ननु भेदेऽपि प्रधानविद्याया एव अङ्गत्वेन विनियोगोऽस्तु, प्रत्यभिज्ञानाच्च विद्यैक्यमिति, तन्न, 'प्रकरणान्तरे प्रयोजनान्यत्वम्' इति न्यायेन नैयमिकाग्निहोत्रकौण्डपायिनामयनाग्निहोत्रवत् भेदस्यैव युक्तत्वात्। किं च उभयत्रापि बहुतरपाठसाम्येऽपि क्वचित्पाठभेदोऽपि दृश्यते। तुरीयमात्रानिरूपणावसरे 'एषोऽन्तर्याम्येष ईशान एष प्रभुः' इति माण्डूक्ये पाठः। तापनीये तु 'एषोऽन्तर्याम्येष योनिः' इति ईशानप्रभुपदद्वयं विहाय पाठः। तस्माद्भिन्नत्वात् यद्यत्र योग्यं प्रस्तुतं च, तत् तथा व्याख्येयम्। तथा स्थूलभुक् स्थूलां पृथिवीं हृदयाङ्गान्तर्गतां भुङ्क्ते सेवते इति स्थूलभुक् वि-

श्वेषां नराणां स्वस्मिन्नेव अनेकधानयनात् विश्वानरः विश्वानर एव वैश्वानरः । ननु यथा माण्डूक्ये वैश्वानरशब्दसामर्थ्यात् सप्ताङ्गैकोनविंशतिमुखपदद्वयं यथासंख्यं विराड्ढिरण्यगर्भपरत्वेन व्याख्यातम्, तथाऽत्रापि वैश्वानरशब्दसामर्थ्यात् उभयपरत्वेन व्याख्यायतां किमिति शक्तिबीजपरत्वेन, प्रकरणसंनिधेर्वाक्यसंनिधेर्बलीयस्त्वात् । सत्यम् । यद्यत्र वैश्वानरशब्दो वैश्वानरविद्यापरत्वेनैव वर्तेत, तर्हि एवं स्यात्; न त्वेतत्स्यात्, यौगिक्या वृत्त्या अन्यपरत्वेन व्याख्यातत्वात् । किं च तत्र तत्र विधेयार्थभेदेन वाक्यभेदात् वाक्यसंनिधिर्न निश्चितः । अतः उभयत्रापि प्रकरणसंनिधेरविशिष्टत्वात् प्राग्व्याख्यैव ज्यायसी । प्रथमः पादः तत्र अकारोकारमकाराश्रितत्वेन तद्वाचकत्वेन वा एवंविधविशिष्टबुद्ध्युत्पत्तिरिति प्रथमः पादः । एतत्पूर्वकत्वादुत्तरपादाधिगमस्येति प्राथम्यम् । ननु अयमात्मा ब्रह्म इति प्रत्यगात्मनोऽस्य चतुष्पात्त्वे प्रकृते कथं शक्तिबीजयोरङ्गमुखत्वकीर्तनमिति । नैष दोषः, उपास्योपासकयोरभेदस्यात्र विवक्षितत्वात् । एवं च सति नृसिंहब्रह्माद्वैतसिद्धिः । सर्वभूतस्थश्च आत्मा एको दृष्ट स्यात्, सर्वभूतानि च आत्मनि । 'यस्तु सर्वाणि भूतानि' इत्यादिश्रुत्यर्थश्च एवमुपसंहृ-

तश्च स्यात् । अन्यथा परिच्छिन्न एव प्रत्यगात्मा सांख्यादिभिरिव दृष्टः स्यात् । इष्यते च सर्वोपनिषदां सर्वात्मैकत्वप्रतिपादकत्वम् । अतो युक्तमेव अस्योपासकस्य आत्मनः उपास्येन आत्मना एकत्वमभिप्रेत्य सप्राङ्गत्ववचनं मुखवचनं च । स्वप्नं स्थानमस्य तैजसस्य स स्वप्नस्थानः । जाग्रत्प्रज्ञा अनेकसाधना बहिर्विषयेव भासमाना मनसः स्पन्दमाना सती तथाभूतसंस्कारं मनस्याधत्ते । तन्मनः तथा संस्कृतं विचित्र इव पटो बाह्यसाधनानपेक्षम् अविद्याकर्मभ्यां प्रेर्यमाणं जाग्रद्वदवभासते । तथा च उक्तम् अस्य लोकस्य सर्वावतो मात्रामपादाय इत्यादि । परे देवे मनस्येकी भवति इति प्रस्तुत्य अत्रैष देवः स्वप्ने महिमानमनुभवति इत्याथर्वणे । इन्द्रियापेक्षया अन्तःस्थत्वान्मनसः तद्वासनारूपान्तर्लब्धा स्वप्ने प्रज्ञा येन इति अन्तःप्रज्ञः । तैजसः विषयशून्यायां प्रज्ञायां केवलप्रकाशरूपायां विषयित्वेन भवतीति तैजसः । विश्वस्य सविषयत्वेन प्रज्ञायाः स्थूलाया भोग्यत्वम् । इह पुनः केवला वासनामात्रा प्रस्फुटप्रज्ञा भोग्येति प्रविविक्तो भोग इत्युकारमिश्रणं शक्तिबीजयोः । समानमन्यत् । द्वितीयः पादस्तैजसस्थिष्वपि स्थानेषु तत्त्वाप्रतिबोधलक्षणः स्वापोऽविशिष्ट इति पूर्वाभ्यां सुषुप्तं विभजते—यत्र सुप्तो

न कंचनेत्यादि । न हि सुषुप्ते पूर्वयोरिव अन्यथाग्रहणलक्षणं स्वप्नदर्शनं कामो वा कश्चन विद्यते । तदेतत्सुषुप्तं स्थानमस्येति सुषुप्तस्थानः स्थानद्वयप्रविभक्तमनस्पन्दितं द्वैतजातम् । तद्यथा रूपापरिज्ञानेन अविवेकापन्नं नैशतमोग्रस्तमिवाहः स्फुटप्रपञ्चम् एकीभूतमुच्यते । अत एव स्वप्नजाग्रन्मनःस्पन्दनानि प्रज्ञानानि घनीभूतानीवेयमवस्था विवेकरूपत्वात्प्रज्ञानघन उच्यते । यथा रात्रौ नैशेन तमसा अविभज्यमानं सर्वं घनमिव तद्वत् प्रज्ञानघन. । एव-शब्दात् जात्यन्तरं नास्तीत्यर्थः । मनसो विषयविषय्याकारस्पन्दनायासदुःखाभावात् आनन्दमयः आनन्दप्रायः न आनन्द एव, अनात्यन्तिकत्वात्– यथा लोके निरायासस्थितौ मुख्यानन्दभुगुच्यते, 'एष परमानन्दः' इति श्रुतेः । स्वप्नादिप्रतिबोधे चेतः प्रति द्वारीभूतत्वात् चेतोमुखः बोधलक्षणं वा चेतो मुखं द्वारमस्य स्वप्नाद्यागमनं प्रति इति चेतोमुखः । भूतभविष्यज्ञातृत्वात् सर्वविषयज्ञातृत्वमस्यैवेति प्राज्ञः । सुप्तो हि भूतपूर्वगत्या प्राज्ञ उच्यते । अथवा प्रज्ञप्तिमात्रमस्यैवासाधारणं रूपमिति प्राज्ञः इतरयोर्विशिष्टमपि ज्ञानमस्ति सोऽयं प्राज्ञः तृतीयः पादः । एष हि स्वरूपावस्थः साधिदैविकस्य भेदजातस्य सर्वस्य ईशिता नैतस्माज्जात्यन्तरभूते अन्ये-

षामिव 'प्राणबन्धनं हि सोम्य मनः' इति श्रुतेः। अत एव हि सर्वेश्वरः। अत एव हि सर्वभेदावस्थाज्ञाता इत्येष सर्वज्ञ एषः अन्तर्यामी अन्तस्तनु प्रविश्य सर्वेषां भूतानां नियन्ता-प्येष एव। अत एव यथोक्तं सभेदं जाग्रत्प्रसूयत इत्येष योनिः। अत एव प्रभवश्चाप्ययश्च प्रभवाप्ययौ हि भूतानाम् एष एव एतावान् उभयत्रापि समानः पाठः। अत ऊर्ध्वं माण्डूक्ये उक्ते एवार्थे श्लोकान्पठित्वा तुरीयः पादः, एतस्मिंस्तापनीये तु तान्विहाय तुरीयः पादः। तस्मिन्नपि कियान्पाठभेदस्तद्व्याख्यानावसरे दर्शित एव तत्रोपयोगी श्लोकः पठ्यते—'दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजस.। आकाशे च हृदि प्राज्ञस्त्रिधा देहे व्यवस्थितः'। जागरितावस्थायामेव विश्वादीनां त्रयाणामनुभवप्रदर्शनार्थं श्लोक'। दक्षिणमक्ष्येव मुखं यस्य स तथोक्तः तस्मिन्सर्वेषु करणेषु अविशेषेऽपि दक्षिणे अक्षिण्युपलब्धिपाटवदर्शनात् तत्र विशेषनिर्देशे विश्वस्य दक्षिणाक्षिगतो रूपं दृष्ट्वा निमीलिताक्षः तदेव स्मरन् मनसि अन्तः स्वप्ने इव वासनारूपमभिव्यक्तं पश्यति यथा अत्र, तथा स्वप्ने; अतः मनस्यन्तस्तु तैजसो विश्व एव आकाशो बाह्यादिस्मरणव्यापारोपरमे प्राज्ञः एकीभूतो घनप्रज्ञ एव भवति, मनोव्यापाराभावात्। दर्शनस्मरणे एव हि

मनःस्पन्दितं तदभावे हृद्येवाविशेषेण प्राणात्मना अवस्थानात्प्राणः, 'प्राणो ह्येवैतान्सर्वान्संवृङ्क्ते' इति श्रुतेः । तैजसः हिरण्यगर्भः, मनस्यवस्थितत्वात् । लिङ्गं मनः, 'यत्र मनोमयोऽयं पुरुषः' इत्यादिश्रुतेः । ननु व्याकृतः प्राणः सुषुप्ते तदात्मकानि कारणानि भवन्ति कथमव्याकृतता । नैष दोषः, अव्याकृतस्य देशकालविशेषाभावात् । यद्यपि प्राणाभिमाने सति व्याकृततैव प्राणस्य, तथापि पिण्डपरिच्छिन्नविशेषाभिमाननिरोधः प्राणे भवतीत्यव्याकृत एव प्राणपरिच्छिन्नाभिमानवतां यथा प्राणलये परिच्छिन्नाभिमानिनां प्राणे अव्याकृतता, तथा प्राणाभिमानिनोऽपि अविशेषापन्नत्वात् अव्याकृतता, समाना । प्रणवबीजात्मकत्वं च तदध्यक्षश्च एको व्याकृतावस्थः परिच्छिन्नाभिमानाध्यक्षाणां च तेनैकत्वमिति पूर्वोक्तं विशेषणम् एकीभूतः प्रज्ञानघनः इत्याद्युपपन्नम् । तस्मिन्नुक्तहेतुत्वात् प्राणशब्दत्वमव्याकृतस्य, 'प्राणबन्धनं हि सोम्य मनः' इति श्रुतेः । एवं तावत्प्रभवाप्ययौ हि भूतानामित्यनेन एकविज्ञानेन सर्वविज्ञानं दर्शितम् । तथा माण्डूक्यश्लोके जागरितावस्थायामेवावस्थात्रयमुक्तं तस्यामेवावस्थायां तत्रैविध्ये मनोव्यापारं व्यावृत्य प्रागुक्तोपास्ये मनोव्यापारं प्रवर्तयितुम् उपास्य-

स्वरूपमाह— न बहि.प्रज्ञमिति । बहिर्विषयव्यापारोपरमात् जागरितावस्थाप्रतिषेधान्मनसो हि स्वस्मिन्व्यापारेणान्तःप्रज्ञत्वे तैजसत्वे च प्रत्यगात्मन. प्राप्ते, तन्निषेधति—नान्तः-प्रज्ञमिति । उभयत्र व्यापारप्रतिषेधेन तदन्तरालव्यापारे प्राप्ते, तं निषेधति—नोभयत.प्रज्ञमिति । जाग्रत्स्वप्नान्तराले मनो व्यावृत्त प्रज्ञार्थं न कुर्यादित्यर्थः । अन्तरालव्यापार-प्रतिषेधेन उभयत्र युगपत्प्रज्ञार्थं व्यापारे प्राप्ते, तं निषेधति— न प्रज्ञमिति । एवं सर्वतो मनोव्यापारप्रतिषेधात् अव्याकृत मनः अविद्यमानम् असदिव तिष्ठेत तत्प्रतिषेधति— नाप्रज्ञमिति । तत्स्थितिप्रतिषेधात् अज्ञानसाक्षिके स्वप्ने प्राप्ते, तं निषेधति—न प्रज्ञानघनमिति । अथ षट्प्रतिषेधैः प्रणवविद्याङ्गभूतैः उपास्यप्रतिकूलं प्रतिषिध्य व्यावृत्य यदुपास्ये मनोऽव्यावृत्तं कार्यं तदुपास्यं वस्तु निर्दिशति— अदृष्टमिति । न हि ईदृशमुपास्यं क्वचिदृष्टं पुरुषाकारमेव वा तिर्यगाकारमेव वा यथा गोपालकूर्मादि । तत्तु उभयरूपं नृसिंहात्मकं त्रिनेत्रं पिनाकहस्तमिति । अत एव अव्यवहार्यम् । अत एव अलक्षणमिति । न लक्षणं लिङ्गं विद्यते यस्य तदलक्षणम् । अत एव अचिन्त्यम् अनुमानेन तर्केण वा । अत एव अव्यपदेश्यं नियताकारोपास्यप्रतिपादकैः

शब्दैः । अत एव एकात्मप्रत्ययसारम् एकस्मिन्सर्वेषामात्मनां प्रत्ययः एकात्मप्रत्ययः स एव सारं यस्य तत् तथोक्तम् । अथवा एक एव आत्मा उपास्योपासकयोः इत्येवं प्रत्ययः । शेषं पूर्ववत् । अत एव प्रपञ्चोपशमं प्रागुक्तेन न्यायेन मनसो हि बाह्यदर्शनस्मरणव्यापाराभावात् व्यावृत्तत्वाच्च स्वापाभावादित्युपास्यव्यतिरेकेण प्रपञ्चाप्रतीतेः प्रपञ्चोपशममिति । शिवं शंकरं चतुर्थं तुरीयपादं मन्यन्ते अर्धमात्रानादात्मकमिति तथोपास्यम् । प्रत्यगात्मतया उपास्यमाह— स उपास्य आत्मा प्रत्यगात्मेत्येवं विज्ञेयो द्रष्टव्यः ॥

एवमियं प्रणवविद्या षट्प्रतिषेधवती सप्तशक्तिकहृदयाङ्गबीजमुखवती अङ्गिना मनोव्यापारं स्थिरं कुर्वती अस्यां विद्यायाम् उपकारकवती असकृदावर्तनीया ओमुपासकेनेति तात्पर्यार्थः । एवं तावत्सामाङ्गप्रणवविद्यां नृसिंहब्रह्मविद्योपकारिणीमभिधाय अथेदानीं तदुपकारिणीमेव शिरोऽङ्गव्याख्यात्रीं सामाङ्गसवितृप्रतिपाद्यां विद्यां नृसिंहब्रह्मविद्याङ्गभूतामाह—

अथ सावित्री गायत्री या यजुषा प्रोक्ता तया सर्वमिदं व्याप्तं घृणिरिति

S. U. VII. 8

द्वे अक्षरे सूर्य इति त्रीण्यादित्य इति त्रीण्येतद्वै सावित्र्यास्याष्टाक्षरं पदं श्रिया-भिषिक्तं य एवं वेद श्रिया हैवाभि-षिच्यते तदेतदृचाभ्युक्तम्— ऋचो . अ-क्षरे परमे व्योमन्यस्मिन्देवा अधि वि-श्वे निषेदुः। यस्तन्न वेद किमृचा करिष्य-ति य इत्तद्विदुस्त इमे समासत इति। न ह वा एतस्यर्चा न यजुषा न साम्ना-र्थोऽस्ति यः सावित्रीं वेदेति। ॐ भूर्ल-क्ष्मीर्भुवर्लक्ष्मीः सुवःकालकर्णी। तन्नो महालक्ष्मीः प्रचोदयादित्येषा वै महा-लक्ष्मीर्यजुर्गायत्री चतुर्विंशदक्षरा भव-ति गायत्री वा इदं सर्वं यदिदं किंच तस्माद्य एतां महालक्ष्मीं याजुषीं वेद महतीं श्रियमश्नुते। ॐ नृसिंहाय वि-द्महे वज्रनखाय धीमहि। तन्नः सिंहः प्रचोदयादित्येषा वै नृसिंहगायत्री वेदा-

नां देवानां निदानं भवति य एवं वेद स निदानवान्भवति ॥ २ ॥

अथ-शब्दः क्रमप्राप्तानन्तर्यार्थः । मन्त्रे सवितृपदाभावेऽपि सावित्रीति वदन् सवितृकालीनप्रकाशवत् सुषुप्तप्रकाशवच्च बाह्याभ्यन्तरतमोनिवारकत्वात् अयं शिरोऽङ्गप्रकाशो निबिडाविद्यानिवर्तक इति दर्शयति । गायत्री, अष्टाक्षरत्वात् तां गायत्रीं यजुषा व्याचष्टे; या यजुषा प्रोक्ता तया सर्वमिदं व्याप्तम् । शिरोऽङ्गं व्याख्यातम् उपास्यं च । अक्षराणि गणयति । घृणिरिति द्वे अक्षरे । सूर्य इति त्रीणि, पृथग्रेफगणनात् । आदित्य इति त्रीणि । एतद्वै सावित्र्यष्टाक्षरं पदं श्रिया अभिषिक्तमिति । श्र्यादिभिस्तदादिन्यायेन सप्तभिः शक्तिभिः विग्रहवतीभिः मणिगणखचितैर्हेमकुम्भैरमृतपूर्णैः शिरः अभिषिक्तमित्यर्थः । य उपासकः एवमुपास्ते तस्य फलं निर्दिशति । श्रिया हैव अभिषिच्यते प्रागुक्ताभिः शक्तिभिः प्रागुक्तेन प्रकारेण सोऽप्यभिषिच्यत इत्यर्थः । तदेतदृचा अभ्युक्तम् उक्तार्थम् । ऋचो निषेदुः नितरां सेवनं कृतवत्यः । ऋग्ग्रहणम् उपलक्षणार्थम् । यद्वा ऋच इति षष्ठी । ऋचः सईमित्यादिकाया नयाः प्रतिपादिताः शक्तयः, वेदा वा; न केवलं शक्तयः, अपि तु विश्वे देवाः

सर्वे देवाः अधि इति उपरि शिरसि अक्षरे न क्षरति न विलीनं भवति परमे व्योमन् व्योमनि सर्वाभिषेकद्वारत्वात् परमं मोक्षद्वारत्वाच्च व्योम यस्मिञ्शिरसि । य उपासक. तच्छिरो वेददेवदेवीभिः प्रागुक्तेन प्रकारेण अभिषिक्तं न वेद न जानाति किमृचा ऋग्वेदादिना करिष्यति। यद्वा सईं पाहि इति अनया ऋचा किं करिष्यति। य इत् इत्थमेव तदभिषिक्तं शिरः विदुः उपासते त इमे उपासकाः समासते सम्यक्प्रकारेण आसते सुखिनः इत्यर्थः । ऋग्गतम् ऋक्पदं व्याचष्टे । न ह वै एतस्य ऋचा न यजुषा न साम्ना अर्थः प्रयोजनम् अस्ति यः सावित्रीं शिरःशिखां साधनभूतां वेदेति । ततश्च अयमर्थः । अष्टाक्षरां सावित्रीं पठित्वा प्रागुक्ताः सर्वे वेददेवादयः अभिषिञ्चतीति सावित्रस्य अष्टाक्षरं पदम् अष्टावक्षराण्यभिषेचनाय यस्मिञ्शिरसि तदष्टाक्षरं शिरः तदेव पदम् आश्रयः इति तत्त्वार्थः । एवं तावन्नृसिंहब्रह्मविद्यां शिरोऽङ्गोपकारिणीं सावित्राभिषेचनीं विद्यामभिधाय अथेदानीं तदुपकारिणीं शिखाङ्गद्वारा सामाङ्गमहालक्ष्मीविद्यामाह— ॐ भूर्लक्ष्मीरिति प्रणवविद्यापुरःसरा एताः शक्तयो भूरित्याद्या व्याहृतयः । भूः, भू सत्तायामिति सत्तायामत्र वर्तते । अत एवोक्तमस्माभिः सप्तव्या-

तृतीय्याचक्षाणैः प्रपञ्चसारे—'भूःपदात्तु व्याहृतयो भूःशब्दः सति वर्तते। तत्पदं सदिति प्रोक्तं सन्मात्रत्वाच्च भूरतः॥ भूतत्वात्कारणत्वाच्च भुवःशब्दस्य संगतिः। सर्वस्य स्वीकरणात्स्वात्मतया स्वरितीरितम्। महत्त्वाच्च महस्त्वाच्च महच्छब्दः समीरितः' ततश्च यथासंख्यं भूर्लक्ष्मीरिति। सन्मात्रब्रह्मणो व्यापिका शक्तिर्भूर्लक्ष्मीरित्युच्यते। कारणमात्ररूपस्य ब्रह्मणः शक्तिर्भुवर्लक्ष्मीरिति। सर्वत्र स्वात्मतया अवस्थितस्य ब्रह्मणः शक्तिः सुवःकालकर्णीत्युच्यते। महाभूतप्रकाशकात्मकस्य भुवर्ब्रह्मणः शक्तिर्महालक्ष्मीरिति। सैकैका शक्तिः तदङ्गं शिखाख्यं तेजोमयं सुषुम्नामृतमयं सोमरूपेणोपास्यत्वात्तस्य पादस्य, 'य ओषधीनां प्रभवति तारापतिः सोमस्तत्सान्नस्तृतीयं पादं जानीयात्' इति श्रुतेः। सोमः चन्द्रः 'सुषुम्नः सूर्यरश्मिश्चन्द्रमा' इति श्रुतेः। नः अस्मान् प्रचोदयादिति चुद प्रेरणे प्रेरयतु। तदङ्गमेकैका विग्रहवती शक्तिः अमृतस्रवणाय प्रेरयतु। अभिषेक्त्रीणां शक्तीनां शिखाधिष्ठात्रीः शक्तीः प्रति अनया ऋचा गायत्र्या यजुर्महालक्ष्म्याः प्रार्थनारूपं वचनम्। ततश्च तदङ्गममृतस्रावि अमृतरूपमुपास्यमिति। अथवा सैकैका शक्तिः तदङ्गं नः प्रचोदयादिति नः प्रेरयतु। असंविवादमेवाङ्गं

कुर्यादिति । एषा वै महालक्ष्मीः यजुर्गायत्री महतीनां महालक्ष्म्यादीनां प्रतिपादकत्वात् महालक्ष्मीः सावित्रमन्त्रे अत्र च यजुरिति वदन् सामाङ्गत्वेऽपि गीतिरहितमङ्गद्वयमिति दर्शयति । प्रणवान्तर्भावाय अक्षराणि गणयति चतुर्विंशदक्षरा भवतीति । चतुर्विंशदिति च्छान्दसम् । गायत्री वा इदं तृतीयमङ्गं सर्वं कृत्स्नं यदिदं किंच । यस्मादेवं तस्मात् य एतां शिखां पारमेश्वरीं महालक्ष्मीं याजुषीं प्रागुक्तविग्रहशक्त्युपास्यां वेद उपास्ते, तस्य फलं निर्दिशति— महतीं श्रियमश्नुत इति; महतीं श्रियं प्राप्नोतीत्यर्थः । एतद्वायव्युक्ताः शक्तयः विग्रहवत्यः अभिषेचनशक्तीनामुपकाराय अमृतमयीं शिखाम् अमृतस्रवणाय तद्बन्धनाय वा उपास्ते इति तत्त्वार्थः । एवं तावन्नृसिंहब्रह्मविद्योपकारिणीं सामाङ्गतृतीयाङ्गविद्यामभिधाय अथेदानीं सामाङ्गचतुर्थाङ्गविद्यां नृसिंहगायत्रीमाह । ॐ प्रणवः व्याख्यातः तदङ्गं कवचाख्यं पारमेश्वरम् । धीमहीति ध्यायेमहि । किमर्थं वज्रनखाय नृसिंहाय । तादर्थ्ये चतुर्थी । तदर्थं विद्महे जानीमः यतः तदेवाङ्गं नः अस्मान् सिंहः प्रचोदयात् इत्युक्तार्थम् । नरशब्दं विहाय सिंह इति वदन् अस्यां विद्यायां सिंहाकारस्य प्राधान्यं दर्श-

यति। इति-शब्दो मन्त्रसमाप्तिं द्योतयति। एषा वै नृसिंहगायत्री नृसिंहार्थकवचप्रतिपादकत्वाद्गायत्री प्रणवान्तर्भावं दर्शयति। कवचाश्रिततदावृतहृदयान्तर्गतानां वेदानां देवानां यथायोग्यतया निदानं मूलकारणं भवति। उपासकस्य फलं निर्दिशति। य एवं वेद स निदानवान्भवतीति। तत-श्चायमर्थः। पारमेश्वरं कवचाख्यमङ्गं हृत्संबन्धि सर्ववेद-निदानत्वेनोपास्यं तत्प्रतिपादकत्वात् ऋक्संबन्धि सर्ववेददे-वनिदानं गायत्री उच्यते इति तत्त्वार्थः॥

एवं तावन्नृसिंहब्रह्मविद्योपकारिण्यङ्गचतुष्टयव्यापिनी म-हाचक्राख्याम् अभिधातुं तस्मिंश्चक्रे द्वात्रिंशत्पत्रे यथासंख्यं कृतप्रणवसंपुटे न्यस्तमूलमन्त्राक्षरे एकैकस्मिन् तत्तद्देवता नृसिंहव्यूहं स्तुतिमन्त्रवर्णसामर्थ्यलभ्यं च प्रदर्शयितुं तान्म-न्त्रान्प्रश्नोत्तररूपाख्यायिकया आरभते।

देवा ह वै प्रजापतिमब्रुवन्नथ कैर्मै-र्नैर्देवः स्तुतः प्रीतो भवति स्वात्मानं द-र्शयति तन्नो ब्रूहि भगव इति स होवाच प्रजापतिः। ॐ उं ॐ यो वै नृसिं-हो देवो भगवान्यश्च ब्रह्मा तस्मै वै

नमो नमः १ ॐ ग्रं ॐ यो वै नृसिंहो देवो भगवान्यश्च विष्णुस्तस्मै वै नमो नमः २ ॐ वीं ॐ यो वै नृसिंहो देवो भगवान्यश्च महेश्वरस्तस्मै वै नमो नमः ३ ॐ रं ॐ यो वै नृसिंहो देवो भगवान्यश्च पुरुषस्तस्मै वै नमो नमः ४ ॐ मं ॐ यो वै नृसिंहो देवो भगवान्यश्चेश्वरस्तस्मै वै नमो नमः ५ ॐ हां ॐ यो वै नृसिंहो देवो भगवान्या सरस्वती तस्मै वै नमो नमः ६ ॐ विं ॐ यो वै नृसिंहो देवो भगवान्या श्रीस्तस्मै वै नमो नमः ७ ॐ ष्णुं ॐ यो वै नृसिंहो देवो भगवान्या गौरी तस्मै वै नमो नमः ८ ॐ ज्वं ॐ यो वै नृसिंहो देवो भगवान्या प्रकृतिस्तस्मै वै नमो नमः ९ ॐ लं ॐ यो वै नृसिंहो देवो भगवान्या विद्या तस्मै वै नमो नमः १० ॐ तं ॐ यो वै नृसिंहो

देवो भगवान्यश्चोंकारस्तस्मै वै नमो नमः ॐ सं ॐ यो वै नृसिंहो देवो भगवान्याश्चतस्रोऽर्धमात्रास्तस्मै वै नमो नमः १२ ॐ वं ॐ यो वै नृसिंहो देवो भगवान्ये च वेदाः साङ्गाः सशाखास्तस्मै वै नमो नमः १३ ॐ तों ॐ यो वै नृसिंहो देवो भगवान्ये पञ्चाग्नयस्तस्मै वै नमो नमः १४ ॐ मुं ॐ यो वै नृसिंहो देवो भगवान्याः ससव्याहृतयस्तस्मै वै नमो नमः १५ ॐ खं ॐ यो वै नृसिंहो देवो भगवान्ये चाष्टौ लोकपालास्तस्मै वै नमो नमः ॐ नृं ॐ यो वै नृसिंहो देवो भगवान्ये चाष्टौ वसवस्तस्मै वै नमो नमः १७ ॐ सिं ॐ यो वै नृसिंहो देवो भगवान्ये च रुद्रास्तस्मै वै नमो नमः १८ ॐ हं ॐ यो वै नृसिंहो देवो भगवान्ये च आदित्यास्तस्मै वै नमो नमः १९ ॐ भीं ॐ यो

वै नृसिंहो देवो भगवान्ये चाष्टौ ग्रहास्तस्मै वै नमो नमः २० ॐ षं ॐ यो वै नृसिंहो देवो भगवान्यानि पञ्च महाभूतानि तस्मै वै नमो नमः २१ ॐ णं ॐ यो वै नृसिंहो देवो भगवान्यश्च कालस्तस्मै वै नमो नमः २२ ॐ भं ॐ यो वै नृसिंहो देवो भगवान्यश्च मनुस्तस्मै वै नमो नमः २३ ॐ द्रं ॐ यो वै नृसिंहो देवो भगवान्यश्च मृत्युस्तस्मै वै नमो नमः २४ ॐ मृं ॐ यो वै नृसिंहो देवो भगवान्यश्च यमस्तस्मै वै नमो नमः २५ ॐ त्युं ॐ यो वै नृसिंहो देवो भगवान्यश्चान्तकस्तस्मै वै नमो नमः २६ ॐ मृं ॐ यो वै नृसिंहो देवो भगवान्यश्च प्राणस्तस्मै वै नमो नमः २७ ॐ त्युं ॐ यो वै नृसिंहो देवो भगवान्यश्च सूर्यस्तस्मै वै नमो नमः २८ ॐ नं ॐ यो वै नृसिंहो देवो भगवान्यश्च

सोमस्तस्मै वै नमो नमः २९ ॐ मां ॐ
यो वै नृसिंहो देवो भगवान्यश्च विराट्-
पुरुषस्तस्मै वै नमो नमः ३० ॐ म्यं ॐ
यो वै नृसिंहो देवो भगवान्यश्च जीव-
स्तस्मै वै नमो नमः ३१ ॐ हं ॐ यो वै
नृसिंहो देवो भगवान्यश्च सर्वं तस्मै वै
नमो नमः ३२ इति तान्प्रजापतिरब्रवी-
देतैर्द्वात्रिंशन्मन्त्रैर्नित्यं देवं स्तुवते ततो
देवः प्रीतो भवति स्वात्मानं दर्शयति
तस्माद्य एतैर्मन्त्रैर्नित्यं देवं स्तौति स देवं
पश्यति स सर्वं पश्यति सोऽमृतत्वं
च गच्छति य एवं वेदेति महोपनिषत् ॥

इति चतुर्थोपनिषत् ॥

देवा ह वै प्रजापतिमब्रुवन्नित्यादि स होवाच प्रजापतिरित्य-
न्तं स्पष्टार्थम् । अत्र हि सर्वे मन्त्राः प्रणवादिकाः तदादिन्या-
येन प्रणवं मूलमन्त्राक्षरं पुनः प्रणवं सर्वेषु मन्त्रेषु दर्शयति ।
अत्र हि मन्त्रेषु यच्छब्दद्वयेन अन्यतः सिद्धमनूद्य कुत्रचिच्छ-

व्दसामर्थ्यात् कुत्रचित् तस्मै इत्येकवचनसामर्थ्यात् एक एव व्यूहः प्रतीयते । स च द्विविधः क्वचिदसाधारणायुधैः तत्तद्देवतागम्यः प्रतीयते क्वचिच्च विश्वरूपः तेनैव न्यायेन उभयत्रापि नृसिंहाकारः योगारूढः अधस्तनहस्ताभ्यां वरदाभयहस्तः उपरितनाभ्यां तत्तद्देवतायुधधारी क्वचिच्छङ्खचक्रगदाधारी च इत्येतत्सर्वं स्पष्टं करिष्यामः । यथा अत्रैव नृसिंहाकारव्यूहा ब्रह्मविष्णुमहेश्वरात्मकाः स्रुक्स्रुवशङ्खचक्रपिनाकत्रिशूलैरायुधैर्गम्यन्ते नृसिंहात्मकः पुरुषव्यूहः द्विभुजः दश हस्त्या अङ्गुलयः दश पाद्याः यावानेव पुरुषः, इति श्रुतेः । अत ऊर्ध्वं सर्वे नृसिंहव्यूहाश्चतुर्भुजाः नृसिंहात्मकाश्च ईश्वरव्यूहः ईश्वरायुधगम्यः पूर्वेषां पञ्चानां यथासंख्यं पञ्चशक्तिव्यूहः सरस्वतीश्रीगौरीप्रकृतिविद्यात्मिकाः स्त्रियः स्वायुधैर्गम्याः एवं मूलमन्त्राक्षरेषु दशसु ऐशानीं दिशमारभ्य प्रणवसंपुटितेषु सर्वाभरणयुक्ताः श्वेतरूपा उपास्याः । एवं वक्ष्यमाणाः सर्वे व्यूहाः यथासंख्यं मूलमन्त्राक्षरेषु उपास्याः । प्रणवव्यूहः एकेन प्रणवाक्षरेण वक्षसि चिह्नतः प्रणवचतुष्टयमात्रः वासुदेवविग्रहः सशाखवेदविग्रहः पञ्चाग्निविग्रहः सप्तव्याहृतिविग्रहः अष्टलोकपालविग्रहः वसुरुद्रादित्याष्टग्रहपञ्चंमहाभूतविग्रहाः एकैकस्मिन्नृसिंहव्यूहे यथासंख्य-

मन्तर्भूताः उपास्याः इति दश व्यूहाः विश्वरूपाः उपास्याः । कालमनुमृत्युयमान्तकप्राणसूर्यसोमविराट्पुरुषजीवरूपचेतनाचेतनसर्वात्मका इत्येते व्यूहाः अविश्वरूपाः तत्तदसाधारणरूपगम्याः एवमेकैकव्यूहः उपास्यः तेन तेन मन्त्रेण स्तुत्यः ततो देवः स्वात्मानं स्वकीयं रूपं विश्वरूपम् अविश्वरूपं च यथायोग्यं दर्शयति । यस्मादेवं तस्मात् य उपासकः एतैर्मन्त्रैः नित्यं नियमेन स्तौति, स देवं विश्वरूपमविश्वरूपं च पश्यति साक्षात्करोति । सोऽमृतत्वमित्यादि महोपनिषदित्यन्तं स्पष्टार्थम् । तत्र अमृतत्वं च गच्छतीति फलस्य द्विरभ्यासः स्तुतिमात्रादेव परमफलावाप्तिं मन्त्राणां न्न सामर्थ्यं दर्शयति । महोपनिषच्छब्दः प्रणवबाहुल्यमिति सर्वं निर्मलम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
नृसिंहपूर्वतापनीयोपनिषद्भाष्ये
चतुर्थोपनिषद्भाष्यं संपूर्णम् ॥




नृसिंहपूर्वतापनीयो-
पनिषद्भाष्यम्
पञ्चमोपनिषत्

पञ्चमोपनिषत् ॥



वं तावच्चतुर्थोपनिषदि अन्ते स्तुत्युपनिषदा महाचक्रस्थद्वात्रिंशत्पत्रेषु यथासंख्यं द्वात्रिंशन्नृसिंहस्तुत्योपास्यानभिधाय, अथेदानीं महाचक्रविद्यामभिधातुं महाचक्रस्वरूप निरूपयितुं प्रश्नोत्तररूपाख्यायिकया पञ्चमोपनिषदारभ्यते—देवा ह वै प्रजापतिमब्रुवन्निति । नन्वेवं तर्हि स्तुत्युपनिषद्विद्यातो महाचक्रविद्यया प्राग्भावितव्यम् । अत्रोच्यते । सत्यम् । यदीयं प्राक्स्यात् पुरश्चरणार्थं पञ्चमाङ्गन्यासार्थं च कृत्स्नैव प्रतीयेत; न तु द्वात्रिंशद्व्यूहोपासनामात्रं पुरश्चरणार्थम् इतरत् सुदर्शनादिमहाचक्रं सद्वात्रिंशद्व्यूहकं पञ्चमाङ्गम् इत्येवं विभागः प्रतीयेत । अतस्तद्विभागज्ञापनार्थं न प्रागभिहितेयमिति । नन्वेवमपि तदादिन्यायेन महाचक्रविद्या पुरश्चरणार्थं कृत्स्नैव कस्मान्न गृह्येत । तन्न, तत्र तदादिन्यायवैषम्यात् । न हि महाचक्रस्यायमादिर्द्वात्रिंशद्व्यूहो

नामा; अपि तु महाचक्रनाभिवर्तिक्षीरोदार्णवसंबन्धिनृसिंह-व्यूहः। तस्मात्सूक्तमुपनिषद्विद्यातः प्रागभिधानमस्या इति ॥

देवा ह वै प्रजापतिमब्रुवन्महाचक्रं नाम चक्रं नो ब्रूहि भगव इति सार्वकामिकं मोक्षद्वारं यद्योगिन उपदिशन्ति स होवाच प्रजापतिः षडरं वा एतत्सुदर्शनं महाचक्रं तस्मात्षडरं भवति षट्पत्रं चक्रं भवति षड्वा ऋतव ऋतुभिः संमितं भवति मध्ये नाभिर्भवति नाभ्यां वा एतेऽराः प्रतिष्ठिताः। मायया वा एतत्सर्वं वेष्टितं भवति नात्मानं माया स्पृशति तस्मान्मायया बहिर्वेष्टितं भवति। अथाष्टारमष्टपत्रं चक्रं भवत्यष्टाक्षरा वै गायत्री गायत्र्या संमितं भवति बहिर्मायया वेष्टितं भवति क्षेत्रं क्षेत्रं वा मायैषा संपद्यते। अथ द्वादशारं द्वादशपत्रं चक्रं भवति द्वादशाक्षरा वै ज-

**गती जगत्या संमितं भवति बहिर्मा-
यया वेष्टितं भवति । अथ षोडशारं षो-
डशपत्रं चक्रं भवति षोडशकलो वै
पुरुषः पुरुष एवेदं सर्वं पुरुषेण संमितं
भवति मायया बहिर्वेष्टितं भवति । अथ
द्वात्रिंशदरं द्वात्रिंशत्पत्रं चक्रं भवति
द्वात्रिंशदक्षरा वा अनुष्टुबनुष्टुभा संमितं
भवति बहिर्मायया वेष्टितं भवत्यरैर्वा
एतत्सुबद्धं भवति वेदा वा एतेऽराः पत्रै-
र्वा एतत्सर्वतः परिक्रामति च्छन्दांसि
वै पत्राणि ॥ १ ॥**

देवाः प्राक्स्तुतिश्रवणेनात्यन्तहर्षिताः प्रजापतिमब्रुवन— महाचक्रं नाम एतन्नामधेययुक्तं चक्रम्, यद्वा एतन्नामधेययुक्तमेव चक्रं वर्तुलमुत्तराधरभावेन स्थितं सच्चतुष्टयाङ्गव्यापकमस्माख्यमङ्गं नः अस्मभ्यं ब्रूहि भगवः भगवन्निति संबोधनम्। सार्वकामिकं सर्वकामसाधनत्वात् सार्वकामिकम्, अथवा सर्वेषां देवानां ब्रह्मादीनां व्यूहाः स्वात्मतयैव स्वभावतयैव कामिता यस्मिंश्चक्रे नाभिवर्त्याद्यव्यूहेन तत्सार्वकामिकम्। अत एव

मोक्षद्वारं प्रणवबहुलत्वान्मूलमन्त्राक्षरसंख्यातः प्रणवसंपुटीकरणात्प्रणवाक्षरसंख्या द्विगुणा चतुःषष्टिः । अस्यां च विद्याया मोक्षः प्रणवद्वारक एव, 'देहान्ते देवः परं ब्रह्म तारकं व्याचष्टे' इति श्रुतेः । ततश्चायमर्थः—मोक्षस्य प्रणवाख्यं द्वारं यस्मिंस्तत्तथोक्तम् । यच्चक्रं योगिनः उपदिशन्त्युपासकेभ्यः । स होवाच प्रजापतिरित्युक्तार्थम् । षडरं वा एतत्सुदर्शनं महाचक्रं महाचक्रस्यैव नामान्तरं सुदर्शनमन्त्रयोगात् सुदर्शनम् । यद्वा सुष्ठु दर्शनं विद्यते यस्मिंस्तथोक्तम् । एतत्पत्राधोभागे नालरूपः अरशब्दवाच्यः । षडरा विद्यन्ते यस्मिंस्तत् षडरम्, यस्मादेवं तस्मात् षडरं भवति । षट्पत्रं चक्रं भवति अरादुपरिभागः कोणत्रययुक्तः पत्राकृतिः पत्रम्, षट्पत्राणि विद्यन्ते यस्मिंस्तत्तथोक्तम् । एतदेव स्तौति—षड्वा ऋतवः ऋतुभिः संमितं भवति । एतस्मादर्थवादात् अराः पत्राणि च ऋतुबुद्ध्योपास्यानि भवन्ति । अराणां प्रतिष्ठार्थं स्थानमाह— मध्ये चक्रस्य मध्ये नाभिः वर्तुलाकारा भवति । नाभ्यां वै एते अराः प्रतिष्ठिताः प्रागुक्ताः, तदादिन्यायेन पत्राणि च प्रागुक्तानि । मायया प्रागुक्तेन मूलमन्त्रशक्त्यक्षरेण एतत्षडरं षट्पत्रं सर्वं वेष्टितं भवति । यस्मात् न आत्मानं चक्रस्य स्वरूपम् अरपत्रात्मकं

माया स्पृशति तस्मान्मायया वहिर्वेष्टितं भवति; यद्वा प्रत्यक्चैतन्यमेव केवलं शुद्धं चक्रबुद्ध्योपास्यं यस्मात् तस्मादात्मानं प्रत्यक्चैतन्यं न माया स्पृशति मायाविनमिव । तस्मान्मायया बहिर्वेष्टितं भवति । अष्टारम् अष्टपत्रं चक्रं द्वादशारं द्वादशपत्रं चक्रं षोडशारं षोडशपत्रं चक्रं द्वात्रिंशदरं द्वात्रिंशत्पत्रं चक्रमिति चतुष्टयं षडरषट्पत्रचक्रेण व्याख्यातम् । तत्रायं विशेषः— आद्यपत्रे अराः पत्राणि च ऋतुबुद्ध्योपास्यानि । द्वितीयतृतीयपञ्चमेषु अराः वेदबुद्ध्या उपास्याः पत्राणि गायत्रीजगत्यनुष्टुब्बुद्ध्या यथासंख्यमुपास्यानि । वेदा एव अराः छन्दांसि वै पत्राणी—इत्यर्थवादात् । चतुर्थे पत्रे षोडशाराः षोडशपत्राणि च षोडशकलाबुद्ध्या उपास्यानि । क्षेत्रं क्षेत्रं वा मायैषा संपद्यते । पुरुष एवेदं सर्वं पुरुषेण संमितं भवतीति प्रत्यक्चैतन्यं शुद्धमाह मायया असंस्पृष्टम्, बहिःशब्दात् । तादृशं चक्रं तस्मिन्प्रकल्प्य तदुपास्यमित्यर्थः । तथा च अरपत्रशब्दात् बहिःशब्दाच्च सबिन्दुकेन शक्त्यक्षरेण यद्वेष्टनं तत् यथासंख्यं पूर्वपूर्वचक्रापरपत्रासंस्पृष्टम् उत्तरोत्तरचक्राणामाश्रयत्वेन नाभिरूपमित्येवं सुदर्शनचक्रपत्रासंस्पृष्टं यद्वेष्टनं मायया तदुपरितनाक्षरनारायणचक्राश्रयत्वेन नाभिरूपम् एवमष्टाक्षरवेष्टनं द्वादशाक्षरस्य ना-

भिरूपं द्वादशाक्षरवेष्टनं सबिन्दुकमातृकाषोडशाक्षरस्य नाभिरूपं सबिन्दुकाद्यमातृकाषोडशाक्षरवेष्टनं द्वात्रिंशदक्षरस्य नाभिः ततो द्वात्रिंशदक्षरवेष्टनम् असंस्पृष्टमनाभिरूपमेव इत्येवं सुदर्शननारायणवासुदेवषोडशारद्वात्रिंशदरचक्राणां यथासंख्यं पञ्च नाभयः नाभीनामेवापेक्षया वेष्टनरूपतेत्याद्यः नाभिः मायाक्षररहितः उपरितनाः नाभयः अन्त्यं च वेष्टनं मायाक्षरेणेति तत्त्वार्थं । नन्वेवं तर्हि अथशब्दस्य तत्र तत्र प्रयोगात्पूर्वचक्रसंस्पर्शात्पञ्चनाभिकानि पञ्च चक्राणि पृथक्प्रयोज्यानि कस्मान्न परिगृह्यन्ते । तथा च एकचक्रत्वेऽप्यमायिनो भूतनाभिकल्पनायां वेष्टनव्यतिरिक्तपञ्चनाभिकल्पना कस्मान्न भवति? अत्रोच्यते— 'महाचक्रं नाम चक्रं नो ब्रूहि' इत्युपक्रम्य 'तद्वा एतन्महाचक्रम्' इत्युपसंहारात् महाचक्रैकतावगमाच्च चक्रचतुष्टयं तदन्तर्गतमेवेत्यवगम्यते । तत्र तत्र अथशब्दप्रयोगस्तु तत्तच्चक्रोद्धारे माङ्गलिकत्वप्रदर्शनार्थः । तथा वेष्टनानां नाभिकल्पनायां प्रतिषेधाभावात् योग्यत्वाच्च कल्पनालाघवाच्च न पृथगुभे कल्पने इति । यत्र क्वचिद्बहिःशब्दपूर्वको मायाशब्दः पठ्यते क्वचिद्विपरीतः तत्रायमभिप्रायः— यत्र मायाशब्दाद्बहि शब्दः पूर्वं तत्र मायाविशेषणं बहिर्भूतया मायया

बहिर्मायया । यत्र च मायाशब्दात्परः वेष्टनशब्दात्पूर्वः बहिःशब्द. तत्राविशिष्टया मायया तत्र बहिःशब्दो न मायाविशेषणम , किंतु वेष्टनविशेषणम । माया हि द्विविधा नारसिंहमूलमन्त्रगता सबिन्दुकेकाररूपा निरुपपदान्मायाशब्दात्प्रतीयते ; अन्या तु रेफहकाराभ्यां मिलितसबिन्दुकेकाररूपा सोपपदान्मायाशब्दात्प्रतीयते । ततश्च मूलमन्त्राद्बहिर्भूतमायया ह्रीमित्येवंरूपया वेष्टितं भवतीति तत्त्वार्थः । ततः सुदर्शनचक्रे मूलमन्त्रगतमायया वेष्टनं षोडशचक्रेऽप्येवमेव बहि.शब्दस्य वेष्टनात्पूर्वमुपादानात् वेष्टनविशेषणं बहिःशब्दो मध्यवेष्टनव्यावृत्त्यर्थ. । नारायणवासुदेवनारसिंहचक्रेषु व्याख्यातबहिर्मायया वेष्टनमिति वेष्टनचक्रोद्धारविवेकः ॥

एवं महाचक्रस्य संवेष्टनमुद्धारं च अभिधाय अथेदानीमुद्धृतचक्रे यथाविहितमन्त्रान् न्यसितुं तन्नाभ्याम् अक्षरन्यासमाह—

तदेव चक्रं सुदर्शनं महाचक्रं तस्य मध्ये नाभ्यां तारकं भवति यदक्षरं नारसिंहमेकाक्षरं तद्भवति षट्सु पत्रेषु षडक्षरं सुदर्शनं भवत्यष्टसु पत्रेष्वष्टाक्षरं नारा-

यणं भवति द्वादशसु पत्रेषु द्वादशाक्षरं वासुदेवं भवति षोडशसु पत्रेषु मातृकाद्याः सबिन्दुकाः षोडश कला भवन्ति द्वात्रिंशत्सु पत्रेषु द्वात्रिंशदक्षरं मन्त्रराजं नारसिंहमानुष्टुभं भवति तद्वा एतत्सुदर्शनं महाचक्रं सार्वकामिकं मोक्षद्वारमृङ्मयं यजुर्मयं साममयं ब्रह्ममयममृतमयं भवति तस्य पुरस्ताद्वसव आसते रुद्रा दक्षिणत आदित्याः पश्चाद्विश्वे देवा उत्तरतो ब्रह्मविष्णुमहेश्वरा नाभ्यां सूर्याचन्द्रमसौ पार्श्वयोस्तदेतदृचाभ्युक्तम्—ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः। यस्तं न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासत इति। तदेतन्महाचक्रं बालो वा युवा वा वेद स महान्भवति स गुरुर्भवति स सर्वेषां मन्त्राणामुपदेष्टा भवत्यनुष्टुभा

होमं कुर्यादनुष्टुभार्चनं तदेतद्रक्षोघ्नं मृत्यु-तारकं गुरुतो लब्धं कण्ठे बाहौ शिखायां वा बध्नीत ससद्वीपवती भूमिर्दक्षिणार्थं नावकल्पते तस्माच्छ्रद्धया यां कांचिद्-द्यात्सा दक्षिणा भवति ॥ २ ॥

तच्छब्देन द्वात्रिंशदरं द्वात्रिंशत्पत्रं चक्रम् एवशब्देन तदे-वावधृत्य तदेव चक्रं तदादिन्यायेन सुदर्शनादिशब्दैरूर्ध्वं चक्र-चतुष्टयमपि महाचक्रात्मकमिति दर्शयति। महाचक्रमिति सा-मानाधिकरण्याच्च । तस्य मध्ये महाचक्रस्य मध्ये मध्यवर्ति-नाभ्यां वेष्टनरूपा हि नाभयो भूमध्याः ताः व्यावर्तयितुं मध्ये नाभ्यामित्युक्तम् । तारकं भवति संसारतारकत्वात् तारकं प्रण-वाक्षरं भवति। यदक्षरं नारसिंहमेकांक्षर तद्भवतीति अक्षरम् , जगद्धितं वा एतद्रूपमक्षरमिति नृसिंहपदव्याख्यानावसरे व्या-ख्यातं तदक्षरशब्दात्प्रत्यभिज्ञायते । तथा नारसिंहमिति तद्धितात्सामप्रभृत्युपास्यं सर्वं प्रतीयते । ततः सर्वस्मिन्नुपास्ये प्रतीते एकमेवोपास्यं मूलनृसिंहव्यूहाख्यं वक्तुं विशिनष्टि— एकाक्षरं तद्भवतीति । यदक्षरं नारसिंहमुपास्यम् इत्यनूद्य तदेकं भवतीत्यक्षरं च इति महाचक्रमध्यनाभिवर्तित्वेन क्षीरो-

दार्णवसंबन्धितया उपासनं विधीयत इत्यर्थ. । तत्र केचित् नारसिंहमेकाक्षरम् इति विशेषणोपादानात् एकाक्षरनृसिंह-मिश्रितप्रणवो नाभ्यां न्यसनीय इत्याचक्षते; तदपि सांप्रदायिकत्वान्न विरुद्धम् । तस्मिन्नपि पक्षे नारसिंहमिति तद्धितात् एकाक्षरो नृसिंहमन्त्रः प्रणवमिश्रितो द्वात्रिंशन्नृसिंह-व्यूहं विहाय यावत्प्राकरणिकं मूलनृसिंहव्यूहगतमुपास्यं प्रतीयत एव । ततश्च एतद्विद्याङ्गमेकाक्षरो नृसिंहमन्त्रो यथोक्तोपास्याभिधायकत्वात् तस्य केवलः प्रणवेन विकल्पः एकाक्षरनृसिंहमन्त्रस्य प्रणवस्तु नियत एवेति तत्त्वार्थः । अत ऊर्ध्वं तत्तन्मन्त्रन्यासे तत्तच्चक्रेषु पत्रग्रहणम् अरतदन्तरालपत्रान्तरालव्यावृत्त्यर्थं द्रष्टव्यम् । षट्सु पत्रेषु सुदर्शनं भवति । ऐशानपत्रमारभ्य षडक्षरः सुदर्शनो मन्त्रो न्यसनीय इत्यर्थः । एवमुत्तरेषु पत्रेषु योज्यम् । अष्टसु पत्रेष्वष्टाक्षरं नारायणं भवति । प्रणवान्तर्भावेनाष्टाक्षरतेति केचित् । तद्वदेव द्वादशपत्रेषु द्वादशाक्षरं वासुदेवं भवतीति । अत्रापि द्वादशाक्षरता पूर्ववत् । षोडशपत्रेषु मातृकामन्त्रवर्णस्य आद्या वर्णमातृकाद्याः साबिन्दुका बिन्दुसहिताः षोडश स्वरा भवन्ति । द्वात्रिंशत्सु पत्रेषु द्वात्रिंशदक्षरं सामाभिव्यक्तं मन्त्रराजमानुष्टुभं भवति । मूलमन्त्रस्यैव एकैकमक्षरम् ।

यत्तु एकैकमक्षरम् एकैकस्मिन्पत्रे तत्प्रणवसंपुटितं कार्यम्, 'प्रत्यक्षरमुभयत ओंकारो भवति' इति श्रुतेः । तदस्त्राख्यमङ्गं महाचक्रमुपासितं तन्निक्षिप्तमनिष्टे वस्तुनि त्रासकारित्वात् तदस्त्रं पञ्चममङ्गम् । अत एव अस्त्राङ्गमन्त्रं व्याचक्षाणैरस्माभिरुक्तं प्रपञ्चसारे—'असुत्रासादिकौ धातू स्तः क्षेपचलनार्थकौ । ताभ्यामनिष्टमाक्षिप्य क्षिप्यते फट्खडग्निना' इति । सार्वकामिकं मोक्षद्वारमित्युक्तार्थम् । ऋङ्मयं यजुर्मयं साममयं ब्रह्ममयममृतमयं भवतीति पञ्च मयट्प्रत्ययाः प्राचुर्यार्था ग्राह्या. । ऋग्यजुःसामाथर्वप्रचुरम् । ब्रह्ममयमिति ब्रह्मशब्देन अथर्ववेदः सोऽयं ब्रह्म वेद इत्येतद्ब्राह्मणाभिधानात् । वेदप्रचुरता अराणां वेदबुद्ध्योपास्यत्वात् । विकारार्थो वा मयट् वेदविकारात्मका इत्यर्थ । अमृतमयं क्षीरप्रचुरनाभिकं क्षीरविकारनाभिकं वा इति । तस्येति तच्छब्दान्नाभिस्थो विष्णुः मूलनृसिंहव्यूहः परामृश्यते । तत्परिचारकान्देवानाह—पुरस्ताद्वसवः परिचारका आसते रुद्रा दक्षिणत आदित्याः पश्चाद्विश्वे देवा उत्तरतो ब्रह्मविष्णुमहेश्वरा नाभ्यामिति । एवं दिङ्नाभिपरिचारकानुक्त्वा अथेदानीं पार्श्वपरिचारकानाह—सूर्याचन्द्रमसौ पार्श्वयोः कुक्षिप्रदेशयोरिति यावत् । तदेतन्महाचक्रम् ऋचा अभ्युक्तम् ।

यस्मिन महाचक्रे, अक्षरे, अशू व्याप्तावित्यस्य रूपं सरो मत्वर्थे, तस्मिन्व्याप्तिमति । परमे उत्कृष्टे व्योमवत्सर्वव्यापकत्वेन स्थिते । अधीत्युपरिभावे । ऋच इति ऋग्ग्रहणम् उपलक्षणार्थम् । ऋचः वेदाः निषेदुः यस्मिन् चक्रे विश्वे सर्वे देवाः नृसिंहरूपेण निषेदुः स्थिताः । यद्वा ऋच इति षष्ठी । अनुष्टुप्संबन्धिनि अक्षरे व्याप्तिमति चक्रे सर्वे वेदाः स्थिताः तत्सुदर्शनमन्त्रादिसंबन्धि चक्रमित्यर्थः । य उपासक· तन्महाचक्रं न वेद नोपास्ते किम् ऋचा ऋग्वेदादिना यदि वा ऋचा अनुष्टुप्छन्दस्कया ऋचा इति । अनेनैतदर्शयति— महाचक्रोपासनगर्भितमेव अनुष्टुबुपासनं कुर्यात् न तु तद्रहितमिति । य इत्तद्विदुस्त इमे समासत इत्युक्तार्थम् । इति-शब्दः ऋक्समाप्तिं द्योतयति । तदेतन्महाचक्रं बालो वा युवा वा वेद उपास्ते तस्य इदं फलम्— स महान्भवति । महतीं प्रतिष्ठां जने प्राप्नोति । यदि वा महान महाविष्णुरिति । स गुरुः सर्वैः देववदाराध्यः । स सर्वेषां मन्त्राणामुपदेष्टा भवत्युपदेशकः । सामाभिव्यक्तानुष्टुभा होमं कुर्यादिति विद्याङ्गोऽयं होमः तस्मिन्द्रव्यानुपादानात् प्रतिदिनं हविष्यमन्नं साज्यं जुहुयादिति । तथा सख्यानुपादानात्सकृद्वादशवारं वा । यदि वा सूत्रागतदशप-

दानां मूलनृसिंहव्यूहे द्वात्रिंशद्व्यूहे च व्याख्यातत्वात् उभयोद्देशेन होमं कुर्यात् । ततश्च क्षीरोदार्णवशायिने नृसिंहाय त्रिनेत्राय पिनाकहस्तायोग्रायेदम् इति हुत्वा ब्रह्मादिद्वात्रिंशद्व्यूहात्मकाय नृसिंहायोग्रायेति जुहुयात् इत्येवं प्रतिपदं मूलमन्त्रावृत्ति. । यद्वा अनुष्टुभा इत्येकवचनात् सकृन्मूलमन्त्रमुच्चार्य स्वाहाकारान्तं जुहुयात् प्रतिपदम् उद्दिश्य त्याग: कार्य: । तथा सामाभिव्यक्तानुष्टुभा अर्चनं षोडशोपचारादि कुर्यादित्यनुषङ्ग: । अत्रापि होममन्त्रवन्मन्त्रावृत्त्यनावृत्ती एष्टव्ये । तदेतन्महाचक्रं रक्षोघ्नं मृत्युतारकं गुरुप्रसादाल्लब्धं कण्ठे बाहौ शिखायां वा बध्नीत य. तस्मै गुरवे यस्मात्सप्तद्वीपवती द्विगुणावृत्तापि भूमि: पृथिवी दक्षिणार्थं नावकल्पते, तस्माच्छ्रद्धया भक्त्या या कांचिद्भूमिं यथाशक्त्यनुरूपां दद्यात् सा दक्षिणा भवति । एवं प्रागुक्तं श्रुतित उपासनमवगतं पञ्चाङ्गन्यास उपसंहृतमेकस्मान्मतात् । अथ मतान्तरपर्यालोचनया महाचक्र एवोपसंहृतं तस्मात्प्रत्यक्षरमुभयत ओंकारो भवतीत्यत्र मूलमन्त्राक्षराणां प्रणव उपसंहृतत्वात् प्रणवप्रधानमेवेदं महाचक्रं तस्मिञ्शक्तिबाहुल्यश्रवणान्मायया बहिर्वेष्टितं भवति । बहिर्मायया वेष्टितं भवतीत्यसकृच्छ्रवणात् उद्धृतपदव्याख्यानावसरे प्रतिपदं

यस्मात्स्वमहिम्ना सर्वाँल्लोकान्सर्वान्देवान्सर्वानात्मनः सर्वाणि भूतानीत्यसकृन्महिमशब्दवाच्यायाः मायायाः सर्वलोकसर्वदेवात्मभूतानां साधनत्वेन श्रवणात् तद्वेष्टितमायाधारत्वेन यथासंख्यं पृथिव्यादिलोकर्ग्वेदादिवेदाग्न्यादिदेवभूतानामात्मनां च साधनत्वश्रवणान्महाचक्रान्तर्गतवेष्टितमायाधारमेवेदमुपासनम् । न तु मूलनृसिंहगतं पञ्चाङ्गन्यासार्थं च अन्तरङ्गत्वान्महाचक्रमेवेदमुपासनम् । तदपि संप्रदायागतमुपादेयमित्युपासनाविकल्पः । तत्रापि बहुतरं संप्रदायानुकूल्यागतत्वात् अन्त्यमेवोपासनमुपादेयमिति केचित् । तस्मिन्मते प्रणवसावित्रयजुर्लक्ष्मीनृसिंहगायत्रीति मन्त्रचतुष्टयमङ्गं सामाभिव्यक्तं यथायोग्यतया महाचक्रप्रकाशकत्वेन योज्यं तथैवोपास्यं महाचक्रमिति रहस्यं तत्त्वं च इति ॥

एवं नृसिंहब्रह्मविद्यां सकलमतानुसारिणीं कृत्स्नामभिधाय, अथेदानीं तदनुष्ठातुः कैमुत्यन्यायेन फलकथनाय प्रश्नोत्तररूपाख्यायिकामवतारयति—

देवा ह वै प्रजापतिमब्रुवन्नानुष्टुभस्य मन्त्रराजस्य फलं नो ब्रूहि भगव इति स होवाच प्रजापतिर्य एतं मन्त्रराजं

**नारसिंहमानुष्टुभं नित्यमधीते सोऽग्नि-
पूतो भवति स वायुपूतो भवति स
आदित्यपूतो भवति स सोमपूतो भवति
स सत्यपूतो भवति स ब्रह्मपूतो भवति
स विष्णुपूतो भवति स रुद्रपूतो भवति
स वेदपूतो भवति स सर्वपूतो भवति
स सर्वपूतो भवति ॥ १ ॥**

इति प्रथमोऽध्यायः ॥

अत्र देवा ह वै इत्यारभ्य तदेतन्निष्कामस्य भवति इत्यन्तम् अष्टावध्यायाः; प्रत्यध्यायसमाप्तौ च द्विरभ्यासः । देवा ह वै प्रजापतिमब्रुवन्— अस्य मन्त्रस्य प्रागुक्तोपासनाविशिष्टस्य फलं नो ब्रूहि भगव इति । स होवाच प्रजापतिरित्युक्तार्थम् । यो द्विविधोपासक एतम् इत्येतच्छब्दपरामृष्टं प्रागुक्तविद्यागर्भितं मन्त्रराजं सामराजं नारसिंहं नृसिंहाकारब्रह्मोपासनागर्भम् आनुष्टुभम् अनुष्टुप्छन्दस्कं नित्यमिति साकारब्रह्मप्रतिपत्तिद्वारेण नित्यभूतनिराकारब्रह्मप्रतिपादकत्वात् नित्यम् अधीते उच्चारयति । यत्र ईदृशसामोच्चारणमात्रादेव वक्ष्यमाणफलाप्तिः, किं तत्र विद्या-

नुष्ठानात् इत्यभिप्रायेण तत्र तत्र अधीते अधीते इत्यवोचत्। अथवा नित्यमधीते इति नियमेनाधीते। अथवा नित्यम् अधि इत्युपरिभावे इते जानीते। सर्वे गत्यर्था ज्ञानार्थाः। नित्यं संध्योपासनादि निर्वर्त्योक्तकालं यो विद्यामेतामनुतिष्ठतीत्यर्थः। अथवा नित्यमानुष्टुभम् इत्यन्वयात् आनुष्टुभस्य साम्नो नित्यत्वं दर्शयति नेतरस्य सामरूपम्येति। अथवा नित्यं संध्योपासनादि कर्माधिकृत्य इते जानीते। एतदुक्तं भवति। ततो नित्यसंध्योपासनाग्निहोत्राद्युपास्यदेवता नारसिंहलीलाविग्रहेत्युपास्ते। एतद्विद्यागर्भितेत्यर्थः। अथवा यः उपासकः प्रागुक्तविद्यानुष्ठानप्रकारज्ञाने असमर्थः स केवलं विद्याप्रतिपादकं ग्रन्थं नित्यं प्रतिदिनं स्वाध्यायधर्मेण अधीते पठति जपति, सोऽपि वक्ष्यमाणं फलं प्राप्नोति। तस्य तज्जपसामर्थ्यात्परमेश्वर·· कारुण्यात् तद्विद्यानुष्ठानप्रकारं साकारप्रभृति निराकारपर्यन्तमिहैव कथयति। तथा च अन्ते श्रूयते—'तद्वा एतत्परमं धामैतद्विद्यागर्भितमन्त्रराजाध्यायकस्य पाठकस्य जापकस्य' इत्यादिना। स उपासकोऽग्निवाय्वादित्यसोमसत्यब्रह्मविष्णुरुद्रवेदैर्नृसिंहरूपैरुपास्यैः पूतो भवति पवित्रो भवति। अन्यैश्च सर्वैर्नृसिंहरूपैरुपास्यैः पूतो भवति। द्विरभ्यासोऽध्यायसमाप्तिं द्योतयति॥

इति प्रथमाध्यायभाष्यम्॥

द्वितीयोऽध्यायः ॥

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स मृत्युं तरति स पाप्मानं तरति स ब्रह्महत्यां तरति स भ्रूणहत्यां तरति स वीरहत्यां तरति स सर्वं तरति स सर्वं तरति ॥ २ ॥

इति द्वितीयोऽध्यायः ॥

इतःप्रभृति नित्यमेतद्विद्यानुष्ठानेन तत्प्रतिपादकग्रन्थाध्ययनेन जपेन वा आनुषङ्गिकान्येव फलानि काम्यानि तद्रहितानि वा कथयितुमाह । य उपासकः नित्यत्वेन तद्विद्यानुष्ठानेन तज्जपेन वा पापक्षयं कामयते । एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते इत्युक्तार्थम् । तथा इतःप्रभृति आ अन्त्यादध्यायात् तत्र तत्र यच्छब्देन पुंलिङ्गेन प्रागुक्तनृसिंहविद्याया निश्चिततया अनुष्ठानात् तद्विद्याप्रतिपादकग्रन्थजप्ता वा अध्येता वा परामृश्यते । तथा तच्छब्देन पुंलिङ्गेन स एव परामृश्यते । तथा तत्र तत्र पुंलिङ्गात् तच्छब्दाभ्यासात् तस्मिन्नेव नित्यानुष्ठाने जपे वा व्यस्तं समस्तं वा यथायोग्यतया फलं गम्यते । स मृत्युं पाप्मानं ब्रह्महत्यां

भ्रूणहत्या भ्रूणो गर्भः, यद्वा साङ्गवेदार्थव्याख्याता दीक्षितो भ्रूणः, वीरहत्यां वीर पुत्रः सवनस्थः क्षत्रियो वा अन्यच्च पातकं सर्वं तरति । द्विरभ्यासोऽध्यायसमाप्तिं द्योतयति ॥

इति द्वितीयाध्यायभाष्यम् ॥

तृतीयोऽध्यायः ॥

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते सोऽग्निं स्तम्भयति स वायुं स्तम्भयति स आदित्यं स्तम्भयति स सोमं स्तम्भयति स उदकं स्तम्भयति स सर्वान्देवान्स्तम्भयति स सर्वान्ग्रहान्स्तम्भयति स विषं स्तम्भयति स विषं स्तम्भयति ॥

इति तृतीयोऽध्यायः ॥

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते सोऽग्निं वायुमादित्यं सोममुदकं सर्वान्देवान्ग्रहान्विषं स्तम्भयतीति स्तम्भनफलनिर्देशः । द्विरभ्यासोऽध्यायसमाप्तिं द्योतयति ॥

इति तृतीयाध्यायभाष्यम् ॥

चतुर्थोऽध्यायः ॥

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स भूर्लोकं जयति स भुवर्लोकं जयति स स्वर्लोकं जयति स महर्लोकं जयति स जनोलोकं जयति स तपोलोकं जयति स सत्यलोकं जयति स सर्वलोकं जयति स सर्वलोकं जयति ॥

इति चतुर्थोऽध्यायः ॥

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स भूर्भुवःस्वर्महर्जनस्तपःसत्यमन्यच्च सर्वं पाताललोकं जयतीति फलनिर्देशः । द्विरभ्यासोऽध्यायसमाप्तिं द्योतयति ॥

इति चतुर्थाध्यायभाष्यम् ॥

पञ्चमोऽध्यायः ॥

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स मनुष्यानाकर्षयति स दे-

वानाकर्षयति स नागानाकर्षयति स यक्षानाकर्षयति स ग्रहानाकर्षयति स सर्वानाकर्षयति स सर्वानाकर्षयति ॥ ५ ॥

इति पञ्चमोऽध्यायः ॥

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स मनुष्यान्देवान्नागान्यक्षान्ग्रहांस्तद्व्यतिरिक्तानन्यांश्च आकर्षयतीति फलनिर्देशः । द्विरभ्यासोऽध्यायसमाप्तिं द्योतयति ॥

इति पञ्चमाध्यायभाष्यम् ॥

षष्ठोऽध्यायः ॥

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते सोऽग्निष्टोमेन यजते स उक्थ्येन यजते स षोडशिना यजते सोऽतिरात्रेण यजते सोऽप्तोर्यामेण यजते सोऽश्वमेधेन यजते स सर्वैः क्रतुभिर्यजते स सर्वैः क्रतुभिर्यजते ॥ ६ ॥

इति षष्ठोऽध्यायः ॥

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते सोऽग्निष्टोमेनोक्थ्येन षोडशिना वाजपेयेनातिरात्रेणाप्तोर्यामेणात्यग्निष्टोमेनान्यैश्च सर्वैः क्रतुभिर्यजत इति फलनिर्देशः । द्विरभ्यासोऽध्यायसमाप्तिं द्योतयति । न च वाच्यम् 'अन्यानर्थक्यात्' इति न्यायेन कथं फलनिर्देश इति । यतो मनोव्यापारैकसाध्यत्वादेतद्विद्यानुष्ठानस्य तस्य च कर्मानुष्ठानादत्यन्तदुःसंपादत्वादित्यधिकारभेदेन नान्यानर्थक्यमिति सर्वं निर्मलम् ॥

इति षष्ठाध्यायभाष्यम् ॥

सप्तमोऽध्यायः ॥

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स ऋचोऽधीते स यजूंष्यधीते स सामान्यधीते सोऽथर्वाणमधीते सोऽङ्गिरसमधीते स शाखा अधीते स पुराणान्यधीते स कल्पानधीते स गाथा अधीते स नाराशंसीरधीते स प्रणवमधीते यः प्रणवमधीते स सर्वमधीते स सर्वमधीते ॥ ७ ॥

यः एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते, सः ऋचो यजूंषि सामान्यथर्वाणमङ्गिरसम्; एतच्च त्रयीसंपुटीकरणम्, एतदन्तरालवर्तित्वाद्वेदत्रयस्य। तथा च तस्मिन्नेव ब्राह्मणे प्रजापतिः प्रथममथर्वाणमपश्यत् ततस्त्रयीं ततः अङ्गिरसम् इत्यसकृदभिहितत्वात् शाखाः पुराणानि कल्पान्गाथा नाराशंसीः प्रणवमधीते इति फलनिर्देशः। अत्र च यः प्रणवमधीते सः सर्वमधीते इति वदन् मूलमन्त्रप्रणवयोः फलसाम्यादुभयोः साम्यं दर्शयति। ततश्च जपे समाधौ च उभयोर्विकल्पः। तथा च नित्यानुष्ठाने फलकामनायां प्रयोगविशेषः। तत्तत्फलपदोच्चारणं मूलमन्त्रजपान्ते कार्यमिति केचित्; अन्ये तु तद्विनैव केवलं कामनैव कार्येति, सांप्रदायिकमेवान्वेष्यमिति। द्विरभ्यासोऽध्यायसमाप्तिं द्योतयति।

इति सप्तमाध्यायभाष्यम्॥

अष्टमोऽध्यायः॥

अनुपनीतशतमेकमेकेनोपनीतेन तत्समम्-
मुपनीतशतमेकमेकेन गृहस्थेन तत्समं गृ-
हस्थशतमेकमेकेन वानप्रस्थेन तत्समं वा-
नप्रस्थशतमेकमेकेन यतिना तत्समं यती-

नां च शतं पूर्णं रुद्रजापकेन तत्समं रुद्रजापिशतमेकमेकेनाथर्वशिरःशिखाध्यायकेन तत्सममथर्वशिरःशिखाध्यायकशतमेकमेकेन मन्त्रराजजापकेन तत्समं तद्वा एतत्परमं धाम मन्त्रराजाध्यायकस्य यत्र सूर्यो न तपति यत्र न वायुर्वाति यत्र न चन्द्रमास्तपति यत्र न नक्षत्राणि भान्ति यत्र नाग्निर्दहति यत्र न मृत्युः प्रविशति यत्र न दुःखं सदानन्दं परमानन्दं शाश्वतं शान्तं सदाशिवं ब्रह्मादिवन्दितं योगिध्येयं यत्र गत्वा न निवर्तन्ते योगिनस्तदेतदृचाभ्युक्तम्— तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुरातातम्। तद्विप्रासो विपन्यवो जागृवांसः समिन्धते। विष्णोर्यत्परमं पदमिति तदेतन्निष्कामस्य भवति तदेतन्निष्कामस्य भवति॥

एवं नित्यानुष्ठाने आनुषङ्गिकं सर्वं फलमभिधाय, अथेदानीं तद्विद्यानुष्ठातुर्जन्तुः अध्येतुश्च उत्कर्षतरतमभावेन सर्वोत्कृष्टतां सर्वोत्कृष्टं च फलमाह— अनुपनीतशतमेकमेकेनोपनीतेन तत्सममम् । उपनीतशतम् उपकुर्वाणकानां न नैष्ठिकाभिप्रायेण तस्य सर्वोत्कृष्टत्वात् । एकमेकेन गृहस्थेन तत्समं गृहस्थशतम् एकम् एकेन वानप्रस्थेन तत्समं वानप्रस्थशतम् एकम् एकेन यतिना तत्समं सोऽयमाश्रमस्वीकारमात्रे तरतमभावः नाश्रमप्रयुक्तानुष्ठानाभिप्रायेण; ततश्च यतीनां च शतं पूर्णं स्वीकृताश्रममात्राणां यस्मिन्कस्मिंश्चित्स्थितरुद्रजाप्येन तत्समं रुद्रजाप्यशतमेकं यस्मिन्कस्मिंश्चिदाश्रमे स्थितार्थर्वशिरःशिखाध्यायकेन जापकेन तत्सममथर्वशिरःशिखाध्यायकशतं मन्त्रराजजापकेन तत्सममम् इत्युत्कर्षतरतमभावस्य मन्त्रराजजापके एतद्विद्यावति विश्रान्तत्वात् एतद्विद्यावान्सर्वोत्कृष्ट इति गम्यते । यथा आनन्दतरतमभावस्य ब्रह्मणि विश्रान्तत्वात् ब्रह्मानन्द एव सर्वोत्कृष्टः । यस्मादेवं तस्मात् वै प्रसिद्धम् एतत्परमं धाम स्थानम् एतद्विद्यागर्भितमन्त्रराजाध्यायकस्य जापकस्य अनुष्ठातुर्वा । यत्र क्षीरोदार्णवस्थाने सूर्यो न तपति यत्र वायुर्न वाति यत्र न चन्द्रमास्तपति यत्र न नक्षत्राणि भान्ति यत्र नाग्निर्दहति

यत्र न मृत्युः प्रविशति यत्र न दुःखं सदानन्दं परमानन्दं शाश्वतं शान्तं सदाशिवं ब्रह्मादिवन्दितं योगिध्येयं यत्र गत्वा न निवर्तन्ते योगिनः तदेतत्स्थानम् ऋचाभ्युक्तं विष्णोर्यत्परमं पदमिति । यच्छब्देन क्षीरोदार्णवस्थानं परामृश्यते, परमपदप्रत्यभिज्ञानात् । सूरयः उपासकाः उपासनाभेदेन तादात्म्यमुपासनाया चेत् सायुज्यं फलं ततश्च विष्णुरेव परमं पदम् । उभयत्रापि विष्णोरिति षष्ठीनिर्देशः शिलापुत्रकस्य शरीरमितिवद्द्रष्टव्यः । अथ उपास्योपासकभावेन चेदनुष्टुब्विद्या तस्य नृसिंहस्य विष्णोः परमं पदं परमं स्थानं महाचक्रनाभिक्षीरोदार्णवप्रभृति तत्र स्थिताः उपासकाः अनुष्ठातारः जप्तारः अध्येतारो वा सदा सर्वकालं पश्यन्ति । कीदृशं तदित्यपेक्षिते, आह—दिवीव द्युलोक इव चक्षुः ख्यातेः सूर्यमण्डलम् आततम् आ समन्तात् ततं विस्तृतं वर्तुलं प्रकाशात्मकं सर्वप्रकाशाभिभवकारणम् अतः सूर्यचन्द्रनक्षत्रादीनां ब्रह्मणि प्रवेशः प्रतिषिद्धः तपकर्तृता च यत्र सूर्यो न तपतीत्यादिना । एवं तस्मिन् आधिदैवात्मके दुःखे प्रतिषिद्धे आध्यात्मिकदुःखप्राप्तौ तत्प्रतिषेधति— यत्र न दुःखमिति । विदुःखता दुःखाभावमात्रे प्राप्ते, सुषुप्तवज्जडता स्यादिति तद्व्यावृत्त्यर्थं सदानन्दमिति । ब्रह्मादिवन्दितमिति ।

तदादिन्यायेन नाभिम्थब्रह्मविष्णुमहेश्वरैः परिचारकैः वन्दनीयं महाचक्राख्यं स्थानम् । यत्र गत्वेति । तस्य गन्तव्यतामाह—तद्विप्राम इति । तत्तादृशं स्थानं विप्रासः विप्रा ब्राह्मणाः उपासकाः विपन्यव. मेधाविनः समाधौ धारणशक्तियुक्ताः । जागृवांसः जागरितावस्थायामेव अवस्थात्रयात्प्रच्युत्य समिन्धते समृद्धिं कुर्वन्ति । तादात्म्यपक्षे तु मन्त्रब्राह्मणयोर्यथाम्वरूप व्याख्येयम् । इति-शब्दो मन्त्रसमाप्तिं द्योतयति । पदचतुष्टयाभ्यामः सर्वोपनिषत्समाप्तिं द्योतयतीति सर्वं निर्मलं सिद्धम् ॥

इति अष्टमाध्यायभाष्यम् ॥

इति श्रीमत्परमहसपरिव्राजकाचार्यस्य

श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य

श्रीमच्छंकरभगवतः कृतौ

नृसिंहपूर्वतापनीयोपनिषद्भाष्यं

संपूर्णम् ॥




उपनिषन्मन्त्राणां
वर्णानुक्रमणिका